Shri Raghunath Temple MSS. Library,
JAMMU

No. १४१८

Title माधुर्यां शब्द खण्ड:

Author ×

Extent ७८ Age ×

Subject न्याय शास्त्रं

116
38
78

माधुर्यामृतखण्डः

१५१८

११६
३८
७८

नं· १४१८

सिद्धतादशायां स्वाधिकरणकालावच्छेदेन तदभावात् स्वस्मिन् साध्यत्वविरहात्। एतदेवोपपादयति
आलोके साध्यत्वमसत्त्वगर्भमिति तत्साध्यत्वं। तदुत्तरत्वगर्भं तच्च तत्कालीनप्रागभावप्रतियोगित्वरूप
तत्कालासत्त्वमित्यर्थः प्रागभावप्रतियोगित्वं च प्रागभावस्वरूपतया स्वपूर्वावस्थायामेव अथवा प्रतियो
गितया संबंधस्तत्कालवृत्तिप्रागभावः तदुत्तरत्वं तस्य च प्रतियोगिकालपर्यंतावस्थानासंभव एवेति भा
वः। सिद्धतादशायां च साधनत्वमिति मूले सिद्धतादशायामेव स्वाधिकरणकाल एव साधनत्वं स्वस्येत्य
र्थः असिद्धावस्थातः कार्यानुत्पत्तेरिति असिद्धावस्थाव्यवहितोत्तरकाले कार्यानुत्पत्तेरित्यर्थः ता
वतैव कथमसिद्धावस्थेसाधनत्वाभाव इत्याकांक्षायां तावता कार्योत्पत्त्यव्यवहितपूर्वसत्त्वस्य साधन
त्वरूपतालाभ इत्याशयेन साधनत्वस्य तद्रूपताममभिधाय साध्यत्वसाधनत्वयोरेकधर्मिण्येककालाविष
यत्वमुपपादयति आलोके साधनत्वं चेत्यादिना सत्त्वगर्भं कालवृत्तित्वगर्भं एकत्र· एकधर्मिविषये· एकदा
समसमयं· एकेन पुंसा दुर्ग्रहे दुर्ज्ञेये फलतः एककालाविषयत्वलाभः एकात्मवृत्तिज्ञानद्वयस्य समसमय
ताविरहात् अतस्तद्गर्भे साध्यत्वसाधनत्वे अपि तथेति शेषः एवं च मूले पाकादेरसिद्धत्व। सिद्धत्वज्ञानद्वय

स्यसाध्यत्वसाधनत्वघटकसत्वासत्वज्ञानेसतीत्यर्थः सिद्धमसिद्धंचेतिमूलस्यापिसदसच्चेत्यर्थः स्वरू
३९ पगततया एकधर्मिवृत्तिताअविरोधः साध्यत्वसाधनत्वयोस्तद्घटकसत्वासत्वयोश्चेतिशेषः यथाश्रुतेएक
धर्मिगतत्वेपिएकावच्छेदेनैकत्रासत्वरूपविरोधः संभवत्येवेति एकाधिकरणतावच्छेदकमात्रावच्छिन्न
39 मेकत्रसत्वरूपंतद्विरोधप्रयोजकंवक्तव्यमित्याशयेनयद्विचेत्यादिदूषणं संगमयति आलोकेस्वरूपग
तत्वंयदीति· स्वरूपेतिस्वस्यचयद्रूपंअधिकरणतावच्छेदकंतेनैवावच्छिन्नत्वमित्यर्थः स्वरूपनिवंध.
नमितिमूलस्यस्वरूपमात्रावच्छिन्नत्वनिवंधनंस्वरूपप्रयुक्तमर्थः उभयंसाध्यत्वसाधनत्वे· तत्स्वरूप
पाकादिस्वरूपंसदेवसिद्धमसिद्धंचस्यादितिअधिकरणतावच्छेदकपाकत्वादेः सर्वदासत्वेनतत्व
युक्तसाध्यत्वसाधनत्वयोरपितथात्वेनतत्प्रभृतसत्वासत्ववत्सर्वदैवस्यादित्यर्थः साध्यत्वसाधन
त्वयोर्भिन्ननिरूपितत्वंयदिभिन्नप्रतियोगिकत्वंतदासंगतिः कृतीषयोर्विभिन्नायास्तदुभयप्रतियोगि
तायास्तत्राविवादात् अतोनिरूपितपरस्यावच्छिन्नत्वमर्थमाह आलोकेअथस्वरूप इति स्वरूपेधर्मिणि·
अन्यावच्छेदेनभिन्नभिन्नावच्छेदेनसत्वमितिस्वीक्रियतइतिशेषः। उक्तरूपमेवेतिसत्वासत्वरूपोक्त ३९

धर्मावच्छेदककालद्वयमेव। उक्तदोषान्निवृत्तिरिति तत्तदवच्छेदककालविनिर्मोकेण द्वयोरेकत्रैक
क्षणेनावगाहनासंभवरूपदोषानुद्धार इत्यर्थः यद्यपि कारणत्वं कार्यनियतपूर्ववर्त्तितावच्छेदकपा
कत्वादिरूपं पाकादौ सर्वदैवेति न तेन सह साध्यत्वविरोधः तथापि संशयसाधारणफलोपहितसाध
नत्वज्ञानमेव प्रवृत्तिप्रयोजकमतः स्वरूपयोग्यताया यावदाश्रयस्थायित्वेपि फलोपधायकतायाः फ
लाव्यवहितप्राक्क्षण एव सत्त्वेन नासिद्धता दृशावच्छिन्नवृत्तिकत्वमित्यभिप्रायेणेतद्युक्तीनां संगतिः
साध्यत्वसाधनत्वयोर्विरोधमेवोपसंहरति मूले तस्मादिति। समयभेदोपाधिकः विभिन्नसमयावच्छि
न्नः पाकादिपूर्वकालावच्छेदेन तत्र साध्यत्वसत्त्वानुपपत्तिमाशंकते आलोके नन्विदमिति। साध्यत्वतद
वच्छेदकसंबंधयोस्तत्रासंभवादिति पाकादौ साध्यतावच्छेदकत्वाभिमतपूर्वकालसंबंधस्य तत्कालावच्छेदे
न पाकादावनवच्छेद्यत्वाभिमतसाध्यत्वसंबंधस्य चासंभवादित्यर्थः धर्मिणि इति। तदाश्रयपाकादेरित्यर्थः
असत्त्वादिति पूर्वकाल इत्यादिः अवच्छेद्याधिकरणसंबंधस्यैवावच्छेदकतया तदानीमसति वस्तुसं
बंधेन तत्कालस्यानवच्छेदकत्वादिति भावः अवच्छेद्याधिकरणसंबद्धे अवच्छेदकत्वाभावमेव द्रढयति।

न हीति वृक्षेन्वर्तमानायाः तद्वृक्षासंबद्धायाः। वृक्षे शाखेति प्रसक्ताया इदस्यापि शाखाधारतायां ग्रंथकृता
४० वाच्यतया यथाश्रुत एव वार्थः तत्र एतद्वृक्षसंयोगावच्छेदकत्वे संयोगवत्तावच्छेदकत्वं अवच्छेद्यतुल्यस्या
40 वच्छेदकत्वादिति अवच्छेद्यावच्छेदकयोस्तुल्यरीतिकत्वादित्यर्थः रीतितौल्यमेव दर्शयति अवच्छेद्यं धर्मि
णि सत्येवेति धर्म्म्यधिकरणकालमात्रस्यापीत्यर्थः तत्रावच्छेदकमपि तथैवेति। धर्मिसंबद्धकाल एव तत
त्रावच्छेदक इत्यर्थः अवच्छेद्यमसत्यपि धर्मिणि तत्संबद्धमिति धर्म्यनधिकरणकालेपि तद्धर्मिसंबद्ध
मवच्छेद्यं वर्तत इत्यर्थः ज्ञानादिवदिति· यथा ज्ञानादिकमसत्यप्यतीतानागतविषये विषयतया वर्त
त इत्यर्थः अवच्छेदकमपि तथैवेति अवच्छेद्याधिकरणसंबंध्यपि कालोऽवच्छेद्यसंबंधमात्रेणावच्छेद
क इत्यर्थः अत एवानागतविषयेपि पूर्वकालावच्छेदेन ज्ञानादिसत्वात् तत्र पूर्वकाले विषयतया इ
च्छादिरूपकार्यमुत्पद्यत इति भावः। तदसंबद्धस्यापि पाकाद्यसंबन्धस्यापि कालस्य पाकाद्यसंबद्धस्या
पि तत्पूर्वकालस्य अवच्छेदकत्वमिति। पाकादेः साध्यत्वसंबंध इत्यादिः। ननु एककालावच्छेदेनावर्त
मानयोः साध्यत्वसाधनत्वयोः स्वस्वावच्छेदकविभिन्नकालावच्छेदेनैकत्र ज्ञानं संभवत्येव तदेव प्रवर्त ४०

कमुपेयमित्याशंक्य तत्र मूले इदानीमिति नानात्वेन विरुद्धसाध्यत्वसाधनत्वावच्छेदकपूर्वापरकालासंग्रा
हकाननुगततत्तत्कालत्तया प्रवर्तकज्ञानविषयत्वेनोपादेयत्वेन विरुद्धयोः परस्परावच्छेदकव्यावृत्तरूपा
वच्छिन्नस्वस्वावच्छेदकावच्छेदेनैवैकत्र भानमिति नियमादिति भावः अननुगमेन दृष्टान्तपक्षवृत्तिसाध्यघ
टककालयोरेकरूपेण प्रवेशासंभवेन व्याप्त्यग्रहात् विशेषरूपेण तत्कालविषयकप्रवर्तकानुमित्योप
पिकव्याप्तिग्रहासंभवात् शब्देन लिङ्ग उपदादिनापि तथा एतत्कालावच्छिन्नकृतिसाध्यतात्वेनाग्रिमका
लावच्छिन्नेष्टसाधनतात्वेन च प्रतिपादयितुमशक्यत्वादिति अननुगमेन विशिष्य तत्तत्कालमंतर्भाव्य
शक्तिग्रहासंभवादिति भावः आलोकेयघ्देति इदानीमिदं मत्कृतिसाध्यमेतदुत्तरकाल इष्टसाधन
मितिसमूहालंबनानुमितिः संभवत्येवेत्यर्थः प्रथमसाध्ये हेतुरेतत्कालीनकृतिव्यतिरेकप्रयुक्तव्य
तिरेकप्रतियोगित्वं द्वितीयसाध्ये च एतदुत्तरकालीनस्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगीष्टकत्वं
यन्नत्पदेन कालमुपादाय सामान्यमुखीव्याप्तिरूपेयायन्तदर्थो ननुगमे पि सामान्यमुखव्याप्त्या पक्ष
धर्मतावलात् एतत्कृतसाध्यस्याप्रसिद्धस्यापि सिद्धेः सर्वसंमतत्वात् भवन्मतेपीदानीतनत्वविशेषितकृ

४१ तिसाध्यत्वरूपप्रवृत्त्यौपयिकसाध्यसिद्धेः सामान्यमुखव्याप्तिं विना उपायाभावादिति भावः। शाब्दो
वितिपूर्वापरकालावच्छेदेन साध्यत्वसाधनत्वबोधक इति शेषः सामान्यव्याप्त्यैव कालविशेषांत
र्भावेणेत्कृतिसाध्यत्वेष्टसाधनत्वयोर्लिङादिपदशक्तिग्रहसंभवादिति भावः अन्यथा अननुगमेन
शक्तिग्रहासंभवे अननुगमेनेति स्वप्रयोजकबुद्धिप्रकारावच्छिन्नस्यैव तदादिपदशक्यतया तत्प्रवि
ष्टस्वपदार्थस्याननुगमादिति भावः मूले गौरवादिति। तत्कालतदुत्तरकालयोरपि साध्यत्वसाधनत्वा
घवच्छेदकयोः प्रवर्त्तकधीविषयत्वादिति भावः इदानीमेतन्भावस्य उभयसिद्धतया तस्य गौरवप्र
योजकत्वं न संभवतीत्याह तिपतिआलोके यद्यपीत्ति अपरपक्षेपि। गुरुमतेपि। अन्यथा भाविय्योवरा
ज्ये प्रवृत्तिप्रसंगादिति भावः नच भाविय्योवराज्ये प्रवृत्तिवारणाय कृत्ताविदानींतनत्वप्रवेशस्योभय
संमतत्वेपि साध्यत्वस्य साधनतात्वानविषयतानिर्वाहाय न्यायमते साध्यत्वे तदवच्छेदकतत्काला
वच्छिन्नत्वभानमधिकमेवेति वाच्यं कृतिसाध्यत्वांशे तत्कालावच्छिन्नत्वभानस्य प्रवृत्तिप्रयोज
कत्वे तावतैव भाविय्योवराज्येति प्रसंगभंगे न कृत्ताविदानींतनत्वभानस्य नैयायिकैरभ्युपगंत ४१

च्यत्वात्· न च भाविं यौवराज्यादिसाधारणं तत्कालीनकृतिसाध्यत्वं तत्कालीनप्रागभावरूपमेतत्कालावच्छिन्नमपि तत्प्रागभावस्येदानीमपि सत्वादिति साध्यत्वे एतत्कालावच्छिन्नत्वनिवेशमात्रेणनातिप्रसंगवारणसंभव इति वाच्यं· समानकालीनत्वसंबंधेन तत्तत्कृतिविशिष्टप्रागभावस्यैव तत्कृतिसाध्यत्वरूपतोपगमे भाविकृतिविशिष्टप्रागभावस्यैतत्कालावृत्तित्वेन तदात्मकसाध्यतायाएतत्कालानवच्छिन्नत्वेनानतिप्रसंगात् तत्साध्यताशरीरे तद्विशिष्टप्रागभावप्रतियोगित्वरूपतदुत्तरत्ववत् तद्ध्वंसवृत्तिप्रागभावाप्रतियोगित्वरूपतद्व्यवधानस्यापि प्रवेशे नु भाविंयौवराज्ये इदानीतनकृतिसाध्यतावारणसुभयमतएवेति वोध्यं।। अग्रे ऽन्न भवितानं गौरवं न्यायमते यद्यपि इष्टसाधनत्वांशे।ग्निमकालावच्छिन्नत्वावगाहितायाः साध्यत्वज्ञाने साधनत्वनान्यथानुपपत्त्या स्वीकारेपि तदवगाहित्वं प्रवृत्तिजनकतावच्छेदके न निवेश्यते प्रयोजनविरहादिति विषयाधिक्यप्रयुक्तगौरवानवकाशस्तथापि सर्वत्र प्रवर्तकज्ञाने तद्विषयकत्वस्य तन्निर्वाहकसामग्र्याश्च कल्पने गौरवमत्र विवक्षितं मूलेयाकादेरिष्टसाधनतायाः कृतिसाध्यत्वावच्छिन्नत्वेन हेतुना साधनत्वमपि साध्यमित्यनेन साधनत्वस्य साध्यतावस्य

साधनत्वेऽग्निमकालावच्छिन्नत्वसाधिकस्यात भावात् ५

वृत्तित्वोपपादनशंकांसंगमयति कारणेतेति कारणतावच्छेदकावच्छिन्ने कारणतावच्छेदकविशिष्टे
४२ 42 कारणत्वमिति कारणतावच्छेदकंयदायत्र तत्र कारणत्वमिति फलितार्थः एककालावच्छेदेनैकत्रसत्तोरे
वावच्छेद्यावच्छेदकभाव इति नियमादिति भावः साधनत्वेसाधनत्वसत्वंआवश्यकमित्ति शेषः असद्भमे
एव। असिद्धावस्य वृत्त्येवातत्साधनत्वंकुतोविरोधः कथंसाध्यत्वसाधनत्वयोः विरोधः। नहीति हिशब्देनो
क्तमित्यस्य यथाश्रुतार्थोक्तिः कृतिसाध्यतायांसाधनतानवच्छेदकत्वसाधकत्वाभिधानमसंगतंवायुक्ते
रसाधकत्वादत उक्तमित्यस्यशेषंपूरयति गौरवमिति तथा च इति इत्यत्र गौरवंहेतुतयोक्तमिति मूला
र्थः अभ्युपेत्य कृतिसाध्यत्वेनसाधनत्वेपि तारशाकृतिसाध्यत्वप्रवर्त्तककृतिसाध्यत्वयोर्विभिन्नत्वा
प्रवर्त्तकसाध्यत्वसाधनत्वयोरविरोधंखंडयति वस्तुत इति तथाभावेपि। साध्यत्वेनसाधनत्वेपि अ
न्यप्रकारः प्रवर्त्तकज्ञाने प्रकारः अवच्छेदकत्वंसाधनतावच्छेदकत्वं। उक्तविरोधस्य प्रवर्त्तकासत्व
गर्भसाध्यत्वविरोधस्य कृतिकारणकत्वे स्वपूर्ववर्त्तितावच्छेदककृतित्वकत्वे। कृत्यधिकरणका
लध्वंसाधिकरणकालोत्पत्तिकत्वंवावाच्यंसाधनतावच्छेदकतया स्वीकार्यनेनु तदेवप्रवर्त्तकसाध ४२

ननाग्रहविषयोस्त्वित्यतआहतच्चेतिकृत्यनंतरभविष्यत्वेतिनिरुक्तार्थकंअनिर्वाहकादितिअन्या
दृशसाध्यताप्रकारकज्ञानस्येदृशसाध्यताप्रकारकचिकीर्षाप्रत्यजनकत्वादितिभावः ईदृशचिकीर्षा
याएवचप्रवर्तकत्वेनानुभवसिद्धत्वादितिशेषः अवच्छेद्यस्यलौकिकप्रत्यक्षएवावच्छेदकभाननियम
मइत्याशयेनसाध्यत्वसाधनत्वयोरेककालावच्छेदेनैकत्रासत्वेपितदुभयविषयकैकज्ञानमुपपाद्य
तद्धेतुत्वेबाधकांतरमवतारयतिनन्विति। इतिन्यायेनावच्छेदकाविषयकेदृशशाब्दादिज्ञानतुल्यतया
एकधर्म्युपसंहारः स्तयोरितिअवच्छेदकतत्तत्कालाविषयकंसाध्यत्वसाधनत्वयोरेकधर्मिणिशाब्दा
दिज्ञानमित्यर्थः संभवेदितिअन्यथेष्टसाधनत्वहेतुनातत्रकृतिसाध्यत्वानुमितिरपिनस्यात्ताभ्यांनयोः सह
चारग्रहासंभवात्कथं वानेषांस्वर्गसाधनत्वविशिष्टेऽपूर्वेकृतिसाध्यत्वरूपकार्यत्वभानमितिभावः
इत्यरुचेः साध्यत्वसाधनत्वयोरेकज्ञानाविषयत्वेतेषामप्यनिर्भरात्मत्वेसिद्धधर्मत्वात्। सिद्धत्वनिय
तत्वात्-। सिद्धमिच्छन्तिसिद्धत्वेनतन्नियतधर्मवत्त्वेनवाज्ञातमिच्छतीत्यर्थः सिद्धत्वेनेतिदृष्टांतविषयो
क्तंअसिद्धत्वविरोधिनायाः सिद्धत्वइवतन्नियतधर्मेप्यविशेषादितिभावः इदमप्यापाततः इदानी

सिद्धत्वस्यैव तदानीन्तनेच्छाविरोधित्वात्· इदानीमसिद्धस्याप्यग्रे तदुत्तरकालीनकार्यसाधनतया च ता
४२ दृशसाधनताया इदानीं सिद्धत्वाव्याप्यत्वात्· नहीति साधनत्वज्ञानस्येच्छाविरोधित्वमित्यर्थः इष्यादावि
43 च्छेति। स्वतोऽपुरुषार्थगोचरचिकीर्षानात्मकेच्छायां कृतिसाध्यताज्ञानाजन्यतया इष्टसाधनताज्ञानस्य
वत्वेनु तयोर्येयत्वादिति भावः। उत्तरयति। तत्साध्येति इष्टिसाध्यतया सुखज्ञानादित्यर्थः एतदर्थस्य प्रा
गप्युक्तत्वादिति गृहाणेति साक्षेपोक्तिः। इष्टिसाध्यतया सुखज्ञानात्प्राधान्येन तद्विषयकेच्छाया असंभ
वात् पूर्ववदत्रापि तादृशानुद्दिष्टानुपगमस्य मूलाभिप्रेतत्वमाह। लोके तत्साध्येति। स्वरूपसतः सुख
दुःखाभावतत्साधनत्वस्योद्देश्यतास्येच्छाप्रयोजकरूपप्रयोजकत्वे दोषस्य वक्ष्यमाणतया साधनप
दं साधनत्वज्ञानविषयपरतया। लोककृत्याचष्टे तत्साधनेष्विति। चिकीर्षानात्मकेच्छायामपि बलव
दनिष्टाननुबंधित्वज्ञानमपेक्षितमिति मतानुसारेण तत्साधनत्वे बलवदनिष्टाननुबंधित्वमपि विशे
षणतया निवेशयति बलवदिति विसंवादिस्थलसंग्रह इति बलवदनिष्टासाधनत्वादिभ्रमविषयवि
षभक्षणादिगोचरेच्छानिर्वाह इत्यर्थः अन्यथा स्वरूपसत्तादृशधर्मस्य तत्राभावादुद्देश्यत्वानिर्वाहेण

च्छानुपपत्तेरितिभावः इदमुपलक्षणं। स्वरूपसतस्तादृशधर्मस्योद्देश्यताप्रयोजकत्वे संजातवा
धतादशायामपि सफलकर्मणीच्छाप्रसंगो बोध्यः एवं प्रमेयत्वादिमात्रेण सुखादिज्ञानदशायां सुखा
दाविच्छावारणाय सुखादावपि सुखत्वादिज्ञानस्योद्देश्यताप्रयोजकत्वं बोध्यं नन्विच्छाविशेषे उद्देश्य
तायाः प्रयोजकत्वोपगमेन सर्वसंग्रहेण न दोषायेत्याशंकायामाह। उक्ताया इति अप्रमासाधार
णेष्टसाधनताज्ञानस्थानीयाया उद्देश्यताया इत्यर्थः सामान्यसामग्रीत्वात् इच्छासामान्यसामग्रीता
पास्नेरूपेयत्वात्. मूले तादृशानुगतधर्मसत्वे युक्तिमाहानुगतेति. अनुगतकारणनियम्यत्वान् अ
नुगतकारणनियम्यताया आवश्यकत्वात् सुखत्वादेश्चाननुगतत्वादिति शेषः। नन्वेवं. उद्देश्यत्व
मेव तत्र चिकीर्षारूपेच्छाविशेषसामग्र्यामतिप्रसंगभंगापत्तिसाध्यताज्ञानमधिकमंतर्भावय
ति। आलोके कृतीति. चिकीर्षायां कृतिसाध्यताज्ञानमात्रस्य हेतुत्वे इष्टसाधनताज्ञानजन्यत्वविशे
षणमतिवेशायत एतद्धारिनो मते पूर्वोक्तमतिप्रसंगमुद्धरति तयाचेति उद्देश्यत्वापेक्षायां चेत्य
र्थः तदानीं अप्रवृत्तिदशायां दुःखसाधनत्वादिति. दुःखसाधनत्वज्ञानेन बलवदनिष्टासाधन

त्वेनाज्ञायमानत्वादित्यर्थः नातिप्रसंगः नचिकीर्षाप्रवृत्त्योः प्रसंगः मूले तथास्तीति अनुगतमिच्छाप्रयो
४४ जकं संभवतीत्यर्थः तथाच किमतिरिक्तो द्वेष्यतावच्छेदकधर्मस्वीकारेणेतिभावः इतीत्यनेन नचेत्यस्य सं
५५ बंधः सहानवस्थाननियमस्य तन्नियमरूपस्य असंभवात् सुखदुःखयोरेकस्मिन्नेवात्मनि सत्वादि
त्यादिः वध्यघातकभावपक्षस्यासंभवेनान्यपक्षमवतारयति आलोके सुखदुःखयोरिति वध्यघा
तकभावः नाश्यनाशकभावः। तयोः। सुखदुःखयोः। स्वसाक्षात्कारमात्रेति सुखदुःखयोरनंतरक्षणे
तत्साक्षात्कार आवश्यकः। अन्यथा तयोः साक्षात्कारविषयत्वनियमभंगापत्तेः तथाच स्वसाक्षात्कारस्यैवस्वा
नंतरोत्पन्नतया तन्नाश्यत्वमेव तयोः। नत्वेकस्यापरनाशकत्वं नाशकत्वावच्छेदकस्वानंतरोत्पन्नत्वविरहा
दितिभावः एककाले एककालावच्छेदेन दुःखासमानदेशत्वात् दुःखवति तस्या अभावात् इति अतः। द्वेष
विषयपदं तत्परत्वेनावश्यमुपेयं तथाच तथा सति चातद्विरोधः द्वेषविषयविरोधः। धर्मवत्वं धर्मवत्वक
पः। शक्यनिर्वचनमिति दुःखसामग्र्या अपि दुःखवत् द्वेषविषयत्वेन तदभावावच्छेदकं धर्मविरहात्यल।
देरपि दुःखसाधनत्वेन द्वेषविषयत्वसंभवेन तत्राप्यनतिप्रसंगादितिभावः नेष्विति दुःखसुखाभावत ४४

त्साधनेष्वित्यर्थः अनुगतप्रयोजकाभावादितिशेषः तत्रापि दुःखादिष्वपि। वाच्यं· द्वेषविषयताप्रयोजक
तयोर्येयं विनिगमकाभावादिति इष्टाविषयत्वाभावावच्छेदकधर्मवत्त्वमेव द्वेषविषयताप्रयोजकं इष्टावि
षयताप्रयोजकमुद्देश्यत्वमेवातिरिक्तमित्यस्यापि वक्तुं शक्यत्वादितिभावः। इदमुद्देश्यत्वं उद्देश्यताख्यधर्मा
न्तरं अंगीकृतमनेनवादिनाउद्देश्यत्वस्य ज्ञातस्येष्टप्रयोजकत्वमेतद्वादिनोनुमतमित्यभिमानेनदूषयति·मू
ले तद्ज्ञानेपीति· उद्देश्यत्वस्य सुखादावज्ञानदशायामपीत्यर्थः स्वरूपसतः प्रयोजकत्वोपगमे किंचेत्यादि
दोषांतरं वक्ष्यति· तदेवातद्रूपावच्छिन्नमेवपत्· यद्रूपावच्छिन्नं· तेनप्रमेयत्वगुणत्वादिमात्रेणसुखादिज्ञाने
तदिच्छायाअनावश्यकत्वेपिनक्षतिः· तद्रूपावच्छिन्नस्य स्वतोऽपुरुषार्थत्वात् स्ववृत्तितयेति स्वरूपकीर्तनं· इष्य
तेअवश्यमित्यादिः असतिप्रतिबंधकइतिपूरणीयं तेनसुखत्वादिप्रकारकज्ञानसत्त्वेपितेनरूपेणसिद्धत्व
ज्ञानेतद्रूपेणेच्छानुत्पत्तावपिनक्षतिः। आलोककारउद्देश्यत्वज्ञानस्यसुखादीच्छायामपेक्षितत्वेपिसुखादेः
स्वतःपुरुषार्थत्वमुपपाद्य किंचेत्यादिकमवतारयतिनन्वितिउद्देश्यत्वं उद्देश्यताख्यधर्मांतरं· निरुपाधिकत
याइष्टसाधनत्वज्ञानानपेक्षतयास्वत इतिस्यात् स्वतःपुरुषार्थव्यपदेशविषयःसंभवेत्· मूलेअनुगत

धर्मेकल्पनापिकारणेअनुगतधर्मावच्छिन्नकार्येअनुगतधर्मावच्छिन्नकारणस्यावश्योपेयत्वादितिभावः नच
८५ सुखादीच्छाकारणमितितथाचतदनुगमार्थमनुगतोद्देश्यत्वकल्पनंव्यर्थमितिभावः तदवगमः सुखादिज्ञानमि
त्यर्थः कारणमित्यनुषज्यते। कारणतावानुगतोद्देश्यत्वकल्पनंशंकतेनत्वीति। ननु उद्देश्यत्वरूपधर्मांतरं।
सुखादिज्ञाननिष्ठधर्मस्यनित्यत्वेगुणसमवेतनित्यस्यजातित्वनियमोभज्येत तादृशधर्मस्यचजातिरूपता
नसंभवतीतितस्यजन्यत्वंयदिस्वीक्रियतेतदभिप्रायेण दूषयति-यथाहीति। सुखज्ञानादिष्वितिसमवायिका
रणतयोपेयेष्वित्यादिः अन्यतमत्वात्‌ व्यभिचारवारणायाभ्युपेयादन्यान्यत्ववत्वात्‌ तृणारणिमणिन्याये
नेति। तृणादीनांयथाविशेषधर्मावच्छिन्नवह्नौहेतुतातद्वत्सुखादिज्ञानस्यापिविशेषधर्मावच्छिन्नेच्छाहेतुता
इत्यर्थः तथेच्छैवजायतामितिइच्छापिअन्यतमत्वावच्छिन्नसुखादिज्ञानजन्यतावतीसुखादिज्ञानत्वावच्छिन्न
निरूपितविशेषधर्मावच्छिन्नजन्यतावत्ती वा भवत्वित्यर्थः तथाचधर्मांतरंत्वप्रमाणिकमेवेतिभावः कृति
साध्यत्वंचयदिकृत्युत्तरभविष्यत्वरूपंतदा दुःखादिनिवृत्तौचिकीर्षानुपपत्तिः तस्याः अजन्यत्वेनतादृशसा
ध्यताविरहादितितत्कल्पानुशयेनक्षेमसाधारणसाध्यंगागर्भीकृतिसाध्यतेतिपक्षमवतारयतिआलोके ८५

नन्वेवमिति एवं साध्यतायाउक्तरूपत्वे दुःखेति दुःखानुत्पादो दुःखप्रागभावः। दुःखसामान्यस्य सामपि
कात्यंताभावो वेत्यन्यदेतत् कथं प्रवृत्तिरिति। यद्यपि प्रवृत्तौ फलचिकीर्षात्वेनाहेतुतया दुःखनिवृत्तौ चि
कीर्षया असंभवेपि दुःखं मे मा भूदितीच्छया प्रायश्चित्ते प्रवृत्तिः संभवत्येव तथापि दुःखानुत्पादं कृत्या
साधयामीत्याकारकेच्छया हि प्रवृत्तिरानुभविकी तथा च प्रवर्तकदुःखानुत्पादेच्छायाः अनुभाविककादा
चित्कचिकीर्षात्वनिर्वाहः कथमित्यर्थोपगमान्नासंगतिः। एवं चिकीर्षाविषयकृतिसाध्यत्वस्य भविष्यता
गर्भत्वे भोजननि[illegible]वृत्तिरूपोपवासादौ प्रवृत्त्यनिर्वाहोपि दूषव्यः मूले कृतौ सत्यामग्रिमक्षणे स्वरूपमि
ति। कृतिमत्वप्रयुक्तमुत्तरक्षणे सत्वमित्यर्थः प्रयुक्तत्वं स्वरूपसंबंधविशेषः प्रायश्चित्तकरणादुत्तरकाले
न दुःखमित्यादिप्रतीतिसाक्षिकः अन्यथा घटनदभावादेरपि प्रायश्चित्तादिकृतिसाध्यतापत्तेः इमंअतिप्र
संगं प्रत्यक्षखंडोक्तरीत्यंतरेणालोककृद्वारयति। यथाचेत्तदिति। यद्यपि कृत्यधीनोत्तरकालसंबंधरूपस्ये
मसाधारणसाध्यत्वस्य सिद्धावस्थायामपि सत्वेन साध्यत्वसाधनत्वयोरेकदा सत्वमपि निर्वहति तथा
पि उत्पत्तिरूपाद्यक्षणसंबंधस्यैव कारणाधीनतया पाकादावुत्पत्तिक्षणे एव कृतिसाध्यतासत्वात्पाको

त्पत्तिक्षणाव्यवहितभोजनादिरूपेष्टसाधनत्वस्य तदव्यवहितपूर्वक्षणवृत्तित्वघटितस्य तदानीमसत्वे
४५ नविरोधो दुष्परिहर एवेति ध्येयं मूले कृतो न स्यामिति कृतिनाशोत्पत्त्युत्तरमित्यर्थः कृत्यधीनसमयसं
46 बंधरूपकृतिसाध्यतावस्थोत्तरमितियावत् सन्नपि विद्यमानोपि धर्मी कृतिसाध्यत्वसंबंधीन कार्यः कृति
साध्यताविशिष्टः आद्यक्षणसंबंधात्मकनिरुक्तसाध्यतारूपविशेषणविरहादितिभावः कार्ये। कार्यतावि
शिष्टे। अपूर्वे कामिनोऽन्वयः तन्मतसिद्धः स्वर्गकामो यजेतेत्यादिवाक्यात्कामनासाधनतान्वयबोधः क्षणि
कत्वेनविशिष्टस्य क्षणमात्रस्थायित्वेन क्रियातुल्यत्वात् यागादिक्रियाया इव स्वर्गाद्यव्यवहितपूर्वक्षण
वृत्तित्वात् तथा च यागादेः स्वर्गाव्यवहितप्राक्क्षणवृत्तितायाइव कार्यत्वविशिष्टस्य तत्क्षणवृत्तित्वघटि
तायास्तत्क्षणपर्यंतस्थायिकार्यजनकत्वरूपस्वर्गसाधनत्वान्वयप्रयोजकरूपाया अपियोग्यताया वि
रहेणपूर्ववाच्यतोपगमेपियोग्यताज्ञानासंभवान्नयागेस्वर्गसाधनत्वान्वयबोधनिर्वाहः तदनिर्वाहे
च कामनाविशिष्टस्य यागे नियोज्यत्वेनान्वयः परमतसिद्धोपि नोपपद्येत एतदन्वयबोधहेतोस्तदन्वय
प्रयोजकस्य यागे स्वर्गसाधनत्वस्याज्ञानादित्याशयः अथवा कार्येऽपूर्वे कामिनोन्वय इत्यस्य कथं कार्य ४५

त्वविशिष्टे अपूर्वे स्वर्गकामनाविशिष्टस्य नियोज्यत्वेनान्वय इत्येवार्थः तत्र तादृशे पूर्वे· स्वर्गसाधन
ताज्ञानस्य योग्यताज्ञानविधया हेतुत्वात् तस्य च बाधेनासंभवादिति भावः। बाधे हेतुमाह क्षणिकत्वेन
क्रियातुल्यत्वादिति· विशिष्टस्यापूर्वस्य व्यापाराव्यवहितपूर्ववृत्तित्वयोरभावेन स्वर्गसाधनत्वासंभ
वादिति भावः। काम्यसाधनताज्ञाने तद्धर्मितावच्छेदकस्य कार्यत्वस्योपलक्षणतया भानमुपेयते न तु वि
शेषणतया तदुपलक्षिते च धर्मिणि काम्यसाधनत्वमबाधितमेवेति समाधत्ते। यद्वेतीति यस्मिन् धर्मि
णि काम्यसाधनताज्ञानमित्यर्थः अपेक्षितमिति शेषः तत्र कार्यतानुद्धेः तत्र उपलक्षणतया धर्मितावच्
छेदककार्यताभानस्येत्यर्थः काम्यसाधनतानद्धीः प्रयोजिकेति शेषः पाके सतीति पाकरूपविषयनिवे
हे सति ज्ञाने प्रत्यक्षरूपे तस्मिन् सति कृतिसाध्यताज्ञानरूपकृतिकारणे पूर्वं सत्तिननुपूर्वं पूर्वं पाके कृति
साध्यताप्रत्यक्षादेव कृतिर्भविष्यतीत्यत आह कृतीति कृतिसाध्यतेतीति। अतीते असंभवादिति। तयो
रसिद्धविषयकत्वस्याभावादिति भावः [redacted] सिद्धविषयकज्ञानाच्च भिन्न
विषयकतया नासिद्धविषयकत्वादिसंभव इति बोध्यं असिद्धपाकादेः प्रत्यक्षासंभवेन तत्पक्षे कृति

साध्यतानुमानमपि न संभवति पक्षधर्मताज्ञानासंभवात्· एवमिदानींतनकृतिसाध्यत्वस्य प्रवृत्त्यर्थमनुमे
५८ यस्याप्रसिद्ध्यापि नानुमानसंभवः शब्दप्रमाणादपि न कृतिसाध्यताया ज्ञानं प्रवृत्तिपूर्वकाले नियतं शब्द
विशेषणज्ञानादिघटिततत्सामग्र्या अनियमादिति पूर्वपक्षिणामाशयः अनुमाने दर्शितदोषा अग्रे नि
राकरणीया इत्याशयेनानुमानमवलंब्यैव समाधत्ते पाको मत्कृतीति· कृताविदानींतनत्वाविषयकज्ञा
नस्याप्रवर्तकतया मत्कृतापि कृतिविशेषणकालविशेषस्य यदा तद्देश्यनेनोपादायोदाहरणस्य प्रद
र्शनीयतया प्रतिज्ञाहेत्वोरपि साध्यहेत्वोः कालविशेषमंतर्भावयन् हेतुं प्रविशेष्य साधनत्वांशसार्थकानु
रोधेन प्रवर्तकज्ञानाविषयमपि स्वेच्छाधीनत्वं प्रतिज्ञायां साध्यघटककृतिविशेषणतयांतर्भावयन् आलो
कयन्नदनुमानं व्याख्यातुमुपक्रमते पाक इति ॥ इदानीं स्वेच्छाधीनेति। इदानींतनीया स्वेच्छाधीना मत्कृति
स्तत्साध्य इत्यर्थः इदानीमित्युक्ते। इदानींतनीच्छाधीनाया मत्कृतेस्तद्व्यतिरेकासत्त्वे सति तद्व्यतिरे
केण तद्व्यतिरेकप्रयुक्तं पदसत्त्वभावः प्रतियोगिनया तस्मिन्सति तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियो
गित्वे सतीति यावत्· प्रयुक्तत्वं च कारणाभावात्कार्याभाव इति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः

भाविघ्योवराज्यादौभाविमत्कृतिजन्येइदानींतनमत्कृतेः कृतित्वेनस्वरूपयोग्यत्वेपितदनुत्पादस्यकृति
त्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकेदानींतनमत्कृतिप्रतियोगिकाभावप्रयुक्तत्वेपिचनतस्येदानीं
तनमत्कृतित्वावच्छिन्नाभावप्रयुक्तत्वंतादृशप्रभावसत्त्वेप्यग्रेतदुत्पत्तेः एतादृशाभावएवचहेतुघटकतया
विवक्षितः यत्रचयादृशस्यफलोपधायकत्वंतदनुत्पादेतादृशस्याभावएवप्रयोजकः॥ इदानींतनमत्कृ
तिव्यतिरेकेपूर्वंसत्त्वस्यसत्वेइदानींतनमत्कृतिव्यतिरेकदृशाव्यवहितोत्तरकालीनानुत्पत्तिकत्वमितियाव
त्। इत्यर्थस्तुनसाधुः इदानींतनमत्कृतिव्यतिरेकस्यभाविघ्योवराज्यानुत्पादाव्यवहितपूर्वकालेकदाचि
त्सत्त्वात्तादृशकृत्यव्यवहितोत्तरत्वशून्यकालोत्पत्तिकान्यत्वनिवेशोपिनसाधीयान्। मत्कृत्यव्यवहितो
त्तरोत्पन्नतदसाध्यवष्यादिसाधारण्यात्। तादृशकृतिर्यत्रान्यथासिद्धानदन्यत्वस्याधिकस्यानिवेशे
चतादृशकृतिसाध्यत्वरूपसाध्यएवपर्यवसानात्। हेतुघटकदलयोर्विशेष्यविशेषणभाववैपरीत्येपि
क्षतिविरहात्। तदभिप्रायेणोदाहरणंदर्शयतिमूलेयस्येतियस्ययदिच्छाविषयसाधनमिति। यद्यत्पुरु
षीयेच्छाविषयसाधनंसदित्यर्थः। यत्कृतिंविनायदानसिध्यतीतियत्पुरुषस्ययदातनकृतिंविनानोत्प

घ्यते इत्यर्थः॥ तदा तत्कृतिसाध्यमिति तन्न दा तत्र न तत्पुरुषीयतत्कृतिसाध्यमित्यर्थः। स्वीयसाध्यहेतुव्याख्यानु
सारेण उदाहरणे हेतोर्विरहाधीनत्वं साध्येपि स्वेच्छाधीनत्वं कृतिविशेषणमुदाहरणे तन्न भविष्यति आलोके यद्य
द्विति॰ यदेति॰ यत्कृतावित्यत्रान्वेति यत्कृतिः यत्पुरुषीयकृतिः यदा यदिच्छा यत्कालीनयत्पुरुषेच्छा तदा तदिच्छा
तत्कालीनतत्पुरुषेच्छा सामान्यव्याप्तावन्यकृतभोजनस्यापि मत्कालानुकंदधांतत्वं संभवतीत्याशयेन आ
शयं प्रकटयति अन्यकृतीति॰ ननु हेतुप्रविष्टसाधनताघटकफलेच्छाविशेषणयत्पदार्थकालस्य साध्य
प्रविष्टेच्छाविशेषणत्वासंभवः। फलेच्छायास्तत्रानिवेशात्॰ उपायेच्छायामपि न तस्य विशेषणत्वं स्वेच्छायाः काला
विशेषिताया एव साध्ये निवेशितत्वादिति॰ अपि तु साध्यघटके कृतावेव तत्पदोपात्तस्य तस्य विशेषणत्वं विव
क्षितं तथा च कालस्यातिप्रसंगभंगाय यत्क्षणरूपस्यैवोपादेयतया यत्कालवृत्तिफलेच्छाविषयसाधनं यः पाका
दिः तत्र न तत्कालवृत्तिकृतिसाध्यत्वं फलेच्छायाः आंतरालिकोपायचिकीर्षांतरितत्वेन कृतिक्षणेऽसत्वात् अ
तो हेतुघटकविशेष्यदलेन सह साध्यस्य विरोधः एवं हेतुघटकतदातनेच्छाविषयसाधनत्वतदानींतनकृ
तिव्यतिरेकासत्वयोरपि विरोधेन विशिष्टसाधनाप्रसिद्धिरित्यत आह यदा तदेति॰ चेति॰ यदा तदेति यदाम्या

मित्यर्थः।स्थूलकालोपाध्युपसंहारः स्थूलकालोपग्रहः स च कालोपाधिः क्षणश्चतुष्टयस्थापि क्रियारूपएव
विशिष्यनिवेशपः।कालत्वेन तन्निवेशेभावियौवराज्यादौवाल्यादिदशायांप्रवृत्तस्यतिप्रसंगस्यातिस्थूलकालसा
धारणकालत्वेनकालविषयकबुद्धेः प्रवर्तकत्वे दुर्वारतयाविशेषरूपेणकालविषयकबुद्धावेवप्रवर्तकता
याअंगीकार्यत्वात् क्षणत्वेनकालोपादानेकृतिपूर्वं तदधिकरणक्षणस्य दुर्ज्ञेयंतयाप्रवर्तकज्ञानानिर्वाहोद्रष्ट
व्यः।एवंच स्नाधौसुखादिरूपेष्टसाधनेव्यभिचारवारणाय सत्वंतोपादाने सत्वंतमात्रस्येदानींतनमत्कृतिं विना ऽ
सत्वमात्रस्यगमकत्वे इदानींतनमत्कृतिसाध्यत्वरूपसाध्यव्याप्यत्वेशेषवैयर्थ्यंविशेष्यदलस्यव्यभिचारावा
रकतया नद्वृष्टिर्नहेतोर्वैयर्थ्यरूपानुमानदोषः।धर्मप्रागभावादिवृत्तिधर्मिभेदाद्वैयर्थ्यंपिविशेष्यतावच्छेद
केष्टसाधनत्वांशस्यवैयर्थ्यमेव उक्तविशेषणविशिष्टत्वेनेष्टसाधनत्वस्यहेतुत्वोपगमेप्रवर्तकज्ञाना
निर्वाहः।अतिप्रसंगभंगायेष्टसाधनतावच्छिन्नविषयकज्ञानजन्यकार्यताज्ञानस्यैवप्रवर्तकतायाउप
गंतव्यत्वादितिबोध्यं।समाधत्तेतत्रेत्यस्येति- भोजनजन्यस्कखस्यषिद्धतयानदिष्टसाधनस्येत्यर्थः।भोजन
चिकीर्षयाअजन्येनकवलधारणादिरूपक्रियांतरचिकीर्षाजन्ययत्नेनजनितइत्यादिः।इदानींफलेच्छावि

रहेणयत्रसफलत्वेनज्ञायमानेपिभोजनादौचिकीर्षाविरहस्तत्रव्यभिचारमुक्त्वापत्रफलसाधनत्वज्ञानवि
४९ 49 रहादेवनचिकीर्षेत्यादृशनांतरीयकक्रियायांव्यभिचारंप्रसंजयतिसंजातबाधस्येतितत्रतत्रव्यभिचारप्र
संजकंसाध्यासत्वंदर्शयतितद्धीतितदाननेतिकृतिविशेषणंतत्कृतीतितत्पुरुषीयकृतीत्यर्थः।तत्पुरुषी
यत्वंचसाध्येस्तीत्युपादानंतज्ज्ञानकृतेस्तद्विषयेस्वाधीनत्वाभावादेवव्यभिचारप्रसक्तिःहेतुत्वसत्वमुपपाद
यतिअथचेति इष्टाधीनतत्कृतीतिक्रियांतरचिकीर्षाधीनतत्पुरुषीयस्वकृतीत्यर्थः।।व्यतिरेकासत्व्यति
रेकप्रयुक्ताभावकंकारणाभावइतिकारणाभावस्यकार्याभावप्रयोजकत्वनियमादित्यर्थः।तादृशकृतिव्य
तिरेकस्योक्तभोजनाद्यभावप्रयोजकत्वादितिशेषः।उक्तकृत्यंतरस्यतत्रकारणत्वमेवद्रढयतिकृतीति·
वध्यादौव्यभिचारवारणायकृतिसाध्यस्येति·ईश्वराभ्युपगंतृमतेवध्यादेरपितत्कृतिसाध्यतयाइ
ष्टाधीनकृत्यसाध्यतयाव्यभिचारवारणायकृतिजन्यत्वेनविशेषणीया।प्राणसंचारादौव्यभिचारवा
रणायद्वितीयदलं।तथाचहेतौविशिष्टायांस्वविषयकत्वानिवेशादन्यगोचरेष्टाधीनकृतिजन्येनांतरी
यकेहेतुस्वरूपसत्वेपितद्दलसत्वमव्याहतमेवेतिभावः।विशेष्यदलेनोक्तव्यभिचारवारणंस्फुटयतिनचे

न्तितत्फले भोजनादिफले तत्साध्याद्यैतदातदिच्छाभावात्‌· तत्साध्यादेः सिद्धत्वादिग्रहदशायां तत्सुखेच्छाभावा
त्‌ एतदनुरोधेनैवेष्टसाधनत्वघटकतदिच्छायांतदानींतनत्वमालोककृताभिवेशितं· अन्यथाकाला
तरीयफलेच्छामादायव्यभिचारस्य दुर्वारत्वात्‌· यद्यपि भोजनादिजन्यफले यत्रेच्छा वर्त्तते यच्च भोजना
द्यैफलसाधनत्वज्ञानस्वकृतिसाध्यताज्ञानाद्यभावेन न चिकीर्षा तत्सत्वेपिवोपादानप्रत्यक्षाभावेन
न तद्विषयिणी न चिकीर्षाधीनकृतिः किंत्वन्यगोचरकृतितो नांतरीयकभोजनादिनिर्वाहस्तत्रव्यभि
चारो विशेष्यदलेनापि दुर्वारस्तद्वारणाय हेतावपि स्वेच्छानिवेशो विशेष्यदलवैयर्थ्यं· न यापिताद्दशानां
तरीयके व्यभिचारवारणाय विशेष्यदलसार्थक्यानुरोधेन तदानीमिष्टसाधनं सद्यत्स्वेच्छाधीनकृत्य
साध्यं तदन्यत्वमधिकं हेतौ निवेश्यं· तत्रापुरुषीयनांतरीयकभोजनाद्यैतदातनेच्छाविषयसाधनत्वविर
हेण विशिष्टभेदसत्वात्तद्वारकतदातनेच्छाविषयसाधनत्वरूपविशेष्यदले विशेषणदलव्यावृत्तिं द
र्शयति· विशेष्यमात्रं चेति तत्साध्यादाविति दैवाधीनायां तदातनेच्छाविषयसुखादिसाधनक्रियायामित्य
र्थः। प्राणसंचार इति प्राणरोधजन्यदुःखनिवृत्तिरूपेष्टसाधने जीवनयोनिकृतिसाध्य इत्यादिः विशि

ष्टमुपात्तं सत्त्वं तद्दलवैशिष्ट्यमुपात्तं। इच्छाधीनत्वस्य कृत्यविशेषणत्वेऽपि कृत्यजन्यवृष्ट्यादिवारणसंभवइति
५० दर्शयति वृष्ट्यादाविति तद्वारणाय कृतिमात्रमिति व्यभिचारवारकं इच्छाधीनत्वाविशेषितमपि कृतिरूपसा
50 ध्यत्वरूपविशेषणमित्यर्थः। केवलकृतिसाध्यत्वविशेषणेन जीवनयोनिकृतिसाध्यप्राणसंचारे व्यभिचारो
न वार्यमपि तु कृतिविशेषणेनेच्छाधीनत्वेनैवेति दर्शयति· अंशस्य वारणार्थमिति· परकीयतद्वारणायेति स्वकृत्य
साध्यपरकीयकृतिसाध्यक्रियाविशेषे व्यभिचारवारणायेत्यर्थः। मिदिति तन्नत् पुरुषीयत्वं कृतिविशेषणमित्य
र्थः· हेतौ स्वविषयकत्वस्येच्छायां विशेषणत्वे विशेष्यदलवैयर्थ्यापरिहारात् तत्र न तद्विशेषणत्वं स्फुटयति इयत
परमत्रेति· हेतौ कालविशेषनिवेशप्रयोजनमाह इदानीमिति हेतावपीत्यपि कारेण प्रवर्त्तकज्ञाननिर्वाहाय
साध्ये तन्निवेशः सूचितः तथा सत्येव हेतौ तन्निवेशस्य व्यभिचारवारकत्वात् व्यभिचारादिति· भाविंयौव
राज्यादावित्यादिः। अत्रैव हेतुमाह भाविंयौवराज्यादीनामिति· मत्कृतीति स्वफलोपधायकभाविमत्कृती
त्यर्थः। मदिष्टेति इदानींतनमदिच्छाविषयभोगरूपफल इत्यर्थः साधनानामिति तेन हेतुसत्त्वं दर्शितं सा
ध्यासत्त्वं दर्शयति इदानीमिति मत्कृतिविशेषणमेतत्· ननु कालान्तरीण पुरुषांतरीयकृतिसाध्यभोजना

दौहृष्टांतेकालांतरीयपुरुषांतरीयकृतिघटितहेतुसाध्ययोरेवसहचारदर्शनंनतयोरेवव्याप्तिग्रहःसं
भवतिनत्विदानींतनमत्कृतिघटितहेतुसाध्ययोः तयोःसहचारदर्शनस्थलाभावात्· क्रियांतरेपियत्रेदानीं
तनमत्कृतिसाध्यत्वमगृहीतंतत्रप्रकृतसाध्याप्रसिद्धेश्चतत्कथंप्रवर्तकेदानींतनमत्कृतिसाध्यत्वानुमि
तिरित्यतआहयत्तद्व्याप्तिरितियत्तत्पदार्थकालांतरपुरुषांतरयोःहेतुसाध्यप्रवेशेनेत्यर्थः।सामान्योपसं
हारेण· यत्तत्पदार्थंनरांशेतुल्यशरीरयोर्हेतुसाध्ययोरन्यत्रव्याप्तिग्रहेणविशेषसिद्धिः विशिष्यप्रकृत
कालपुरुषघटितहेतुनान्तद्घटितसाध्यस्यपक्षेसिद्धिर्नतुविशेषसिद्धिरप्यंगमितिनतुविशिष्यप्रकृतसा
ध्यस्यदृष्टांतेसिद्धिरप्यपेक्षितेत्यर्थः।नस्यप्रकृतहेतौव्याप्तिग्रहस्यानपेक्षितत्वादितिभावः।नचप्रकृत
विशिष्टसाध्यस्यकुत्रापिपदानप्रसिद्धिस्तदातत्प्रकारिकानुमितिःकथंस्याद्विशिष्टविशेषणज्ञानविरहा
दितिवाच्यं· विशिष्टघटकप्रत्येकपदार्थानामुपस्थितितएवविशिष्येविशेषणमित्यादिरीत्याविशिष्टवि
शेषणकज्ञानसंभवात् अन्यथाज्ञानादिद्विक्षणस्थायिपदार्थनाशक्षणेआत्मनिज्ञानत्वानुमितित्वादि
विशिष्टप्रकारकज्ञानादिलौकिकप्रत्यक्षासंभवान्नत्पूर्वज्ञानादिस्थितिक्षणेतत्पूर्वज्ञानत्वादिरूपवि

शेषणे ज्ञानविरहे एतद्विशिष्टज्ञानादिरूपविशेषणज्ञानानुत्पत्तेः न चैवं सति प्रकृतहेतौ प्रकृतसाध्यव्य
५१ भिचारग्रहदशायामपि सजातीयहेत्वंतरे सजातीयसाध्यांतरव्याप्तिग्रहसंभवेन तद्बलात्पक्षे प्रकृत
51 साध्यसिद्धिप्रसंग इति वाच्यं केवलं विशेष्ये विशेषणमिति न्यायेन विशिष्टसाध्यानुमितौ विशिष्टसाध्यप्र
सिद्धेः प्रतिबंधकत्वोपगमात् न च तथापि प्रकृतहेतुसाध्यातिरिक्ततत्तुल्यनिखिलतत्साध्यहेतुव्याप्तीनां
ग्रहस्य सार्वत्र्यमंतरेण दुर्घटत्वं तदा तादृशयत्किंचिद्धेतुसाध्यव्याप्तिज्ञानमेव प्रकृतहेतुकप्रकृतसाध्यका
नुमितिसामग्रीघटकमुपेयं तथा च तथाविधयत्किंचिद्धेतुसाध्ययोर्व्याप्तिग्रहसत्त्वे प्रकृतहेतुतुल्ययत्
किंचिद्धेत्वंतरे तद्घटकयत्पदार्थघटितप्रकृतसाध्यतुल्यसाध्यस्य व्यभिचारग्रहदशायामपि प्रकृतहे
तुनः प्रकृतसाध्यसिद्धिप्रसंगः। व्यभिचारग्रहस्य प्रतिबंधकत्वे सर्वत्रैव तत्प्रतिबंधकतयातिप्रसंगवारण
संभवेनानुमितौ व्याप्तिग्रहहेतुताया एव विलयप्रसंगादिति वाच्यं तादृशयोर्ययोर्ययोर्हेतुसाध्ययोरुपस्थि
तिस्तयोरेव व्याप्तिग्रहस्य प्रकृतहेतुकप्रकृतसाध्यकानुमितावपेक्षितत्वेनातिप्रसंगविरहात् न च तत्सा
ध्यसाधनानुपस्थितिकालीनानुमितिसामग्र्याः सत्त्वात् साध्यसाधनोपस्थित्यधीनतद्व्यभिचारज्ञानकालेप्य

ष्टत्वात्तदानींतत्सामग्रीबलादनुमितिप्रसंगः कथामात्रेणैव दुर्वार इति वाच्यं। तत्तत्साध्यसाधनवि
षयकव्याप्तिग्रहाभावविशिष्टतत्तत्साध्यसाधनोभयोपस्थितेः प्रकृतहेतुकप्रकृतसाध्यकानुमितिप्रतिबंध
कत्वोपगमेन प्रकृततुल्ययत्किंचित्साध्यसाधनविषयकव्यभिचारग्रहदशायामीदृशप्रतिबंधकसत्वेन
सामग्रीविघटनात्। अथैवमपि पक्षे प्रकृतहेतुमत्ताज्ञानस्य तद्वत्प्रकृतसाध्यसिद्धावश्यापेक्षणीयतया
यत्रक्रियांतरेपि इदानींतनमत्कृतिसाध्यत्ववत् इदानींतनमत्कृतिव्यतिरेकासत्वेन गृहीतं तत्रसाध्यवत्
प्रकृतहेतोरप्रसिद्ध्या तत्र पक्षधर्मताज्ञानदुर्भिक्षमित्यनुमित्यनिर्वाहः उपनीतभावमनभ्युपगंतुर्गुरोः
प्रत्येकपदार्थप्रसिद्ध्या मानस्याः हेतुप्रसिद्धेः पक्षधर्मताधिपश्चोपगमासंभवादिति चेत्सत्यं। असंसर्गाग्रह
स्यानुमित्यहेतुत्वे उपनीतभानस्य चानभ्युपगमे तींद्रियसाध्यहेतुकस्थले व्याप्त्यादिग्रहासंभवादनुमित्यनि
र्वाहवदत्रापि ईदृगनिर्वाहरूपदूषणस्य दुरुद्धरत्वात् दत्वार्थः। हेतुघटकेष्टपदार्थः। मधुविषसंपृक्तान्न
भोजन इति बलवदनिष्टानुबंधितया ज्ञायमाने स्वचिकीर्षाविनैवान्येच्छाधीनकृतितो जायमाने बलवद
निष्टानुबंधिनि मधुसंपृक्तविषभोजने इत्यर्थः। बलवदित्यादिकं बलवदनिष्टाननुबंधित्वं अग्रेतनेन।

लक्षणाग्रे वक्ष्यमाणे· विरुध्येतेति· तदानीं तज्जन्यसुखेच्छानुत्पत्तेस्तदानींतनेच्छाविषयसाधनत्वरूपहेतुघटक
५२ दलाभावादेव व्यभिचाराप्रसक्तेरिति भावः इदं चोपाये बलवदनिष्टाननुबंधित्वज्ञानं तज्जन्यफलेपीच्छाविरोधीति
52 मतविशेषाभिप्रायेण· वस्तुतः समानविषयकचिकीर्षायामेव तज्ज्ञानं प्रतिबंधकं। ननु स्वविषयजन्यफलेच्छा
यामपि प्रमाणाभावादिति ध्येयं· मधुसंपृक्तविषभोजने बलवदनिष्टसाधनत्वग्रहदशायां तज्जन्यसुखेच्छा
विरहेपि इदानींतनेच्छाविषयत्वयोग्यतास्त्येव सा च तादृशेच्छाविषयतावच्छेदकं रूपं· तदेव च हेतुस्थेष्टप
देन विवक्षितं अतो न तद्विशेषणवैयर्थ्यमिति समाधत्ते इष्टपदस्येति· इच्छा इदानींतनेच्छा॰ तद्विषयतावच्छे
दकं तद्विषयताप्रयोजकरूपं तच्च तादृशरूपं च असिद्धेति सुखविशेषणं मिलितेति विषसहितेत्यर्थः· मधुभो
जनत्वमिति मधुविषयोर्गलाधःसंयोगस्य भेदेपि तदनुकूलव्यापारस्यकेच्चेष्टादेरैक्यात्तदात्मकैकभोजन
मात्रस्योभयभोजनत्वमिति भावः· एवं च मिलितभोजनजन्यसुखेपि इष्टतावच्छेदकप्रविष्टमधुभोजनजन्य
सुखत्वमस्तीति निदर्शितं तद्घटकदलांतरसत्वमपि दर्शयति असिद्धत्वं चेति तज्जन्यसुख इति शेषः· तथा चो
पदर्शितमधुविषसंपृक्तान्नभोजने। तदानीमिच्छाविषयतावच्छेदकावच्छिन्नसाधनत्वसत्वेन व्यभिचा

रथसंक्षिरस्यैवेति नाग्रे तन विशेषणप्रक्षेपविरोध इति भावः। नचैवमपि वलवदनिष्टासाधनेनत्साधन
त्वमत्र मविषये निरुक्तेष्टसाधनताश्रयनांतरीयकभोजनादौ वलवदित्यादिविशेषणेनापि व्यभिचारो दुर्वार
इति नांतरीयकान्यत्वविशेषणोपादानेन वलवदिति विशेषणवैयर्थ्यंतादवस्थ्यमिति वाच्यं पूर्ववद्वलवद
निष्टाननुबंधिनांतरीयकान्यत्वविशेषणोपादानेन सर्वसामंजस्यात् इष्टसाधनत्वानिवेशे यत्र यत्र व्यभि
चारो दर्शितस्तत्तद्भोजनादौ तत्रेष्टसाधनत्वस्य निरुक्तरूपत्वेपि न व्यभिचार इति दर्शयति नचेति असिद्ध
त्वमित्यनेनसंबंधः असिद्धत्वमित्यस्यतदेत्यादि तथा च तदानीमसिद्धत्वघटितेच्छाविषयतावच्छेदकरू
पस्य नांतरीमकतत्तत्पुरुषीयभोजनजन्यसुखेऽसत्वेन तादृशासुखसाधनेपि हेत्वभावान्न व्यभिचारः एत
दर्थमेव निरुक्तरूपोऽसिद्धत्वांतर्भावः इति भावः केवलविषभक्षणे वलवदनिष्टसाधनत्वे ज्ञायमाने वल
वदनिष्टाननुबंधित्वविशेषणेनैव निरुक्तसाधनत्वविशेषणेनापि वारणं संभवतीति दर्शयति नच विष
भक्षणइति विषभक्षणे विषभक्षणजन्यसुखेच्छाविषयतावच्छेदकरूपेनेत्यन्वयः। तत्र हेतुगर्भविशेष
णमाह अनिष्टसंवलननियत इति अनिष्टसंवलितत्वेन ज्ञायमान इत्यर्थः। इच्छाविरोध नियमेनेति इच्छावि

षयत्वाभावनियमेनेत्यर्थः। तथा च विषभोजनत्वावच्छेदेन दुःखविशेषसाधनताग्रहदशायां तज्जन्यसुखे
५२ वलवदनिष्टसंवलननियमग्रहे विषभक्षणजन्यसुखत्वेनेदानीं तन्नेच्छाविषयतावच्छेदकरूपमिति भा
53 वः। मधुविषसंपृक्तान्नभोजनजन्यसुखे मिलितभोजनजन्यसुखत्वस्येच्छाविषयतानवच्छेदकत्वेपि म
धुभोजनजन्यसुखत्वस्य तथात्वं निष्प्रत्यूहमिति दर्शयति न चेति अनिष्टेति। अनिष्टसाधनेत्यर्थः। विषभ
क्षणसंवलननियतं नेत्यन्वयः। अत इति मधुभोजनजन्यसुखस्यानिष्टसंवलननियतत्वेनाग्रहादिति
शेषः। मधुभोजनत्वं तज्जन्यसुखत्वं सुखत्वेनेति न तु केवलमधुभोजनजन्यसुखत्वेनेति शेषः। तथा च मि
लितभोजनजन्यसुखसाधारणं रूपं नेच्छाविषयतावच्छेदकमिति भावः। स्यतः पुरुषार्थत्वेति केवलमधुभो
जनजन्यसुखत्वावच्छिन्नस्य स्वतन्त्रेष्टत्वानुपपत्तेरिति भावः। इष्टोत्पत्तौ तद्रूपावच्छिन्नविषयकेच्छायां दुःखासं
भेदापेक्षणात्। तादृशेच्छाविषयतावच्छेदके नियमतः प्रविष्टस्य दुःखासंभेदस्य ज्ञानापेक्षणात्। यत्प्रकारक
ज्ञानसत्त्वे तत्प्रकारकेच्छायां अन्यज्ञानापेक्षा नास्ति तदवच्छिन्नस्यैव स्वतन्त्रेष्टत्वादिति भावः। इदमत्रावधेयं
वलवदनिष्टानुवंधित्वाग्रहमाणे मिलितभोजनजन्यसुखे तादृशसुखत्वेनानिष्टसंवलननियमग्र

हातादृशरूपेणचेदिष्टानजायतेतथापिमधुभोजनजन्यसुखत्वादिनाइष्टोत्पत्तेरभ्युपगमेनतदिष्टायां
केवलमधुभोजनजन्यसुखस्यैवमिलितभोजनजन्यसुखस्यापिमधुभोजनजन्यसुखत्वप्रकारेणइष्टाविषय
त्वेऽविरोधात्यथाश्रुतेष्टाविषयत्वरूपेष्टत्वनिवेशेपिवलवदित्यादिविशेषणसार्थक्यसंभवइति॥अतएवेति॥
मिलितभोजनस्यापुष्करीत्याइष्टसाधनत्वादेवेत्यर्थः।अन्येपिनैयायिकाअपि॥वलवदनिष्टाननुवंधित्वेतद
ननुवंधित्वप्रकारकत्वरूपविशेषणं॥अन्यथामधुविषसंपृक्तान्नभोजनेवलवदनिष्टसाधनत्वेनगृह्य
माणेतदानीतनेष्टाविषयसाधनत्वविरहेइष्टसाधनत्वमात्रेणैवेति॥इष्टसाधनत्वप्रकारकत्वरूपविशे
षणमात्रप्रवेशेनैवमधुविषसंपृक्तान्नादिवारणेमधुविषसंपृक्तान्नभोजनादिप्रवृत्तिवारणे॥तत्रापित
न्मतसिद्धप्रवर्तकतावच्छेदकशरीरेपिवलवदित्यादीतिइत्यादिविशेषणविषयकत्वमित्यर्थः।ननुदुः
खरूपानिष्टेवलवत्वंदुर्वचंनतावदुत्कटत्वरूपजातिविशेषःयादृशोत्कटदुःखाश्रयनरकादिसाधनतयाज्ञा
तेएवास्तिकस्यनप्रवृत्तिःतत्साधनतयाज्ञानएवरागांधस्यप्रवृत्तेस्तदनिवर्हितइत्याशंक्यतत्रस्वरूपी
यतत्तत्कालीनवलवद्द्वेषविषयत्वमेवानिष्टेवलवत्वमितितिसमाधत्तेबलवदिति इष्टेवलवत्वंकिमित्या

५४ कांक्षायामाह द्वेषे चेति जातिविशेष इति उत्कटत्वरूपजातिरित्यर्थः रागांधस्योत्कटदुःखजनकप्रवृत्ति
मुपपादयति अत एवेति॰ रागांधस्येति अपकृष्टसुखेपि उत्कटरागेणांधतुल्यस्य तादृशसुखजनक
54 निषिद्धकर्मणि नरकसाधनत्वज्ञानवतोपि तज्ज्ञानरहिततुल्यस्येत्यर्थः।। तादृशो द्वेषः उत्कटो द्वेषो जा
यत इति शेषः।। तद्धेतौ नरकादिहेतुभूतनिषिद्धादिकर्मणीत्यर्थः इदमेवोक्तप्रवृत्तिसंपादनमेव अन्य
था तदनिवेशे रागारागाभ्यामिति तत्तन्निषिद्धकर्मजन्यफले विभिन्नकाले उत्कटानुत्कटेच्छाबलेनेत्य
र्थः।। तद्दुःखे तज्जन्यदुःखे द्वेषातिशयानतिशयदर्शनात्॰ यो भिन्नकालीनद्वेषस्तत्र बलवत्त्वाबलत्वद
र्शनादित्यर्थः।। असिद्धो हेतुः स्यादिति यदा प्रवृत्तिस्तदानींतननकृतिसाध्यत्वसाधको हेतुः पक्षे तत्रोत्क
र्षेण्यसिद्धः स्यादित्यर्थः। कदापीति तात्त्विकतादृशोत्पन्नबलवद्द्वेषविषयदुःखजनकत्वसत्त्वादित्यर्थः
।। तथा च प्रवर्त्तकानुमित्यनिर्वाहेण रागांधतादृशायामपि न तत्र प्रवर्त्तेतेति शेषः।। भिन्नपुरुषीयतत्काली
नबलवद्द्वेषविषयदुःखसाधने रागांधस्य प्रवर्त्तकज्ञाननिर्वाहाय पुरुषनिवेशो बोध्यः।। द्वेषे बलवत्त्व
विशेषणमधिकमिति यदा पत्र प्रवृत्तिस्तदा तज्जन्यदुःखे द्वेषमात्रस्यैवानभ्युपगमेन द्वेषे बलवत्त्ववि ५४

शेषणमंतरेणापि हेतुसिद्ध्या तद्विशेषणं व्यर्थमित्यर्थः। दुःखमात्रस्यैवेति दुःखत्वेन ज्ञानदशायां तद्वि
षयस्य द्वेषविषयतानियमेनेत्यर्थः। असिद्धिवारकत्वादिति। नांतरीयकदुःखजनकत्वेन गृह्यमाणेपा
कादावपि तदानींतनानतिशयितद्वेषविषयदुःखजनकत्वेन प्रसक्त्या यागे हेतुसिद्धेर्वारणार्थत्वादित्य
र्थः। ननु असक्तोऽद्वेषश्च भुंक्ते इति श्रुत्योत्पन्नतत्त्वज्ञानस्य रागद्वेषराहित्येपि सुखदुःखभोगबोधनात्त।
द्विरोधेन दुःखस्य ज्ञानेऽवश्यं तत्र द्वेष इति नियमासंभव इत्याशंकां निरस्यति योगिनामपीति रागद्वेषसं
भवात्। रागद्वेषोत्पत्तेरवश्याभ्युपेयत्वात् अन्यथा तदनुपगमे प्रवृत्तिनिवृत्त्योरसंभवापत्तेरिति। योगि
नामपि सुखसाधने क्रियाविशेषे प्रवृत्तेर्दुःखसाधने च निवृत्तेः पुराणादिसिद्धाया अनिर्वाहापत्तेस्तयो
रागद्वेषरूपकारणं विनाऽभावादित्यर्थः। उक्तश्रुतिविरोधं परिहरति नचेति। अस्मदादिसाधारणे
ति। अस्मदाद्युक्तरागद्वेषतुल्येत्यर्थः। अन्यथेत्यस्यैव विवरणं दुःखमात्रस्यैव द्वेषाविषयत्व इति दुः
खत्वज्ञानमात्रस्य द्वेषविषयत्वप्रयोजकत्वानुपगम इत्यर्थः। दुःखस्य दुःखत्वावच्छिन्नस्य सोपाधिद्वे
षविषयत्व इतरसापेक्षद्वेषविषयत्वे स्वतो हेयत्वविरह इति यावत् तदभावस्य दुःखत्वावच्छिन्नाभाव

स्यनिरुपाधिपुरुषार्थत्वेतिस्वतःपुरुषार्थत्वेत्यर्थः॰ हान्यापत्तेरितिस्वतोहेयंपत्तस्येवाभावस्यस्वतःपुरुषा
५५ र्थत्वमितिनियमादितिभावः।प्रकारांतरेणहेतोर्बलवदित्यादिविशेषणंसार्थकयन्तांमतमुपन्यस्यनिर
55 स्यतिएवंचेति॰यथाश्रुतेनैवसाध्यविशेषणेनतराप्रवेशेनैवसामंजस्येहेतोर्बलवदित्यादिविशेषणस्य
सार्थक्येसति॰इत्यपव्याख्यानमित्यग्रिमेणान्वयः।साध्येपीतिबलवदनिष्टाननुबंधित्वविशिष्टस्यकृति
साध्यत्वस्यसाध्यत्वमुपेयमित्यर्थः तथासतिहेतावपितद्विशेषणस्यावैयर्थ्यं हेतौतदनिवेशेमधुविषसं
पृक्तान्नभोजनेबलवदनिष्टासाधनत्वभ्रमेणस्वेष्टाधीनकृतिसाध्येपिबलवदित्यादिविशेषणगर्भसा
ध्यासत्वेतदानीतनेष्टविषयसाधनत्वसत्वेनव्यभिचारप्रसंगादितिभावः॰माभूत्प्रक्षालनाद्धीति
न्यायेनहेतुविशेषणसार्थक्यायसाध्येविशेषणप्रक्षेपः॰तथापिप्रवर्त्तकज्ञानसंपन्नयेसाध्येबलवदि
त्यादिविशेषणप्रवेशस्यावश्यकत्वेनहेतावुक्तविशेषणप्रवेशस्योक्तप्रयासमंतरेणैवसार्थक्यमित्या
शंकांनिरस्यतिनन्वेति॰अप्रवृत्त्याप्रवृत्त्यनुत्पादेनतदननुबंधिकृतिसाध्यतायाःबलवदनिष्टाननु
बंधित्वसहितकृतिसाध्यतायाःप्रवर्त्तकत्वेनप्रवर्त्तकज्ञानविषयतयोपपत्तेर्नविशेषणप्रवेशः॰बलव ५५

दित्यादिप्रवेशः। तावतापीति। उक्तज्ञानदशायां प्रवृत्त्यनुत्पादानुरोधेनापि मात्रेत्यनेन बलवदनिष्टाननु
बंधित्वज्ञानहेतुताव्यवच्छेदः। ननु जनकज्ञानमित्यादिनियमात्तज्ज्ञानहेतुत्वमावश्यकमित्यत आह
तदननुबंधित्वज्ञानस्येति इष्टसाधनताज्ञानवदित्यादिः। तैः प्रभाकरैः। अनंगीकारादिति तथा च तत्वे
न हेतुतायाविचारसहत्वेपि तदनभ्युपगमस्तेषां मतमनवलंब्य तदभ्युपगतसाध्ये विशेषणप्रवेशोऽप्युक्त
एवेति भावः। पुत्तंमंतरेण तदननुबंधित्वज्ञानस्य प्रवर्त्तकत्वं निराकुर्वतां मतं दूषयितुमुपन्यस्यति य
त्विति ताद्दशेति बलवदनिष्टाननुबंधित्वसहितेत्यर्थः। तज्जन्येष्टपरतयेति यत्कर्मणि प्रवर्त्तकं एत
ज्ज्ञानं तज्जन्येष्टपरतयेत्यर्थः। अप्रसिद्धेः। तन्मते नित्यकर्मजन्येष्टाप्रसिद्धेः इति अतः न हेतुः संभव
तीति शेषः। इष्टोत्पत्तीति। स्वजन्येष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकं यत्तदन्यत्वज्ञानस्ये
त्यर्थः। नित्येपि संभवादिति भेदप्रतियोगिन एव स्वपदेनोपादेयतया तादृशं यत्स्वं मधुविषसंपृक्त
विषभोजनादि प्रसिद्धं तद्भिन्नत्वस्य निष्फलेपि नित्ये सत्वादित्यर्थः। इदमुपलक्षणं अनिष्टबलवत्वं
त्वद्द्वेषविषयत्वमेव। तत्तु स्वजन्येष्टोत्पत्त्यनान्तरीयकत्वं तस्य दुर्वचतायावक्ष्यमाणत्वात् तथा च

५६ नाप्रसिद्धेः प्रसक्तिरित्यपि वोध्यं॰ तर्हि कथं तज्ज्ञानमहेतुः कथं वा तस्य साध्याप्रवेश इत्यत आह तथा चेति
तद्धेतोरिति वलवदनिष्टाननुवंधित्वज्ञाने प्रवृत्तिजनकयोगीकृतेपि प्रतिवंधकाभावतया तद्धेतुभूतस्य वलव
58 दनिष्टाननुवंधित्वज्ञानाभावस्य प्रवृत्तिनियतपूर्ववर्तितायाउभयवादिसिद्धत्वेन तदननुवंधित्वज्ञानस्य तथात्वे च नो
भयवादिसिद्धमिति कल्पनालाघवादुक्ताभाव एव हेतुर्न तु तज्ज्ञानमिति साध्ये तद्विशेषणस्यानावश्यकत्वमित्यर्थः।
वलवदनिष्टसाधनत्वज्ञानस्य प्रतिवंधकत्वमंतरेणापि तन्मते तज्ज्ञानदशायां प्रवृत्तिं वारयितुं शक्तत्वादित्युक्त
लिंगकेति वलवदनिष्टसाधनत्वविशिष्टेष्टसाधनतालिंगकेत्यर्थः साधनत्वस्य साध्यत्वेन विरोधेन एकज्ञान
विषयत्वासंभवेप्येवेष्टसाधनताविषयकत्वस्य जनकज्ञानाविशेषणत्वे बीजं वलवदनिष्टाननुवंधित्वस्य च सा
ध्यत्वेन न विरोध इति जनकतावच्छेदके इष्टसाधनताज्ञाने इव जनकज्ञानेपि विशेषणत्वसंभवाद्धि निगमनावि
रहात्प्रवर्त्तकज्ञानविषयत्वमपि तस्य दुर्वारं इति तेषां तज्ज्ञानाप्रवर्त्तकत्वसिद्धांत एव साध्ये तदप्रवेशवीजमित्य
वधेयं। ननु वलवदनिष्टाननुवंधित्वविशिष्टेष्टसाधनतालिंगककार्यताज्ञानं काम्यगोचरप्रवृत्तावेव हे
तुर्न तु निष्फलसंध्यावंदनादिप्रवृत्तौ॰ तत्र शोनादिलिंगककार्यताज्ञानस्यैव तन्मते हेतुत्वात् तथा च तत्र

बलवदनिष्टसाधनत्वग्रहदशायां प्रवृत्तेर्नोक्तलिंगकृतिसाध्यताज्ञानविरहेणशक्यवारणेत्याशंकां नि
राकरोति नचेति· निषेधेत दनुबंधित्वज्ञानदशायां प्रवृत्तिवारणानुरोधात्तदभावे हेतुत्वमावश्यकमितिनेत्य
र्थः तत्रापि नित्यपक्षककार्यतानुमानेपिअस्यस्वीयबलवदनिष्टाननुबंधित्वसंध्यावंदनादिकत्वस्यलिंग
विशेषणत्वात् शौचादिमत्वरूपाहेतुविशेषणत्वात्· तत्र तद्विशेषणस्यसार्थक्यमुपपादयतिउक्तसाध्यस्येति·
इदानींतनमत्कृतिघटितसाध्यस्येत्यर्थः· तादृशज्ञानकाल इति निषेधेपिकृत्यनुत्पन्नेरितिशेषः· बाधे नतत्का
लीनशौचादिमत्त्वसत्त्वेन· व्यभिचारइति प्रसक्तेत्यादिः ननुबलवदनिष्टाननुबंधित्ववत्कृतिविशेषणंस्वेच्छा
धीनत्वमपि प्रवर्त्तकज्ञानाविषयइतितस्यापिसाध्यप्रवेशोऽयुक्तः तथाच नांतरीयके व्यभिचारवारणायउपात्ते
ष्टसाधनत्वादिदलवैयर्थ्यमित्याशंक्यनिराचष्टेनचेति कृतित्वेनैवेत्येवकारेणस्वेच्छाधीनत्वव्यवच्छेदः। कृति
विशेषधीः वस्तुगत्यास्वेच्छाधीनायाकृतिस्तस्याअपिधीः· साध्यमितिउचितमितिशेषः· ननुस्वेच्छाधीनकृते
रनुमितौभानंविनाप्रवर्त्तकत्वानसंभवतीतिस्वेच्छाधीनत्वस्यकृतिविशेषणस्यप्रवेशआवश्यकइत्यतआ
ह विशेषेतिविशेषकृतेः स्वेच्छाधीनकृतेर्विषयत्वेपि प्रवर्तकज्ञानविषयतयोपेयत्वेपिकृतित्वमेवशुद्धं

५७ कृतित्वंव्यापकतावच्छेदकंतदवच्छेदककोटिप्रविष्टंसंभवतीतिशेषः तथाचस्वत्वपिपक्षीभूतप्रवृत्तिविषयपाके
न्यकृतिसाध्यत्ववाधेनस्वेच्छाधीनकृतिसाध्यतायाएवपक्षधर्मताबलेनभानसंभवइतिभावः सत्वंतव्यभिचा
67 रःविशेष्यदलेवलवदिष्टाद्यविशेषणदलंविनाकृतस्यापिहेतुस्तत्वेतदलस्यव्यभिचारवारकत्वस्यर्थः विशेषणा
न्तरोपादानंहेतोदलान्तरोपादानंसार्थकंभवेदितिशेषः कामनालिंगकेतिकाम्यसाधनतालिंगककार्यता
ज्ञानरूपप्रवर्त्तकज्ञाननिर्वाहानुरोधेनेत्यर्थः उक्तसाध्येतिस्वेच्छाधीनत्वगर्भसाध्येत्यर्थः अन्यथाहेतुस्थविशे
ष्यस्यवैयर्थ्येनपरित्यागेनुमितेरुक्तलिंगकत्वाभावेनअप्रवर्त्तकतापातात्व्यापकेव्यर्थतायाअदोषत्वादि
तिभावः शुद्धकृतित्वप्रकारकत्वंप्रवर्त्तकताप्रयोजकंसाध्येकृतौविशेषणान्तरप्रवेशेतु इतिनिर्वाहइत्यभिमा
नेशुद्धकृतित्वप्रकारकमपिज्ञानंप्रवर्त्तकमस्तुनतुशुद्धकृतित्वान्यधर्मानवच्छिन्नप्रकारकत्वपर्यंततत्वे
नेत्रेअपितुकृतित्वप्रकारकत्वमेवतच्चाधिकभानेपिनिर्वहतीत्युक्त्वानिराकरोतिनहीतिसंभवतीत्यग्रिमे
णास्यसंबंधः कृतित्वेनकृतित्वप्रकारकत्वेनज्ञानेयत्प्रयोजकंयज्ज्ञानेप्रवर्त्तकेविशेषणान्तरप्रवेशाधिक
विशेषणावगाहनेप्रयोजकरूपाभावेफल्यात्प्रवर्त्तकतावच्छेदकधर्मस्यकृतित्वप्रकारकत्वस्याधिकंत्वि

त्यादिन्यायेनाहानेंविशेषणेंतर्भावेणस्वेष्टाचीनत्वस्यप्रवर्त्तकोक्तानुमितौविषयत्वेपितद्वगाहित्वपुर
स्कारेणनप्रयोजकतानप्रवर्त्तकताव्यभिचारादितितदनवगाहिनोपिज्ञानांतरात्प्रवृत्तेरितिभावः।गौरवा
च्चेत्यपिबोध्यं।द्वितीयहेतुकोदाहरणंमूलेनप्रयुक्तमितिन्यूनतापरिहारायाहोपलक्षणमितिएतत्प्रथम
हेतुकोदाहरणप्रदर्शनं।मूलेपस्वपदिष्टसाधनमितियत्कर्मयस्यपुंसोयत्कालीनेष्टाविषयसाधनमित्य
र्थः।यत्कृतिंविनायद्दानसिद्ध्यतियत्पुरुषीययद्दानंकृतिव्यतिरेकेणसदित्यर्थः।समानाधिकरणसंबं
धेनएकविशिष्टापरस्ययत्रहेतुतातत्रमिथोविशेषणविशेष्यभावानापन्नोभयविशेषिताधिकरणेसा
ध्यवत्वप्रदर्शकमप्युदाहरणंसांप्रदायिकेउभयविशेषिताधिकरणेसाध्यवत्वनियमग्रहेपिएकविशि
ष्टापराधिकरणेसाध्याभावशंकानिवृत्तेरित्यभिप्रायेणविशिष्टहेतुकोक्तानुमानेनतदुदाहरणसंगतिः।व
स्तुतस्तुमिथोविशेष्यविशेषणभावानापन्नयोरेकत्रद्वयमितिरीत्यापन्नविशेषणतापन्नयोरुभयोर्हेतु
त्वाभिप्रायेणैवैतद्व्याप्तिप्रदर्शनम्।नचविशेष्यविशेषणभावानापन्नयोर्हेतुताबोधकाययवासंभवः
अतएवगुणकर्मान्यत्वेसतिसत्तादित्यादौसमन्यपर्यावरुद्धविशेषणेपंचम्यर्थान्वयासंभवेनार्थिकत्व

माशंक्य गुणकर्मान्यत्वसामानाधिकरण्यावच्छिन्नसत्त्वे पंचम्यर्थान्वयोपगमेनावपवग्रंथे मणिकृता समाहित
५८ मिति वाच्यं स्वार्थानुमाने उभयत्वानवच्छिन्नयोरप्युभयोर्मिलितयोर्हेतुतासंभवात्· विषयांतरमादाय पुविव
ना दमानाँ मभिमतनिर्वाहकपुरुषांतरीयप्रवर्तकानुपक्रम्य प्रतिज्ञाहेतूदाहरणसमानाकारवाक्यप्रयोगस्य
कीदृशपक्षे कीदृशहेतोः कीदृशसाध्यं प्रति कीदृशव्याप्त्यागमकतया स्वार्थानुमितिनिर्वाहकत्वाकांक्षानिव
त्तिमात्रार्थत्वात् तत्प्रयोगमंतरेणापि· हेत्वादिज्ञापनसंभवेन मिलितुहेतुताबोधकपंचमीप्रयोगासंभवस्या
दोषत्वात् असिद्धस्येष्टसाधनत्वाभावादिति ग्रंथं व्यभिचारशंकायाअसंभवप्रदर्शनपरतया व्याख्यातुम
वतारयति नन्विति मत्कृतिव्यतिरेकासदिति तादृशासत्त्वरूपहेतुमद्यपीत्यर्थः· अत्यंतासदिति सर्वदेवा
सदित्यर्थः· कुतः कृतिसाध्यतेति कृतिसाध्यमपि न भवतीत्यर्थः· इति शंकासंभवेनानुमानं कथं प्रवर्त्तेत
इति शेषः· इत्यतः इत्याशंकातः· यद्यपि अत्यंतमसन्निमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वमसंभ
वि प्रतियोग्यप्रसिद्ध्या व्यतिरेकस्याप्रसिद्धेः एवं मत्कृत्यनधीनसत्त्वविरहस्य सत्यं तार्थत्वे तस्यापि तत्रा
संभवः सत्येवाधिकरणेऽभावनिरूपणात् तथाप्येतादृशविशेषादर्शनदशायां शंकासंभवेन प्रवृत्य ५८

निर्वाह इति प्रकारांतरेण तादृशशंकाया असंभवप्रदर्शनपरत्वौचित्यान्नासंगतिः हेतुत्वरूपविशेषे
ति इष्टसाधनत्वरूपदलोत्तरघटकहेतुत्वात्मकसिद्धत्वव्याप्यधर्मेत्यर्थः॥ सिद्धत्वे सिद्धे विशिष्टहेतुम
त्तया निश्चयविषये कालसत्वेन निश्चिते साधनत्वं यद्विकालसत्वगर्भं तदा तन्निश्चय एव सत्वनिश्चय
इति वोध्यं विशेषनिषेधात् कृत्यनधीनसत्वरूपसत्वविशेषाभावग्रहात् तादृशाभाव एव सत्वं तार्थे इत्या
शयेनेदं परिशिष्टं कृतिसाध्यत्वं एकविशेषाभाववत्सहितसामान्यवत्त्वलभ्यापरविशेषरूपकृत्यधीनस
त्वात्मकं कृतिसाध्यत्वं साध्यं पर्यवस्यति हेतुमत्ता निश्चयविषये सर्वत्र निश्चितं भवतीति न पाचनव्यभिचारशं
केति भावः। कृतिसाध्यतोत्तीर्णे इत्यस्यातीतपाक इत्येतत्सामानाधिकरण्येन व्यभिचारप्रसंजकसाध्यासत्व
प्रदर्शकतया सार्थकत्वेपि वर्त्तमानपाकेप्यतीतपाक इव व्यभिचारप्रसक्तेस्तदनिराकरणे मूलस्य न्यून
तास्यादिति तस्य वर्त्तमानपाकार्थकतामाह कृतीतीति इदानीतन कृतिसाध्यत्वरूपप्रकृतसाध्यस्य वा
प्तेतस्यापि कृतिसाध्यत्वादित्यनेन साध्यसत्वमभिधाय व्यभिचारवारणात् संगतिः सामान्यव्याप्त्यभिप्रा
येण यत्कालघटितहेतोस्तत्र सत्वं तत्कालीनकृतिसाध्यत्वरूपसाध्यवत्तामभिधाय व्यभिचारवारणस्य

संगमनेदृष्टसाधनत्वस्वरूपहेत्वभावाभिधानस्याग्रिमस्य विरोधः। अतीतादिकालीनेष्टाघटितहेतोरपि
५९ तत्रसत्वादितिसमाधानद्वयं संगमयितुं वितर्कयति सामान्यव्याप्ताविति यत्तस्यदोपात्तातीतादिकाल
59 घटितहेतुसाध्ययोर्व्याप्तावित्यर्थः विशेषव्याप्तौ एतत्कालागर्भहेतुसाध्ययोर्व्याप्तौ॰ एतेनयूत्वतत्त्वान
नुगमेन विशेषव्याप्तिकूटस्यैव सामान्यव्याप्तित्वेपि न कल्पमेदासंगतिः। सामान्येतीतितथाच सामा
न्यतस्तस्यापीत्यादिमूलस्य तस्यातीतादिपाकस्य सामान्यवाचितस्यदोपात्तातीतादिकालीनकृतिसा
ध्यत्वस्वरूपसाध्यसत्वादित्यर्थः। इष्टसाधनत्वाभावादिति मूलस्य चेदानींतनेष्टाविषयफलोपधाय
कत्वाभावादित्यर्थः॰ तावताहेत्वभावमात्रेण व्यभिचारवारणमालोककृत्स्फुटयति तथाचेति मूलेदृष्ट
साधनत्वाभावादित्यंतमुपलक्षणं॰ इदानींतनकृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वस्वरूपसत्वे
तदलाभावोपिबोध्यः मूलेतएवेति बलवदित्यादिहेतुविशेषणादेव॰ सरोवगाहनेसरसीयतोयसं
बंधे॰ इदानींतनकृतिव्यतिरेकेणसत्यपि संतापशांतिरूपेष्टसाधनेपीतिशेषः। नप्रवर्त्तेतइत्यत्रहे
तुमाहेष्टेति लिंगाभावेनेति अल्पायासससाध्योपायतः स्वप्रयत्नमंतरेणैव वाद्दृष्टनिर्वाहस्यप्रतिसं ५९

ध्यानेस्वकृतिजन्येनांतरीयकेपि दुःखेबलवद्द्वेषोत्पत्त्याप्रकृतेसरोवगाहननांतरीयकश्रमेबलव
द्द्वेषोदयात्सरोवगाहनेबलवद्द्वेषविषयासाधनत्वघटितहेत्वभावेनेत्यर्थः कृतिसाध्यताज्ञानाभा
वात्· उक्तलिंगज्ञानजन्यकृतिसाध्यताज्ञानाभावात्· सनसंभवतितोपसंबंधोननिर्वहतीत्यर्थः।
तदाप्रवर्त्ततइतिनञ्जन्येश्रमेबलवद्द्वेषानुत्पत्त्योक्तलिंगज्ञानसंभवादितिभावः उक्तस्थलेसरोवगा
हनेप्रवृत्त्यनुत्पत्तेस्तदानींतनकृतिसाध्यत्वरूपसाध्याभावेप्युक्तहेतोर्व्यभिचारोपिनसंभवतिइ
त्यत्रापिमूलतात्पर्यमितिनप्रवर्त्ततइत्यनंतरंनवाव्यभिचारइतिपूरणीयमित्याशयेनालोककृद्व्या
चष्टेयतएवेतियतएवबलवदित्यादिविशेषणमितिपाठःमत्कृतिव्यतिरेकासदितिविशेषणमि
तिपाठोपिक्वचित्· नचसयथाश्रुतोनसंगच्छते· सरोवगाहनेइदानींतनमत्कृतिंविनासत्त्वाव्याघा
तादितिवाच्यं· इदानींतनमत्कृतेर्यत्रफलोपधायकतातस्यैवाभावेअस्याअभावस्यप्रयोजकतया
सरोवगाहनाभावस्यफलानुपधायकेदानींतनकृत्यभावाप्रयुक्तत्वात्· कृतिसाध्यताज्ञानाभावा
दित्यंतोहेतुःयद्यपिप्रवृत्त्यभावएवनतुव्यभिचाराभावेऽतोव्यभिचाराभावहेत्वनुक्तेर्मूलस्यन्यून

६०
60

तालिंगाभावे नेत्यनेन लिंगाभावे कृतिसाध्यताज्ञानाभावहेतुतामात्रकथनात्. न चात एवेत्यनेनैवाव्य
भिचारे तादृशविशेषणोपादानहेतुत्वाभिधानान्न्यूनतेति वाच्यं. तादृशविशेषणोपादानस्याप्रवृत्तिप्र
योजकत्वमेव कुत इत्याकांक्षायां कृतिसाध्यताज्ञानाभावकथनवदव्यभिचाराभावप्रयोजकत्वमेव तस्य
कुत इत्याकांक्षाया अप्युदयात् व्यभिचारवारकतया लिंगाभावकथनस्याप्यौचित्यात्. तथापि कृति
साध्यताज्ञानाभावहेतुतयोपन्यस्तलिंगाभावे व्यभिचाराभावहेतुत्वं तस्यानुक्तमपि तस्य स्वत एव
लभ्यत इति न न्यूनतेति मिश्राभिप्रायः विशेष्यभागाभावात्. इष्टसाधनत्वाभावात्. न व्यभिचार इ
ति. न वाप्रवृत्तिरिति शेषः। अन्ये त्विति इष्टसाधनतास्थले हेतौ कार्यसाधनत्वं निवेशयतां मतं दूषय
ति मूले कार्यसाधनत्वमिति इदानीं तन स्वकृतिसाध्यफलसाधनत्वमित्यर्थः। एतन्मते इष्टसाध
धने चैत्यवंदनादौ स्वकर्तुरुद्देश्यफलाभावेन न कृतिसाध्यसाधनत्वं कर्तुरुद्देश्यफलस्यैव कृ
तिसाध्यत्वात्. तत्क्रियाध्वंसादेरतथात्वादिति न तत्र व्यभिचार इत्याशयः। हेत्वभावादिति उ
पायाभावादित्यर्थः। तथा च पाकादौ प्रवृत्तिपूर्वं कृतिसाध्यौदनादिरूपफलसाधनज्ञानासंभवे ६०

न्नतल्लिंगकानुमाननिर्वाह इति भावः। नचेत्यस्य तथेत्यनेन संबंधः। लाघवात्कारणतावच्छेद
कलाघवात्. तथा प्रवर्त्तकं तदा मानाभावेन प्रवृत्तिकालेऽप्रामाणिकत्वेन युगपदुपस्थित्यभावात्प्र
वृत्तिपूर्ववर्त्तितयाऽसिद्धत्वेनान्वयव्यतिरेकग्रहासंभवात् अन्वयव्यतिरेकग्रहविषयस्य लघु
गुरुरूपावच्छिन्नस्यैकतरस्य हेतुतायामेव लाघवस्य विनिगमकत्वादिति भावः। प्रवृत्तिपूर्वमुक्त
लिंगज्ञानघटितायाः कृतिसाध्यत्वानुमितिसामग्र्याः समवधानस्य तदानीं तन्न तदनुमितिरूपका
र्यमाननत्वमाशंक्य पूर्वं पक्षिपन्नसिद्धता इष्टलिंगज्ञानघटित तत्तत्कालीनप्रवृत्तिसामग्र्या अनुमिति
प्रतिबंधकत्वाभिधानमवतारयति आलोके नन्विति तदानीं प्रतिबंधकसद्भावबोधकशब्दात्साक्षात्सा
मग्र्यभावाल्लाभात्तत्परत्वं स्फुटयति तथाच्चेति मूले लिंगज्ञाने कृतिसाध्यत्वाप्रकाशे कृतिसाध्यत्वाविषय
कत्वेन तत्प्रकारकचिकीर्षायां कृतिसाध्यत्वप्रकारकेच्छायां लिंगज्ञानस्य हेतुत्वासिद्धेः इच्छायां समान
प्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वप्रकारकज्ञानहेतुताया आवश्यकत्वादिति भावः। अत्र
त्रैवेच्छानियमे आलोककृद्व्यभिचारमाशंकते नन्वेत्यादिना विसंवादिप्रवृत्तिस्थले इच्छाया इतिपु

क्तिगोचररजतत्वप्रकारकप्रवृत्तिजनकशुक्तिगोचरेच्छायाइत्यर्थः। अतथाभूतज्ञानस्य व्यावृत्तयेति रजतत्वप्र
६१ कारकज्ञानाजन्यत्वे इत्यर्थः। रजतत्वप्रकारकज्ञानं विसंवादितत्प्रकारकेच्छायां नकारणं अपि त्वसंसर्गाग्रहनि
ष्ठकारणतायामवच्छेदकमेवेति भावः वस्तुतो ज्ञायमानतद्धर्मासंसर्गाग्रहस्यागृहीतासंसर्गकतद्धर्म
61 ज्ञानस्य वा तद्धर्मप्रकारकप्रवृत्तिहेतुत्वमित्यत्र विनिगमनाविरहादुभयमेव हेतुरिति ध्येयं· तादृशज्ञानज
न्यत्वावच्छिन्नजन्यसाधारणसाध्योपगमेन व्यभिचारं वारयति यदीति तत्प्रकारकेति तद्विषयके इत्यर्थः·
तेन अन्यथेच्छा विषयशुक्त्याद्यगृहीतासंसर्गककिंचिद्रूपावच्छिन्नरजतत्वादिमुख्यविशेष्यकस्मरणा
द्यधीनतादृशरजतत्वादिविसंवादीच्छायां न व्यभिचारः। हेतुतावच्छेदकीभूतेति कारणतावच्छेदके इत्यर्थः
। रजतज्ञानाभावादिति रजतत्वज्ञानाभावप्रयुक्त इत्यर्थः· कारणतावच्छेदकविशिष्टाभावप्रयोज्यकार्या
नुत्पादे स्वविशिष्टाभावप्रयोजकस्वाभावकस्य कारणतावच्छेदकस्याप्यभावस्य प्रयोजकत्वादिति भा
वः। केवलहेतुमत्ताज्ञानस्य प्रवर्तकत्वे उक्तनियमो बाधकः कृतिसाध्यत्वानुमितिजनकव्याप्तिज्ञानसहि
तस्य तस्य हेतुत्वे तु कृतिसाध्यताविषयकव्याप्तिज्ञानाधीनतायाश्चिकीर्षायां सत्त्वेनोक्तनियमावलंबनेना ६१

नुमितिजनकज्ञानस्य प्रवर्त्तकतानिराकरणेन संभवतीति लिंगज्ञानस्यासिद्धविषयकतयाऽनासिद्धवि
षयकचिकीर्षाकारणत्वे संभवति परंतु असिद्धविषयकानुमितिरेवेति युक्तिर्बोध्या। मूले नस्य कृतिसा
ध्यत्वबाधादिति व्यापकबाधेन हेतुमत्त्वबाधोपि ध्वनितः। मानाभावेन पूर्वकाले ज्ञापकाभावेन असिद्धे
ज्ञानाभावात्. तथा च समानविशेष्यकपरामर्शाभावेनानागतपाकविशेष्यकानुमित्यनिर्वाह इति भावः
भविष्यद्वृत्तीति. वर्त्तमानप्रागभावप्रतियोगिवृत्तीत्यर्थः। सामान्यत्वादिति. कालत्वव्यापकावच्छेदक
स्वाश्रयध्वंसत्वकत्वात् पाकत्वगोत्वाघ[illegible]नरत्वादिति वा तदर्थः। तेन भविष्यत्स्ववृत्ति चैत्रत्वादिजातौ
कुलालविशेषजन्यतावच्छेदकघटवृत्तिजातिविशेषत्वादौ नित्यमात्रवृत्तिजातौ च न व्यभिचारः। केचि
त्तु पाकत्वव्यापकसामान्यत्वादित्यर्थः। तेनोक्तजातिषु न व्यभिचारः। दृष्टांते गोत्वपदं गोवृत्तिसत्तापरं।
तेन न दृष्टान्तस्य साधनवैकल्यमिति आहुः। मानमिति. एतदनुमानं पक्षधर्मताबलेन विधेयतावच्छेदक
प्रविष्टभविष्यत्पाकभासकमित्यर्थः। मानाभावेनेति. भविष्यत्गोत्वाश्रयभासकाभावेनेत्यर्थः। गोत्वे
पि गोत्वरूपदृष्टान्तेपि तस्याप्रसिद्धेः। भविष्यदाश्रयघटितसाध्यज्ञानासंभवात् तथा च व्याप्तिग्रहदुर्भि

त्वमितिभावः अत्रकत्वपाकत्वादेः पक्षतावच्छेदकत्वएवोक्तबाधादिदोषावसरोनान्यथेत्यभिमानेनशुद्ध
६२ पाकत्वस्यपक्षतावच्छेदकत्वंशंकतेपाकमात्रमितिविवक्षितार्थमबुद्ध्वामात्रार्थंवितर्क्य दूषयतिमात्रा
र्थइतिमात्रांतार्थःयद्दिपाकत्वमिति कथंचित्सुत्पत्त्येत्यादिःतदाबाधइतितस्यानित्यतयेत्यादिःसर्वपा
62 कपरत्वइतिसर्वपाकत्वरूपपक्षतावच्छेदकावच्छिन्नपरत्वइत्यर्थःमात्रपदस्यकार्त्स्न्यार्थकत्वादिति
भावः॥तस्यमात्रांतस्यपूर्वेणान्वितमेतत्सिद्धपाकभागेसर्वांतर्गतसिद्धपाकेषुबाधः॥साध्यहेत्वोराश्रया
सिद्धिः॥आश्रयस्याश्रयत्वस्यसाध्याश्रयतयानुमितिविषयत्वस्येतियावत्असिद्धिरनिर्वाहःपरामर्श
तदभावादितिभावः॥अतःपूर्वोक्तदोषस्यैवदुर्वारतेतिभावः॥विवक्षितार्थंप्रकाशयन्समाधानमा
शंकतेवर्त्तमानायुरासीनइतिवर्त्तमानत्वानीतत्वसर्वत्वाद्यविशेषितःशुद्धपाकत्वावच्छिन्नइत्यर्थः॥पा
कसामान्येचेतिपाकत्वावच्छेदेनेत्यर्थः इत्तिसाध्यत्वमितिउक्तहेतुसत्वंचेतिशेषः॥नबाधितमिति
नाप्युत्पन्नातेसिद्धस्यैवसत्वानादितिशेषः॥तथाचनोक्तदूषणानामवकाशइतिभावः॥पक्षत्वंअनुमितिवि
शेष्यत्वंसिद्धविषयत्वेसाध्यवत्वयातद्भूत्यसिद्धपाकविषयत्वोपगमेबाधात् बाधितविषयकत्व ६२

रूपान्यथाख्यातित्वप्रसंगात् भिन्नविषयकत्वेन इष्टाद्विषयाविषयकत्वेन॰ अनुत्पादकत्वात् अ
नुत्पादकत्वप्रसंगात् इष्टाप्रवृत्तिजनकज्ञानस्य समानविशेष्यकत्वं नापेक्षितमपि तु समानप्रकार
कत्वमिति न द्वितीयदूषणावसर इत्याशंकते कृतेति तर्हि तदर्थेपि यादृशमिति इदानीं न न कृत्युत्तर
मविष्यत्वरूपं ज्ञाने प्रवर्त्तकानुमितेर्नास्ति न भासते बाधितस्य तस्य भानेऽन्यथाख्यात्यापत्त्या इदानीं
तन कृतिस्वरूपयोग्यकत्वस्यैव साध्यतयोपगन्तव्यत्वादिति भावः। चिकीर्षोस्यादिति॰ उक्तनियममन
भ्युपगम्य स्वीक्रियेतेत्यर्थः॰ तथा चेति तादृशनियमानभ्युपगमे चेत्यर्थः। लिंगज्ञानमेवेति लिंगज्ञानस्य
चिकीर्षाप्रकारकृतिसाध्यताप्रकारकतयैवाप्रवर्त्तकतान्यवस्थापनादिति भावः। कृतिसाध्यत्वासंस
र्गाग्रहस्य प्रवर्त्तकत्वे काम्यसाधनत्वबाधग्रहदशायां प्रवृत्तिवारणाय काम्यसाधनत्वासंसर्गाग्रहाधी
नत्वे तादृशासंसर्गाग्रहविशेषणमुपगन्तव्यमित्याशयेनोक्तासंसर्गाग्रहे तद्विशेषणसत्त्वं दर्शयति स
चासंसर्गाग्रह इति अनुमितिस्थानीयतादृशसाध्यासंसर्गाग्रह इत्यर्थः। इष्टसाधनताज्ञानादिति
ज्ञायमानेष्टसाधनताघटिततल्लिंगासंसर्गाग्रहादित्यर्थः। सिद्धत्वे सिद्धत्वज्ञाने नुमानबाधात्प्र

वर्त्तककार्यत्वासंसर्गाग्रहस्यापि प्रवृत्तिनिर्वाहात्· शंकते स्मृतपाकस्येति तदेति पाकप्रवृत्तिपूर्वकाल इत्यर्थः
६३ सिद्धत्वग्रह इति यत्र स्वसामग्रीवलात् सिद्धत्वग्रहस्तदेत्यर्थः· न प्रवर्त्तेतेति· तथा चानुभवविरोध इति भावः
।सिद्धत्वेन तत्र ज्ञातेपि इदं यदि पाकत्वासंसर्गाग्रहं कथंचिदुपेति तदातिप्रसंगमाह सिद्धौदनोपीति पाकार्थी
63 नौदनपर्यन्तसिद्धिदशायामपीत्यर्थः· तन्नोपीति भोजनाधीनतृप्तिपर्यंतसिद्धिदशायामपीति अर्थः यदा
पाकादावेव सिद्धत्वं गृहीतं न त्वोदनादिरूपतत्फलसिद्धत्वं तदभिप्रायकमिदं अन्यथा फलेच्छाविरहेणेष्ट
साधनत्वलिंगाधीनकार्यत्वासंसर्गाग्रहविरहात् प्रवृत्त्यापत्तेर्दुर्घटत्वात्· अगत्या तत्र कार्यत्वासंसर्गाग्रहं
स्वीकुरुते तत्रेति तदसंसर्गाग्रहः कार्यत्वासंसर्गाग्रहः अतो न प्रवृत्तिरिति शेषः। अपि चेत्यादि दूषणांतर
मवतारयितुं सिद्धपाके तत्तत्पाकत्वावच्छेदेन सिद्धत्वग्रहदशायां पाकप्रवृत्त्यनुपपत्तिमुद्धरत्यालोके
नन्विति येन प्रकारेणेति· तत्तत्पाकत्वादिरूपययद्धर्मावच्छेदेनेत्यर्थः। असंसर्गाग्रहः सिद्धत्वज्ञाननि
वंधनकार्यत्वासंसर्गाग्रहः तेनासंसर्गाग्रहः तद्रूपावच्छेदेनासंसर्गाग्रहस्याभावः माभूत् तत्तदामास्तु सा
मान्येन प्रवृत्तिप्रकारीभूतशुद्धपाकत्वावच्छेदेन सकार्यत्वासंसर्गाग्रहस्याभावः स्यादिति संभवेदित्यर्थः।

तथा च शुद्धपाकत्वप्रकारकप्रवृत्तौ तस्यैव हेतुत्वान्न तस्या अनुपपत्तिरिति भावः। मूले विद्यमानासंसर्गाग्रहादि
ति चिकीर्षाविषयतावच्छेदकप्रकारेण ज्ञायमाने धर्मिणि विद्यमानस्य कार्यत्वासंसर्गस्याग्रहरूपाद्विसंवादि
त्वावच्छिन्नहेतोरित्यर्थः। प्रवृत्तिः स्यादिति चिकीर्षा स्यादित्यर्थः। प्रवृत्तेः कृतिसाध्यत्वाप्रकारकतया विद्यमाना
संसर्गाग्रहस्य प्रवृत्तेस्तदंशे विसंवादित्वाप्रयोजकत्वाद्यथाश्रुतासंगतेः। नन्विष्टविसंवादित्वं परमतेन क
स्यापि कार्यतावच्छेदकं। इष्टविषये विशेषणसंसर्गसत्वे यत्तएव तद्भावविसंवादिप्रवृत्तिस्तद्विशेष्यक
त्वावच्छिन्नतत्प्रकारकत्वरूपतन्निर्वाहितः कार्यतावच्छेदककोटौ विसंवादित्वमनिवेश्य प्रकारेण दिश्यसंस
र्गे विद्यमानत्वं चानिवेश्य तत्प्रकारकेच्छात्वावच्छिन्नं प्रति तद्धर्मासंसर्गाग्रहत्वेनैव विषयनिष्ठप्रत्यासत्त्या
हेतुत्वं कल्प्यते एवं सति संवादिप्रवृत्तिस्थले विशिष्टज्ञानकारणत्वविलयः स्यात् विसंवादिस्थलीयासंस
र्गाग्रहाभावहेतुतयैव तत्रासंसर्गाग्रहकाले चिकीर्षापत्तिवारणात् लाघवेपि विशिष्टज्ञानस्य हेतुत्वांतरे
कल्पनाया निष्फलत्वादिति चेत्कां क्षतिरित्याशंक्य दूषणांतरमवतारयति आलोकेनन्विति असंसर्गाग्र
हः असंसर्गाग्रह एव हेतुरस्तु ननु विशिष्टज्ञानं असंसर्गसत्वासत्वाभ्यामिति चिकीर्षाविषय इत्यादिः। प्र

वृत्तिसंवादविसंवादाविति। चिकीर्षादेः संवादो विसंवादश्चेत्यर्थः संसर्गस्यसत्वाभ्यां प्रवृत्तिसंवादविसंवादाभ्या
६४ 64 मित्यपि क्वचित्पाठः। अन्यधर्मिविशेष्यक समानप्रकारकज्ञानाद्धर्म्यंतरविशेष्यके छाद्यापत्ताविष्टापत्ति
माशंक्य निराकरोति नचैवमेवेति नातिप्रसंगः पाकत्वान्यधर्मप्रकारकज्ञानान्न् पाकत्वप्रकारकेछादेर्न
प्रसंगः तत्प्रकारकेति घटत्वप्रकारकेत्यर्थः। इच्छास्वभाव इति विशेष्यतासंबंधेन तत्प्रकारकेछां प्रतिस्वप्र
कारीभूततद्धर्माश्रयत्वसंबंधेन ज्ञानत्वेन हेतुत्वादिति भावः। शुक्तीछेति रजतत्वप्रकारकशुक्तीछेत्यर्थः। रजत
त्वधीर्न हेतुरिति नत्रेत्यादि अपितु भेदाग्रह इति तथा च ज्ञानजन्येछादेरेषस्वभाव इति न विसंवादीछानुपप
त्तिरिति भावः। विषयप्रत्यक्षस्यापि हेतुत्वादिति तथा च प्रवृत्तेर्ज्ञानजन्यतया तस्याउक्तस्वभावस्वीकारे वि
संवादिप्रवृत्त्यनुपपत्तेः जनकविषयतायाएव तद्विषयत्वप्रयोजकतायाआवश्यकत्वादिति भावः नचेति
नवेत्यर्थः। सिद्धवाधादिति सिद्धपाके उक्तसाध्यासत्वेन तद्व्याप्योक्तहेत्वभाववत्ताज्ञानेन हेतुमत्ताज्ञानप्र
तिवंधादित्यर्थः अनागतस्याज्ञानादिति अनागतयाकस्यसन्निकर्षविरहेण प्रत्यक्षात्मकहेतुमत्ताज्ञाने
मानासंभवादित्यर्थः पक्षधर्मताज्ञानदुर्भिक्षमिति तथा च कथमुक्तानुमाननिर्वाह इति शेषः पाकत्वा
६६

वच्छेदेनेति पाकत्वप्रकारेण तत्सामानाधिकरण्यमात्रावगाहिसुक्ते हेतुमत्त्वज्ञानादित्यर्थः॥ समानप्रकारकज्ञा
नस्येति तत्प्रकारेण सामानाधिकरण्यमात्रावगाहि विशिष्टबुद्धौ शुद्धतत्प्रकारावच्छेदेन विपरीतज्ञानस्यैवे
त्यर्थः विशेषत इति तत्तत्पाकत्वरूपेणेत्यर्थः सामान्यतः शुद्धपाकत्वसामानाधिकरण्येनान्वयधीस्वीकारात्
सिद्धपाक एव हेतुसंसर्गधीस्वीकारात्॥ अन्यथेति समानविषयकत्वमात्रेण विरोधित्वे इत्यर्थः॥ इयं तत एव पा
काद्यनवधारणे इति सिद्धपाक एवमत्र इति साध्यपाकानां तादृशानिश्चयासत्त्वदशायामित्यर्थः तादृशाव
धारणदशायां पाके प्रवृत्त्यभावस्येष्टत्वात् तद्दशानुसरणं वस्तुगत्या पाकांतराभाव इति स्वरूपेति साध्यानागतपा
काप्रसिद्धिस्थले इत्यर्थः॥ तेन तेन रूपेणेति तत्तत्पाकत्वेनेत्यर्थः बाधावतारे हेत्वभावनिश्चये भ्रमस्याप्यसं
भवेन भ्रमात्मकस्यापि पक्षधर्मताज्ञानस्यानुमितेश्चानुपपत्तेरित्यर्थः। अप्रवृत्त्यापत्तेः। पाकेच्छिकीर्षाप्रव
त्त्यभावापत्तेः॥ यद्यपि समानविशेष्यकत्वमात्रेण विपरीतज्ञानप्रतिबंधकत्वेपि साक्षात्संबंधेनैव हेत्वभावग्र
हाद्वक्ष्यमाणपरंपरासंबंधेन हेतुमत्ताज्ञानं सुघटमेवेत्युक्तग्रंथासंगतिः॥ तथापीदानीं व्याप्यताघटकसा
क्षात्संबंधेन हेतुमत्त्वज्ञाने पूर्वपक्षिणा इष्टतरबाधकानुपन्यासात्तादृशसंबंधेन हेतुमत्त्वज्ञानमापाततउ

पगमेप्येवं समाहितमिति नासंगतिः॥ साक्षात्संबंधेन हेतुमत्ताज्ञानस्वीकारेऽन्यथाख्यातिरूपप्राभाकरानिष्टप्र
६५ संजनात्मकदृढतरबाधकोपन्यासोत्तरमेव परंपरासंबंधावगाहिपक्षधर्मताज्ञानोपगमेन समाधाने निर्भरस्य
विधेयत्वात्॥ साक्षात्संबंधेन हेतोः सिद्धपाकेः सत्वात् तादृशसंबंधेन हेतुमत्ताज्ञानं भ्रम एव तत्कथं न ततः प्रमा
65 त्मकानुमितिः प्रवृत्तिरपि संवादिनीत्याशंकां निराकरोति नचैवमिति॥ विसंवादिप्रवृत्त्यापत्तिरित्यत्र प्रव
त्तिपदं चिकीर्षापरं॥ तत्प्रकारभूतदृदानींतनवृत्तिसाध्यत्वांशे जनकीभूतानुमितेर्भ्रमत्वोपगमे तस्या
विसंवादित्वानुपपत्तिः। प्रवृत्तिजनकानुमितेः साध्यांशे भ्रमत्वसत्वेपि प्रवृत्तिप्रकारीभूतपक्षतावच्छेद
कपाकत्वांशे प्रमात्वानुपपत्तिविरहेण प्रवृत्तेर्विसंवादाप्रसक्तेः। पाकत्वेति स्ववृत्तीत्यादिः॥ तथाच सिद्ध
पाकवृत्तिपाकत्वं यस्य हेतोरधिकरणाधिकरणं अधिकरणवृत्त्यधिकरणमधिकरणं यस्येति समासा
त्तल्लक्षणः हेतोस्तत्वनिर्वाह्यः॥ परंपरासंबंधः सिद्धपाकानुयोगिकः स्वाधिकरणाधिकरणपाकत्ववत्व
संबंधः तस्य विद्यमानस्येव पाकेऽबाधितस्यैव पक्षधर्मत्वप्रतीत्यावगाहेन न तादृशप्रतीतेः प्रमात्वोप
पत्तेरित्यर्थः॥ साक्षात्संबंधेन हेतुमत्ताज्ञानस्य भ्रमत्वेपि तस्यानुमितिहेतुत्वोपगमेप्येवं नानुमितेः प्रमात्वा

५५

नुपपत्तिरित्याह सतिसाध्यइति पक्षेसाध्यसत्वे इत्यर्थः· पक्षधर्मताभ्रमेणेति अनुमितिकारणपक्षधर्मताज्ञा
नभ्रमत्वेनेत्यर्थः· अनुमितेरप्यांतत्वात्भ्रमत्वापत्तिविरहात्· इदानीमपिसाक्षात्संबंधेन हेतुमत्ताज्ञानोप
गमात्तज्ज्ञानस्यपक्षेहेतुविशिष्टज्ञानत्वानुपपत्त्यादिकमाशंक्यपरंपरासंबंधमादायसमाधत्तेनचेसादि
ना· असंसर्गेनातेइति· सिद्धपाकेहेतोःसाक्षात्संबंधेनाभावग्रहसत्वेऽकथमग्रहमाणेति· धर्मिणग्रहस
मानेऽसंसर्गोयस्यतादृशोयोधर्मस्तद्धर्मविषयकएकज्ञानात्मिकापक्षेहेतुविशिष्टधीः कथमित्यर्थः
ननुनद्धर्मसामानाधिकरण्यमात्रेणतद्विशिष्टबुद्धिलक्षणेनतद्धर्मावच्छेदेनासंसर्गग्रहस्यैवाभावोनिवेश्यते
तथाचपाकत्वावच्छेदेनहेतावसंसर्गग्रहस्यासत्वात्पाकत्वसामानाधिकरण्येनहेतुविशिष्टधीःसिद्धपा
केपिसंभवत्येवेत्यतआहकथंवेति· असंसर्गेसतीति· विशेष्येविशेषणासंसर्गिणिसतीत्यर्थः· तदुभ
येतिः· असंसर्गग्रहकालीनतदुभयविषयकैकज्ञानरूपेनत्वविशेष्येतद्विशेषणविशिष्टज्ञानमित्य
र्थः· स्वीकरणीयमितिशेषः। अन्यथाप्रव्याप्त्यापत्तेरितिविशेषणासंसर्गिणिविशिष्टबुद्धेरेवान्यथाख्या
तित्वात्कुरुणश्चतदनुपगमादितिभावः· उक्तपरंपरासंबंधेनैवेतिसिद्धपाकेस्वाश्रयासिद्धपाकवृत्ति

पाकत्वसंबंधेनेवेत्यर्थः· सामंजस्यमेव विवृणोति असंसर्गस्यापीति हेतुज्ञानस्य विशिष्टबुद्धित्वव्याघातत्वेना
भिमतयोऽसंसर्गग्रहः तद्विषयस्यान्यथाख्यातिसंपादकत्वेनाभिमतस्य विशेष्ये स्वरूपसत्तश्चासिद्धयाकेहे
त्वसंसर्गस्यापीत्यर्थः· विरहरूपत्वादिति· तथा च तादृशासंसर्गमादाय परंपरासंबंधहेतुमत्ताज्ञानस्यना
न्यथाख्यातित्वेन वा तस्याग्रहमादाय तादृशज्ञानस्य विशिष्टज्ञानत्वानिर्वाहो भ्रमत्वादेः संबंधविशेषनियं
त्रितत्वादिति भावः· क्वचित् पुस्तकेऽसंसर्गग्रहस्यापि संसर्गस्य साक्षात्संबंधात्मनो विरहग्रहरूपत्वादिति
पाठः। तत्र हेतुज्ञानस्य विशिष्टज्ञानत्वमेव स्फुटीभवति· ननु विशिष्टबुद्धेरन्यथाख्यातित्वनिराकरणं अ
न्यथाख्यातिशरीरे असंसर्गग्रहानिवेशात्· अत एवेति यत एव भ्रमत्वादेः संबंधविशेषघटितत्वात्तया एक
संबंधेन विशेषणविरहिण्यपि विशेष्येऽबाधितपरंपरासंबंधेन विशिष्टधियः प्रमात्वं अत एव बाधित
संबंधेन लौहित्यादेर्लौहितः स्फटिक इत्याकारकं ज्ञानं भ्रमरूपं स्वसमवायिजपासंयोगरूपाबाधित
तदीयपरंपरासंबंधावगाहि तदाकारज्ञानं प्रमारूपमिति सर्वसिद्धांतस्यापि संगतिरिति भावः· अप्रमा
त्वं यदि विशेष्यबाधितधर्मविशिष्टबुद्धित्वं तदा तादृशबुद्धेरेवान्यथाख्यातिपदार्थत्वतया गुरुसिद्धांतानु

पपन्निमाशंक्याह।प्रमात्वेति अप्रमाव्यवहारास्पदं चेत्यर्थः·ज्ञानद्वयमिति·।गुरुसिद्धांतसिद्धंवाधितसं
वंधेनपरस्परसाकांक्षयोर्धर्मधर्मिणोर्विभिन्नंज्ञानमित्यर्थः·संवंधस्यतन्मतेऽप्रमाविषयत्वेपिसंवंध
विशेषस्याकांक्षानिरूपकतयाऽप्रमपदार्थघटकत्वेवाधकाभावात् तस्यसंवंधविशेषनियंत्रितत्वेना
कांक्षाचधर्मधर्मिणोर्विशेष्यविशेषणभावरूपनतुयथाश्रुतोसंसर्गाग्रहः·निर्दोषपुरुषीयाग्रहमा
णासंसर्गशुक्तिरजतत्वादिविषयकज्ञानद्वयस्याप्रमत्वाभावात्·तद्विशेष्यानुयोगिकत्वतद्विशेषणप्र
तियोगिकत्वोभयाभाववत्तत्संवंधावच्छिन्नस्वनिरूपिततन्निष्ठविशेषणतानिरूपकतन्निष्ठविशेष्यता
कंज्ञानंतेनसंवंधेनतस्यधर्मस्यतस्मिन्भ्रमइतिफलितार्थः·विशिष्टवुद्धावपितेषांविषयत्वानभ्यु
पगमपक्षेतत्संवंधेनमिथःसाकांक्षधर्मधर्मिणोरेकज्ञानमेवतेनसंवंधेनतद्विशिष्टवुद्धिस्तेनसंवंधे
नतत्प्रमात्वस्वनिरूपिततत्संवंधावच्छिन्नतद्धर्मनिष्ठविशेषणतानिरूपकतद्धर्मिनिष्ठविशेष्यताकं
ज्ञानंतत्रधर्मिणितद्धर्मस्यतेनसंवंधेनविशिष्टवुद्धिःप्रमात्वेतिफलितं·उभयत्रस्वपदंलक्ष्मीभूतज्ञा
नपरं·ननूक्तपरंपरासंवंधेनहेतोःसाध्यतावच्छेदकसाक्षात्संवंधेनोक्तसाध्यंप्रतिसिद्धपाकरणवद्य

भिचारितया तत्संबंधस्य व्याप्यघटकतया कथं तेन सिद्धपाके हेतुमत्ताज्ञानात् सिद्धपाकविशेष्यकानुमितिः स्वा
६७ वयवादौ समवायादिना धूमादिमत्ताज्ञानाद्बाधानवतारदशायां संयोगादिना वह्न्यादिसिद्धेर्वारणाय व्या
67 प्यताघटकसंबंधेन हेतुमत्ताज्ञानं हेतुतायामवश्यं वाच्य त्वात्॰ अथैवमन्यथाकारणवादेन तेषामन्यथा
ख्यातिनिराकरणस्यानुपपत्तेः अन्यथाख्यातिरूपाया धूमावयवादौ वह्न्यनुमितेः सिद्धपाके साक्षात्संबं
धेन प्रकृतसाध्यकानुमितेरपि कारणसंभवात्॰ अथ पक्षभेदेन परामर्शस्यानुमितिकारणत्वाभेदात् सा
ध्यशून्यधर्मिविशेष्यकपरामर्शस्य तद्विशेष्यकानुमितिं प्रति हेतुतायाः फलाभावेनाकल्पनान्नान्यथा
ख्यातिरूपानुमितिः साकारवादादरसत्तो न भानादिस्त्वन्यथाख्यातिबाधकपरिगणनकारिकायां हेत्व
भावपदमपि हेतुताकल्पनाभावपरं॰ अथ वा तद्धर्मशून्ये तद्धर्मप्रकारकप्रमाविशेष्यत्वाभावनिर्वाहा
य विशेष्यतासंबंधेन तत्तद्धर्मप्रकारकप्रमां प्रति स्वविषयतद्धर्मवत्वसंबंधेन ज्ञानत्वेन विशेष्यसंबं
ध्यविशेषणज्ञानरूपगुणस्य हेतुताविशेषणज्ञानहेतुतावादिभिर्नैयायिकैरुपेयते विशेषणज्ञानं
विनापि विशिष्टबुद्धिमंगीकुर्वतो नित्यज्ञानं चानंगीकुर्वतो गुरूणां च विशिष्टबुद्धित्वावच्छिन्नं प्रतिव्य

भिचारेण तादृशाकारणत्वकल्पनस्यासंभवेपि नित्यविशेषणकस्थले प्रकारतावछेदकतन्नत्वसंवंधेन त
त्तद्धर्मिणाम नित्यविशेषणस्थलेच नित्यस्यतद्वृत्तिधर्मांतरस्यस्वाश्रयतद्विशेषणवत्तासंवंधेनहेतुताया
उक्तहेतुनास्थलीयायाअभ्युपगमसंभवेनतादृशाकारणवाधादन्यथाख्यातिरूपानुमितेर्नाविकाशइ
तिचेत्माभूत्संवंधांतरेणहेतुमत्ताज्ञानस्यानुमितिहेतुत्वेनुमितिरूपान्यथाख्यातिप्रसंगः-तथापितथ
सतिकालादौसमवायादिनारूपादिव्याप्यघटत्वादिलिंगेनरूपाद्यनुमानंस्वरूपासिद्ध्यादिदुष्टंनस्या
त् समवायादिनातत्रहेत्वसिद्धावपिकालिकादिसंवंधेनतत्रहेतुमत्ताज्ञानसंभवात्-नचतदनुमानंवा
धेनैवदुष्टमितिवाच्यंविवाददशायांतस्यानिश्चयात्-एवंसर्वत्रैवस्वसमानाधिकरणप्रमेयत्ववत्त्वसं
वंधेनसकलहेतोः सत्वात्स्वरूपासिद्धिहेत्वाभासस्यैवविलयप्रसंगः-सर्वत्रैवतादृशसंवंधेनसकल
साध्यव्याप्यसत्वात्विवाददशायांसकलसाध्यसाधनप्रसंगः-नचतत्रतत्रतुल्ययुक्त्यासाध्याभावस्यापि
साधनसंभवेनसत्प्रतिपक्षतयानायमतिप्रसंगइतिचेन्नर्हिपरार्थानुमानमात्रंपर्वतादौपरंपरासंवंधे
नवन्ह्यभावव्याप्यकृदत्ववत्वग्रहदशायांस्वार्थवन्ह्याद्यनुमानंचोछिद्येत-नचसत्प्रतिपक्षस्थलेत द

भावव्याप्यवत्ताज्ञानेनैव प्रतिवंधान्नानुमितिस्तत्ज्ञानं च व्याप्यताघटकसंवंधेन व्याप्यवत्ताविषयकमेव प्र
६९ 68 तिवंधकमिति नोक्तानुमानोच्छेदः। न वा कालादौ रूपादिसाधनप्रसंगः व्याप्यताघटकसंवंधेन पक्षवृत्ति
विभुत्वादिना प्रतिरोधादिति वाच्यं द्रव्यादिसामान्यस्यैव रूपादिमत्वविवादे विभुत्वादौ रूपाद्यभावव्याप्तिनि
श्चयासंभवेन प्रतिरोधासंभवात्· एवं प्रकृतस्थले व्याप्यत्वाघटकपरंपरासंवंधेन प्रकृतहेतुमत्ताज्ञान
स्य पाकत्वावच्छेदेन साध्याभावसिद्धावप्यविरोधितया साध्याभावव्याप्यगगनत्वादेः परंपरासंवंधेन पाक
त्वावच्छेदेन निश्चयदशायां तदवच्छेदेन साध्याभावोपि सिध्येत्· सिध्यतु तदवच्छेदेन साध्याभावः साध्य
सिद्धावपि न किंचित् बाधकं परंपरासंवंधावगाहिनो विरोधिपरामर्शस्य तदविरोधित्वादिति चेत्त
र्हि उभयभानेनानुमितिः संशयरूपास्यादिति निश्चयाभावेन निष्कंपप्रवृत्त्यनुपपत्तिः· नच तादृशास
ध्याभावानुमितेरन्यथाख्यातितया निरुक्तकारणबाधेन न तत्प्रसंग इति वाच्यं· एवमपि लैंगिकविपरी
तकोटिसंसर्गाग्रहेण संशयस्य दुर्वारत्वात्· एवं येन केनापि संवंधेन हेतुमत्ताज्ञानस्यानुमितिहेतुत्वे
स्वाश्रयाघटितेन स्ववृत्तिप्रमेयत्वादिसंवंधेनापि हेतुमत्ताज्ञानादप्युद्देश्यानुमितिनिर्वाहात्स्वाश्रयघ

टितपरंपरासंबंधानुसरणेसन्निकर्षविरहेणज्ञानतस्यानागतस्यसंसर्गविषयापिप्रत्यक्षहेतुमत्ता
ज्ञानेभानासंभवेनतेनसंबंधेनसिद्धपाकेपिहेतुमत्ताज्ञानानुपपत्तिमाशंक्याग्रेतदुपपादनंचनिर्वीजं
स्यादिति॰अत्राहुःप्रकृतपक्षेप्रकृतहेतोर्व्याप्यताघटकसंबंधानवगाहनेसंबंधांतरेणहेतुमत्ताज्ञानम
नुमित्यजनकमेवातोनोक्तदोषाणामवकाशः॰हेतुतावच्छेदकसाक्षात्संबंधेनस्वाश्रयानागतपाकघटित
परंपरासंबंधेनहेतुमत्ताज्ञानेचतादृशसंबंधविशेषितानागतपाकस्यसंबंधतयाभानादतोनागतपा
केसाध्यानुमितिर्युक्तैव॰साक्षात्संबंधेनतत्पाकविशेष्यकहेतुमत्ताज्ञानस्यसांसर्गिकविषयतासाधार
णविषयतात्वेनैवतत्तत्पक्षविषयतानिरूपितत्त्निरूपितहेतुतावच्छेदकसंबंधविषयतानिरूपित
हेतुप्रकारताशालिज्ञानत्वेनहेतुत्वोपगमात्तद्रूपाक्रांतस्यउक्तपरंपरासंबंधेनसिद्धेहेतुमत्ताज्ञानस्य
नकारणत्वांतरकल्पनं॰नचाश्रयत्वेनैवपक्षस्यसंबंधघटकतयोक्तहेतुमत्ताज्ञानेपक्षत्तावच्छेदका
वच्छेदेनहेतोःसाक्षात्संबंधाभानान्नतस्यानुमितिहेतुतासंभवइतिवाच्यंपक्षतावच्छेदकोपरागेणभा
समानेपक्षेहेतुतावच्छेदकसंबंधावगाहितायाएवप्रयोजकत्वात्॰स्वाश्रयवृत्तिपाकत्ववत्त्वभानेपा

कत्वधर्मस्यस्वाश्रयविशेष्यत्वेपितदुपरागेणपक्षभानाक्षतेः· धर्मिविशेष्यतयाधर्मभानस्यापिधर्मवि
६९ शेष्यतयाधर्मिभानकार्यकारित्वात्· अतएवपक्षोहेतुमान्पक्षेहेतुरित्यादिज्ञानयोरेककार्यकारिता·
69 वश्यकतः स्वसंबंधिपाकवृत्तिधर्मवत्वमेवसंबंधतयाविवक्षितं· तदभानेचपाकत्वावच्छिन्नेहेतुसंबंधभा
नमक्षतमेव· एवंचयत्रजातेःस्वरूपतःपक्षतावच्छेदकतांतत्रजनकज्ञानेपितस्याःस्वरूपतोभाननिर्वाहः
नचैवंसंबंधस्यविशिष्टबुद्धौभानानभ्युपगमपक्षेगुरुमतसिद्धमवलंब्याज्ञातानागतपाकघटितसंबं
धेनहेतुमत्ताज्ञाननिर्वाहस्यवक्ष्यमाणस्यासंगतिः। संबंधस्याभानेसंबंधघटकपक्षविषयतायाएवोक्त
हेतुमत्ताज्ञानेऽसत्वेनतस्यपक्षविशेष्यकहेतुतावच्छेदकसंबंधावगाहिपरामर्शसाधारणदर्शितानुगत
कारणतावच्छेदकानाक्रांतत्वादितिवाच्यं अनुगतरूपेणद्विविधपरामर्शयोर्हेतुत्वासंभवेपिद्वयोस्तुल्यका
र्यकारितायाअनुभाविकत्वात्पृथक्स्वरूपेणैवद्वयोर्हेतुत्वंकल्पनीयमित्याशयेनतत्संगतेः· वस्तुत
स्तु· संबंधस्यविशिष्टज्ञानाविषयत्वेपिप्रमात्वभ्रमत्वविशिष्टबुद्धित्वादेःसंबंधविशेषनियंत्रितत्वनि
र्वाहायविशेष्यविशेषणविषयतानिरूपितसंबंधनिष्ठसंसर्गताख्यंधर्मांतरमवश्यमुपेयं· विषयता
६९

त्वमात्रंतत्रनास्तीतिसंबंधाविषयकत्वेविशिष्टबुद्धेरित्तितन्मतनिगर्वः। विशिष्टसंसर्गकस्थलेचतत्तद्धु
रकयोर्विशेष्यविशेषणभावापन्नयोः संसर्गतावैलक्षण्यमावश्यकं अन्यथाविशेषणविशेष्यभाववैप
रीत्यस्थलावैलक्षण्यप्रसंगात्· तथाचविषयतारूपविशेष्यत्ताविशेषणतासाधारणंविशेष्यतात्वविशे
षणतात्वमेवविशेष्यविशेषणविधयासंसर्गतासाधारणमुपेयतेनतु अन्यत् वैलक्षण्यंगौरवात्· त
थाचपक्षनिष्ठयोर्विषयतारूपविशेष्यताविषयतानात्मकसंसर्गनिष्ठविशेष्यतयोर्विशेष्यतात्वेनानुग
मसंभवात्सर्वसामंजस्यात्· किंचेत्यादिरग्रिमफक्किकाग्रेसंगमनीयाः हेतुविशेष्यकस्याधेयतयाप
क्षतावच्छेदकावच्छिन्नपक्षप्रकारकस्येवतद्विशेष्यकस्यस्वाश्रयवृत्तित्वसंबंधेनपक्षतावच्छेदकप्रका
रकस्यापिपरामर्शस्यानुमितिहेतुतायायुक्तत्वात् प्रकृतेनागतपाकघटितसामानाधिकरण्यसंबंधे
नलिंगविशेष्यकपाकत्वप्रकारकपरामर्शस्यस्तुघटतयासामंजस्यमितितुरीयेतिकृतः· एवमस्त्विति·
परंपरासंबंधेनसिद्धपाकांशएवास्त्वित्यर्थः· कथंकिमर्थमनागतत्वाभः· अनागतपाकस्यानुमितौ
भानादरः यदित्तिसाध्यंसामानाधिकरण्यप्रतियोगितयासामानाधिकरण्यघटकाधिकरणंशेयत्वसंबं

धपुरस्कारेणयत्संबंधेनानुमितिजनके ज्ञाने विषयः सच संबंधः साध्यनिष्ठव्यापकताघटकसंबंध एव
७० स एव संबंधोनुमितौ पक्षे साध्यसंबंधतया भासते इत्यर्थः॰ इति नियम इति शेषः॰ अन्यथेतादृशनियम
70 मानादरे॰ अनियममेव विवृणोति काचिदिति॰ आद्यायां साक्षात्संबंधविषयिण्यां सप्तमी निर्धारणे॰ अन्त्या
यां परंपराविषयिण्यां विषयीभूतापरंपरेति शेषः॰ व्याप्तिप्रविष्टसाध्यसंबंधस्य तादृशसंबंधत्वस्य नि
यामकत्वमनुमितिविषयतानियामकत्वं ननु परंपरासंबंधेनापि साध्यस्योक्तहेतुव्यापकतया तेने
व संबंधेन प्रकृते व्यापकताग्रहः स्वीक्रियतामित्यत आह वस्तुतस्त्विति सामान्यप्रकारेण पाकत्व
रूपसामान्यघटितपरंपरासंबंधेन न प्रकृतानुकूल्यं न प्रवृत्तिनिर्वाहः प्रवृत्तिविषयविशेष्यकज्ञा
नस्यैवेति॰ प्रवृत्तिविषयमुख्यविशेष्यकस्य साक्षात्संबंधेन कृतिसाध्यताज्ञानस्यैवेत्यर्थः॰ एतेन सिद्धेप
रंपरासंबंधेन कृतिसाध्यताज्ञानेपि उक्तरीत्याऽनागतपाकरूपसंबंधघटकविशेष्यांशे कृतिसाध्य
तारूपप्रकारस्य साक्षात्संबंधभानेपि न प्रवर्त्तकता निर्वाहः॰ न च सिद्धं प्रवृत्तिविषय इति॰ न वा साध्य
स्य साक्षात्संबंधेन भानमिति शेषः तेन तन्मुख्यविशेष्यकत्वेपि न प्रवर्त्तकतेति भावः॰ ननु प्रवृत्ति वि

षया। विशेष्यकत्वं न क्षतिकरं प्रवृत्तिविषयतावच्छेदकावच्छिन्नविशेष्यकत्वस्यैव प्रयोजकत्वोपगमा
त्. ननु तद्विषयविशेष्यकत्वस्येत्याशंक्य निराकुरुते नन्वेचेति. गौरवादित्यापाततः भिन्नप्रकारकसमा
नविशेष्यकज्ञानात् प्रवृत्तिवारणाय प्रवृत्तिविषयतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशस्यावश्य
कत्वात्. एवं पाकत्वादेः प्रवृत्तिविषयताशत्त्या सिद्धपाकेऽतिप्रसक्तत्वमकिंचित्करं विषयताविशेषरू
पविषयतावच्छेदकतायाः अतिप्रसक्तेपि सर्वसंमतत्वात्. अपितु विशेष्यनियमाय समानविशेष्यक
त्वस्य प्रयोजकतायाः अतिप्रसंगभंगाय साक्षात्संबंधावगाहितायाश्चावश्यकत्वं प्रकृतानुकूल्याभाव
संपादकं बोध्यं. अभाने सन्निकर्षाभावेन प्रत्यक्षे भानासंभवे तद्दोषतादवस्थ्यं परंपरासंबंधेनापिप
क्षधर्मताज्ञानदुर्भिक्षं समाधत्ते नेति अज्ञातस्यैवेति ज्ञानादिरूपसन्निकर्षरहितस्यैवेत्यर्थः. नन्विं
द्रियसन्निकर्षाघसत्वे विशिष्टमानप्रयोजिका का सामग्रीत्याकांक्षायामाह विशेषणज्ञानइतिसती
तिशेषः. असंसर्गाग्रहे सतीति असंसर्गग्रहसहितायाइत्यर्थः. विशिष्टज्ञानसामग्रीत्वात् विशिष्टप्रत्यक्षे
वैशिष्ट्यस्य संसर्गतारूपविषयताप्रयोजकत्वात्. तदिंद्रियसन्निकर्षस्य वैशिष्ट्यज्ञानाद्दी

द्रियसन्निकर्षस्यापेक्षा संसर्गतारूपविषयताप्रयोजकत्वं नन्वेवं समवायस्य तन्मते तेनेंद्रियतया
७१ न तत्संसर्गस्य विशिष्टबुद्धिविषयतेति सिद्धांतविरोधः संबंधभाने सन्निकर्षानपेक्षायां योग्यतामपेक्ष्यासं
७१ संसर्गाग्रहादेस्तत्संसर्गकबुद्धिजनकत्वसंभवात् अतः समवायवदन्यस्यापि संबंधस्य न विशिष्टबुद्धिविषयते
ति मतमवलंब्याह वस्तुतः इति अनागतज्ञानापेक्षापि नास्तीति अनागतघटितसंबंधेन विशिष्टबुद्धौ तत्सन्निकर्षा
पेक्षा नास्तीत्यर्थः प्रत्यक्षविषयतायाः एव सन्निकर्षसापेक्षत्वात् संसर्गतायाश्च विषयतानात्मकविषयतावच्छेदक
ताविशेषरूपायास्तदनपेक्षकत्वादिति भावः ननु वैशिष्ट्यविषयकं ज्ञानमेव विशिष्टज्ञानं न तु तेनानिरुक्तंप
रंपरासंबंधाविषयकस्य पक्षधर्मताज्ञानस्य तेन संबंधेन विशिष्टज्ञानत्वमिति आशंक्य वैशिष्ट्यावगाहित्वं न
विशिष्टज्ञानलक्षणं अपि तु तत्तत्संसर्गाभावाग्रहकालीनधर्मधर्मिविषयकैकज्ञानत्वमेव पूर्वं निरुक्तं त
तत्संसर्गनिरूपितविशेष्यविशेषणभावापन्नधर्मधर्मिविषयकैकज्ञानत्वरूपं वा तल्लक्षणमित्याशयेन
समाधत्ते अग्रहमाणेति विशेष्यविशेषणयोरसंसृष्टत्वेन भ्रमत्वेन धर्मधर्मिणोर्ज्ञानस्यैकत्वासंभवात् न देक
त्वनिर्वाहप्रदर्शनार्थं उक्तलक्षणपरंपरासंबंधवतोरिति हेतुपक्षविशेषणाभिधानं उक्तलक्षणेति स्व
७१

समानाधिकरण्यपाकत्वरूपेत्यर्थः यथा अबाधितधर्मसाधारण्यरूपेण बाधितविशेषणावगाहिज्ञानस्या
पि प्रमात्वं कदाचित्स्वीक्रियते अत एव साध्यवतिपक्षे साध्यव्याप्यत्वेन पक्षधर्मी हेतुज्ञानजन्यानुमितौ
लिंगोपहितलैंगिकभानमते व्याप्यत्वेनैव हेतोर्भानं साध्यवतिच व्याप्यत्वावच्छिन्नमबाधितं कस्यचि
व्याप्यस्यावश्यकत्वादित्यभिधाय तादृशासंल्लिंगकपरामर्शजन्यानुमितेर्लिंगोपहितलैंगिकभान
मतेपि प्रमात्वं दुर्वारमित्युक्तमासन्निवादे आलोककृतैव तथाऽविरुद्धविशेष्यतावच्छेदकसामानाधि
करण्येन विशेषणशून्यविशेष्यकमपि विशिष्टज्ञानं प्रमारूपं अतथाविधेव बाधितधर्मविशिष्टधी
गुरूणामननुमतेति वक्तुं शक्यमित्याशयेन पाकत्वरूपेण सिद्धपाकएव साक्षात्संबंधेनैव हेतुमन्नाज्ञानं
स्वीकरोति किंचेति उक्तपरंपरेति अनागतव्यक्तिभाननियततोयः उक्तपरंपरासंबंधेन पक्षधर्मताग्रहस्स
एवनेत्यर्थः स्वीक्रियत इति शेषः सिद्धस्यापि तद्घटकत्वादिति सिद्धपाकमात्रभानस्यापि साक्षात्संबंधेन पक्ष
धर्मतानिर्वाहकत्वात् सिद्धपाकस्याप्युक्तपरंपराप्रविष्टसामानाधिकरण्ये धिकरणत्वेन घटकत्व
संभवात्परंपरासंबंधभानेऽनागतभानस्यनापेक्षेति यथाश्रुतार्थोऽसंगतः अन्याधिकरणतायाअन्य

प्रतियोगिकत्वविरहेण हेत्वधिकरणसिद्धपाकरूपाधिकरणघटितत्तद्दर्शितपरंपरासंबंधेन तस्य सत्त्वे
७२ व बाधादन्यथाख्यात्यापत्ते दुर्वारत्वात् अन्यथासंयोगत्वादिसामान्यधर्मावच्छिन्नसंयोगादिनात्तद्घटितसंयुक्त
72 संयोगादिना वा संबंधेन तत्संबंधवत्तिगुणादिविशिष्टधियः प्रमात्वापातात् सिद्धपाके साक्षात्संबंधेनासंसर्ग
ग्रहसत्त्वेपि विशेषरूपेणैव तस्य सत्त्वात् सामान्यरूपेण साक्षात्संबंधेन हेतुग्रहसंभवदिति पूर्वोक्तं स्मा
रयति सामान्यतोपि ज्ञातस्य तस्येति पाकत्वेन भासमानस्यापि सिद्धपाकस्येत्यर्थः तद्घटकीभूयसाक्षा
त्संबंधेन पापक्षधर्मतात द्घटकीभूयः साक्षात्संबंधेन हेतुप्रकारकग्रहविषयीभूयेतियावत् । तत्प्रत्य
याजनने विशेषरूपेयासंसर्गग्रहदशायां हेतुमत्ताज्ञानासंपादने । अनागतत्वाभावे अनागतपाका
प्रसिद्धिस्थले अनवधारणदशायां इयं तत एव पाकादित्यवधारणसत्त्वे ईदृशी प्रतीतिः । पाकत्वप्रकार
कसिद्धपाकगोचरभ्रमरूपहेतुप्रतीतिः न स्यादिति साकांक्षधर्मधर्मिविषयकप्रतीतावेवासंसर्ग
ग्रहस्य विरोधित्वादिति भावः इदं तदा प्रतीत्यभवने क्रमसामग्र्येवेति क्रमतया पक्षे हेतुविशिष्टज्ञा
नघटितानुमितिसामग्र्येवेत्यर्थः । सर्वसामंजस्ये उक्तरीत्यानागतपाके कृतिसाध्यत्वानुमितिर्निर्वाह

अनुमितिसामग्र्यंतरकल्पनमनादेयमित्यग्रिमेणान्वयः सामग्र्यंतरमेव किमित्याकांक्षायां पक्षता
वच्छेदकेत्यादीत्यंतः पक्षतावच्छेदकज्ञानेन तदवच्छिन्ने यत्किंचिदसंसर्गाग्रह इति· पक्षतावच्छेदकप्र
कारेण ज्ञायमाने यत्किंचिद्धर्मिणि हेतोरसंसर्गाग्रह इत्यर्थः· तथा च सिद्धपाके हेतौ विशिष्टज्ञानासंभवे
पि तत्र तदसंसर्गाग्रहसत्वेनानागतयाकविषयकानुमितिसामग्रीनिर्वाह इति भावः· स्वमते सामग्र्यं
तरकल्पनं विना निर्वाहं स्पष्टयति· सामान्यतोऽसंसर्गाग्रहवदिति विशेषरूपेण संसर्गाग्रहविषये
पि सामान्यरूपेण संसर्गाग्रहस्याभावनिर्वाहवदित्यर्थः· सामान्यतो विशिष्टधीसंभवादिति· हेतु
समानाधिकरणयाकत्वावच्छिन्ने हेतुशून्येपि पाकत्वरूपपरंपरासंबंधेन विशेष्यतावच्छेदकाश्र
ये कश्चिद्विशेषणसत्वेन तदनाश्रयेपि तदवच्छिन्ने विशिष्टधीरूपान्यथाख्यातिस्वीकारे साक्षात्संबंधे
नापि हेतोर्विशिष्टज्ञानसंभवादित्यर्थः· सामान्यरूपेण विशेषरूपेणैव वासंसर्गाग्रहसत्व एव चेन्नासंस
र्गाग्रहघटितासामग्री तदभिप्रायेण दूषणांतरमाह इयं तत एवेति दशायामिति पक्षतावच्छेदकप्रकार
कज्ञानविषयसकलव्यक्तिष्वेव हेतोर्विशिष्यासंसर्गाग्रहसत्वे इत्यर्थः· इयं तत एवेत्यवधारणदशायां

प्रवृत्ते रनुदयाद्दनुमितिसामग्र्यनिर्वाहो किंचित्करइत्यतोऽनवधारणदशानुसरणं अव्यापकत्वादि
७३ त्ति अ संसर्गाग्रहघटितो नोक्तं सामग्र्या इत्यादिः सामान्यरूपेण संसर्गाग्रहस्यासत्वादुक्तस्थले सामग्रीसं
73 भवत्येवेत्याशंक्य तत्पक्षे दूषणांतरमाह किंचेति भज्येतेति कुत इत्याकांक्षायामाह तदापत्तेरिति अन्य
थाख्यात्यापत्तेरित्यर्थः अशक्यसमाधेयत्वादिति · इदादावपि धर्मायसंसर्गाग्रहघटितवन्ह्याद्यनु
मितिसामग्रीसत्वेन तत्रान्यथाख्यातिरूपवन्ह्याद्यनुमितेर्दुर्वारत्वादिति भावः अनागतयाकस्याज्ञा
नेपि दर्शितरीत्यामणिकृतोक्तसाध्यत्वानुमितिसंपादनप्रयासं केचिदाक्षिपंतित्तन्मतं दूषयितुमु
पन्यस्यति अत्रकेचिदिति उक्तानुमानादित्ति · सिद्धयाकविशेष्यकहेतुमत्ताज्ञानादित्यर्थः अनागतसि
द्धिः अज्ञाते अनागते साध्यप्रसिद्धिः अन्यथानद्धीर्भविष्यतीति · वक्ष्यमाणरीत्याऽनागतस्यापि ज्ञान
संभवेन ज्ञात एव तत्रानुमितिः संभवतीत्यर्थः इच्छास्वभावादिति अज्ञातमप्यनागतमिच्छयाविषयी
क्रियत इति तत्स्वभावादित्यर्थः समानप्रकारकत्वे समानप्रकारकत्वमात्रं नियामकं ज्ञानेच्छयोः कार्य
कारणभावेऽपेक्षितं · तत्सिद्धांतात्तु गुरुसिद्धांतात् ज्ञानेच्छयोस्तन्मते समानप्रकारकत्वेनैव हेतुहेतुम ७३

ज्ञावद् इति मणिकृतैव सामान्यलक्षणं योलिखनादिति भावः तदिच्छानुव्यवसायेन अनागतसुखगो
चरेच्छासाक्षात्कारेण अनागतसुखज्ञानं· अनागतसुखविषयीकरणं सुखविषयकेच्छाया एवतज्ज्ञा
सकप्रत्यासत्तित्वात्· सविषयकपदार्थस्य विषयोपरागेणैव साक्षात्कारे भानमिति नियमानुरोधेनेच्छा
याः स्वविषयभासकत्वस्यावश्यकत्वादिति भावः ननु इति· अनागतसुखरूपपक्षज्ञानात्मकादिच्छासा
क्षात्कारादित्यर्थः तत्पक्षकेति· तादृशसुखपक्षकेत्यर्थः पक्षधर्मतावतादिति· हेतोः पक्षधर्मत्वस्यो
पपादकपक्षीयाज्ञातसाध्यस्यापि भानप्रयोजकमिति तद्वत्त्वादित्यर्थः अनागतभोजनसिद्धाविति त
त्साध्यत्वरूपसाध्यस्यैवानागतरूपपक्षीयत्वादिति भावः। अनागतभोजनरूपपक्षज्ञाननिर्वाहा
दिति शेषः। तत्पक्षकेति अनागतभोजनपक्षकेत्यर्थः ओदनेति अनागतौदनेत्यर्थः तत्पक्षकेति अना
गतौदनपक्षकेत्यर्थः। उक्तरीत्येति अनागतौदनेऽनागतपाकसाध्यत्वरूपसाध्यस्यैवावाधिततया
पक्षधर्मतावत्त्वेनेत्यर्थः उक्तानुमानेनेति अनागतपाकपक्षकमूलोक्तानुमानेनेत्यर्थः कृतिसाध्य
त्वानुमानं अनागतपाकविषयककृतिसाध्यत्वानुमितिः संभवतीति शेषः तथा च मूलकृतोऽज्ञातसि

७४ 74

द्धविषयकहेतुज्ञानादज्ञातासिद्धविषयकानुमितिस्वीकारोऽप्युक्त इति भावः सुखेच्छानुरोधेनेति · सुखे
च्छायामज्ञातानागतसुखभानानुरोधेनेत्यर्थः समानप्रकारकत्वेति · इच्छाजनकज्ञानस्य तत्प्रकारप्र
कारकत्वैवेत्यर्थः एवकारव्यवच्छेद्यं स्पष्टयति नतु समानेति · किमनुमानेनेति · किमनागतविषयका
नुमितिप्रकारप्रयासेनेत्यर्थः सिद्ध इति अनागतस्याज्ञानेपि ज्ञातसिद्ध्या के कृतिसाध्यत्वानुमितेरेवे
त्यर्थः कृत्यनन्तरभविष्यत्वस्येति · तदात्मक फलोपधान कृतिसाध्यत्वस्यैवेत्यर्थः न तु कृतिस्वरूपयो
ग्यकत्वस्येति शेषः तथा सति भाविपयोवराज्यादावतिप्रसंगादिति भावः तत्र ज्ञाने सिद्धपाकविषयके
कृतिसाध्यताज्ञाने अनादृशत्वात् · अन्यथाख्यातिभयेन बाधितत्वादृशकृतिसाध्यत्वप्रकारकत्व
स्वीकारासंभवात् तथा च समानप्रकारकतानियमोपि भज्येतेति भावः ग्रंथकृतामुक्तप्रकारपरि
त्यागे बीजमाशंक्य निराकुरुते · नचेति उक्तमिति · सिद्धे परंपरासंबंधेन हेतुमत्ताज्ञानादनुमिति
समानप्रकारकाद् सिद्धे कृतिसाध्यताविषयकं अनुमानं अनुमितिः कल्पस्य अनुमानपरंपरा
श्रयणे कल्पनस्य अदुष्टतया गौरवातिरिक्तदोषशून्यतया उक्तानुमानास्फुरणदशायां सिद्धे परंप

रासंवंधेनहेतुमत्वाज्ज्ञानदशायांपरंपरायाःअनुमानपरंपरायाःग्रंथेनिवंधेनापत्तेरितिअस्याअ
पीत्यादिःनिवध्नुमुचितत्वादित्यर्थःतथाचतदनिवंधनेग्रंथस्तोन्यूनतेवेतिभावःअनुमानपरंप
राश्रयणेनगौरवस्यपरीहारायेकानुमानेनापिनिर्वाहमाहदृष्टसाधनत्वेतिअनागतसुखरूपे
ष्टसाधनत्वघटितहेतुज्ञानानुरोधेनतादृशेतिअनागतेत्यर्थःउक्तसामग्रीवलेनसाध्यतावच्छेद
कप्रविष्टयावद्वस्तुभासकसामग्रीवलेनअवच्छेदकभावेन·साध्यतावच्छेदकघटकतयाःगुरू
णामितिदृष्टप्रत्यासत्तिरित्यनुषज्यतेतथाचेष्टोपनीतसुखपक्षकानुमितिस्वीकारोनसंभवदु
क्तिकःसुखरूपविषयोपरक्तानुव्यवसायश्चानागतयाकपक्षकानुमितिवदनापत्त्यानागतसु
खविषयकानुमितिकल्पनेनोपपादनीयइतिभावःइष्टायान्यायनयेपदप्रत्यासत्तित्वमुक्तंत
द्वनेत्याशंकांनिराकरोतिनन्वेष्टेतिकथमन्यथासुखमिष्टामत्तिधीरितिइष्टजनकज्ञानना
शोपिइष्टोत्पत्तिद्वितीयक्षणजातेष्टत्वादिनिर्विकल्पकजन्यायाःसुखमिष्टमीत्याद्याकाराया
उपनीतसुखादिविषयिण्याःप्रतीतेःकथमन्यथानिर्वाहइत्यर्थःइष्टायाःप्रत्यासत्तित्वेज्ञानल

क्षणे प्रत्यासत्तिरिति ग्रंथे ज्ञानमात्रोपादानविरोधं परिहरति ज्ञानलक्षणेति ज्ञानस्याप्रत्यासत्तित्व
७५ वादिनामिच्छायाः प्रत्यासत्तित्वोपगमे यो विरोध उक्तस्तमुद्धरति · गुरूणां त्विति तथा प्रत्यासत्तिः माभू
75 दिति · तेषां ज्ञानस्यानुव्यवसायानंगीकारात् प्रत्यभिज्ञादिस्थले च विशिष्टज्ञानानंगीकारेण ज्ञानस्य प्रत्या
सत्तित्वकल्पकाभावादिति भावः इच्छा तु स्यादिति · सविषयकस्य विषयविशिष्टस्यैव साक्षात्कारे भा
नेन तदनुरोधेनेच्छाया विषयोपनायकत्वस्यावश्यकत्वादिति भावः। इच्छाया न्यायनये प्रत्यास
त्तित्वं तन्मते इच्छादेर्यो चितमंडनन्यायेन ज्ञानविषयतयैव सविषयकत्वात् · साक्षात्संबंधेन विषय
तावत्वविरहात् · गुरूणां तु सुखमिच्छामीत्यादिप्रत्यक्षस्य सुखत्वादिविशिष्टवैशिष्ट्यबोधत्वे नवि
शेषणज्ञानस्य विशिष्टबुद्धिसामान्याहेतुत्ववादिनामपि तेषां विशेषणतावच्छेदकप्रकारकज्ञान
स्य विशिष्टवैशिष्ट्यबोधहेतुतास्वीकारेण सुखत्वादिप्रकारकज्ञानपेक्षत्वेन निर्विकल्पकानंगी
कर्तृतन्मते इच्छाया द्वितीयक्षण एवोक्ताकारप्रत्यक्षोत्पत्तात् तत्रेच्छाजनकसुखत्वादिरूपविशे
षणतावच्छेदकप्रकारकज्ञानादेवेच्छायाः प्रत्यासत्तित्वेपि विषयभानसंभवात् न तत्प्रत्यासत्तित्वं

निर्वीजमित्याहन्यायेत्यादिना इच्छाजनकज्ञानस्य ननियमेनानागतत्तद्विषयसुखादिविषयकत्वमि
तिनन्दविषयकस्यतस्यविशेषणेनावच्छेदकसुखत्वादिभासकत्वेवसंभवतिनतादृशत्वसुखादिभा
सकत्वमितितज्ज्ञानानुरोधेनगुरुणामिच्छायाः प्रत्यासत्तित्वस्वीकार आवश्यकइतिनन्वित्यादिपू
र्वपक्षेसमाधत्ते·मैवमिति· विशेषणतावच्छेदकप्रकारकज्ञानेन हीति इच्छाजनकसुखत्वादिप्रका
रकज्ञानेनहीत्यर्थः नियमत इतिशेषः नत्विच्छेतिइच्छां विनातज्ज्ञासकाभावादित्तिभावः तथाभावेवे
त्ति· तादृशज्ञानस्येच्छाविषयतयातद्विषयसुखविषयकत्वे·केचिदित्याक्षेपोपरिसमाधत्ते·अन्न
श्रूमइति·लिखनादिति· ॐ छन्नप्रच्छन्नवादेपाकंकरोमिइतिकृतिप्रत्यक्षेउपनीतयाकभानस्यगुरु
भिरस्युपगमासंभवात्· नन्मतेयथातदस्यज्ञानांतरएवपाकोभासनेकृतौनत्स्याःसंसर्गाग्रहात्दे
वविशिष्टव्यवहार इतिमणिकारोक्तेरित्यर्थः फलत इतिअर्थतइत्यर्थः असंसर्गाग्रहमात्रमितीत्य
नंतरंपूरणीयेनोक्तमित्यनेनास्यसंबंधः ज्ञानोपस्थितेतिज्ञानविषयीभूतेत्यर्थः प्रत्यासत्तिरिति·
प्रत्यासत्तितयागुरुसिद्धांतसिद्धेत्यर्थः सविषयकमात्रस्यप्रत्यासत्तित्वेतत्रतत्रासंसर्गाग्रहमात्र

स्वीकारविरोधादिति भावः न च तत्र तत्रासंसर्गाग्रहमात्रस्वीकारे संसंबंधिकपदार्थस्य संबंधिविशे
७६ षितस्यैवभानमिति नियमभंग इति वाच्यं· विभिन्नज्ञानविषययोरपि तेर्विशेषणविशेष्यभावरू
76 पाकांक्षायाः स्वीकारात्· इच्छायाः प्रत्यासत्तित्वमभ्युपगम्यापि केचिदित्यादिमतं दूषयति· किंचेति एवं
सत्यपि इच्छाया विषयभासकत्वे सत्यपि· पक्षविशेष्यकज्ञानस्येति। पक्षमुख्यविशेष्यकहेतुमत्ताज्ञा
नस्येत्यर्थः नादिच्छाविशेषणत्वेनेति· सुखस्योक्तप्रत्यक्षेच्छाविशेषणत्वेनेत्यर्थः ज्ञानमप्यलं। तज्ज्ञा
नमप्यनुपयोगि तद्विशेष्यकः तन्मुख्यविशेष्यकः। तथा च स एवानुमितिहेतुतयास्वीकरणीय इति
भावः न चेत्यत्र हेतुमाह तेषामिति· गुरूणामित्यर्थः अभ्युपगमेवेति अभ्युपगंतुर्नैयायिकस्य मताव
लंबन एवेत्यर्थः तत्तत्रेति तस्यैव सुखस्य सुखमुख्यविशेष्यकमानसोपनीतभाने भानोपगमः संभ
वे तन्नत्विच्छाविषयासिद्धसुखस्येत्यर्थः न्यापनये ज्ञानस्यैवोपनायकत्वादिति शेषः तच्चेति उप
स्थितसुखं चेत्यर्थः सिद्धमेवेति कथमिति अप्रसिद्धसुखस्याज्ञातत्वेनापक्षतयानोक्तप्रकारसंभ
व इत्यर्थः पर्वतवन्हीति· पर्वतपक्षकवन्हिरूपसाध्येत्यर्थः अग्निमसिद्धिपदार्थेनान्वयः इच्छात्पर इ

त्यादिन्यायात् अत्र पर्वतत्वरूपपक्षः प्रत्यक्षप्रमाणसिद्धस्तत्र पूर्वमज्ञातस्य पर्वतीयवह्नेः सिद्धिरिति। असि
द्धस्य क्वचित्सिद्ध इत्येतद्दृष्टांतता सास्नावद्व्यक्तिपक्षकगोत्वेति। अस्यापि सिद्धावन्वयः सास्नावद्व्यक्तिर्गो
त्वव्यंजकविलक्षणसंनिकर्षविरहेण तद्विषयकेण प्रत्यक्षेण गृहीता तस्यां व्यक्तावन्यत्र गृहीतगो
त्वस्य सिद्धिरिति। सिद्धासिद्धस्य च क्वचिदित्यत्र दृष्टांतताः प्रकृतेति। असिद्धपाकपक्षका सिद्धेदानीत
नकृतिसाध्यतेत्यर्थः तत्सिद्धिरप्रसिद्धस्य चासिद्धेरित्येतद्दृष्टांतता। अकिंचित्करां। अप्रवर्त्तकं प्रवर्त्तकत्वा
दिति। अन्यथा भावियौवराज्यावारणादिति भावः ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनिय
मः कलंजभक्षणे कृतिसाध्यत्वान्वयेनैव निर्वहति। अन्यथा भक्षणे बलवदनिष्टाननुबंधित्वविशिष्ट
इष्टसाधनत्वाभावबोधपक्षेपि विशिष्टेष्टसाधनत्वरूपविधिप्रत्ययार्थस्य भक्षणेनान्वयान्नियम
भंगप्रसंगात् इत्याशंक्याकांक्षान्वयबोधबाधकं नियमांतरमाह प्रकृतेरिति। प्रकृतेरन्यान्वयस्य प्रत्य
यार्थे भिन्ने विशेषणतया स्वार्थान्वयबोधकत्वस्य विभक्त्यर्थमंतरा कृत्येवेति नियमादित्यर्थः सिद्ध
मिति। एतदापाततः बलवदनिष्टाननुबंधित्वज्ञानस्याप्रवर्त्तकत्वेपि न कलंजमित्यादेः प्रामाण्यानु

रोधेन बलवदनिष्टाननुबंधित्वस्य विध्यर्थत्वोपगमसंभवात्ः न हि प्रवर्त्तकज्ञानविषय एव विध्यर्थ
७८ इति नियमे मानमस्ति· वस्तुतस्तु न कलंजं भक्षयेदित्यत्र कलंजभक्षणाभावे इष्टसाधनत्वान्वयोपि युज्य
७७ ते नानुपपत्त्यप्रादुर्भावादित्यादौ पंचम्यर्थहेतुत्वे साक्षात्प्रकृत्यर्थान्वितनञर्थस्याभावस्यान्वयात् प्रत्यया
र्थभिन्ने प्रकृत्यर्थस्य नविशेषणतया साक्षादन्वय इत्युक्तनियमस्येवाभावात् अस्तु वा तादृशनियमस्त
थापि प्रकृते भक्षणकृत्यभाव एव इष्टसाधनत्वप्रत्ययस्योपगंतव्यतया नानुपपत्तिः इष्टं च नरकविशे
षानुत्पाद स्तत्साधनत्वं च तत्प्रयोजकत्वं कार्याभावस्य कारणाभावप्रयोज्यतया नरकजनककलंज
भक्षणाभावस्य तत्कार्यनरकाभावप्रयोजकत्वं भक्षणे न च बलवदनिष्टानुबंधित्वस्याप्रतीता उक्तवा
क्यस्य कलंजभक्षणनिवर्त्तकत्वानुपपत्तिरिति वाच्यं कलंजभक्षणाभावस्य तत्कृत्यभावस्य वा नर
काभावसाधनत्वेऽवगते तादृशाभावप्रतियोगिनो भक्षणादेर्नरकविशेषाभावप्रयोजकाभावप्रति
योगित्वेन लिंगेन नरकजनकत्वभानसंभवात्· नरकाजनकत्वस्य विध्यर्थतापक्षेपि तत्र नरकजन
कत्वग्रहस्य विशिष्टाभावलिंगकानुमानाधीनत्वात्· न च भंक्षणकृतो नरकजनकत्वग्रहस्य कथं भक्ष ७८

णनिवर्त्तकताभिन्नविषयकत्वादिति वाच्यं कृतेः स्वविषयक्रियाद्वारैव नरकादिजनकतयाकृतौ नर
कजनकत्वग्रहस्य न द्विषयक्रियायां तज्जनकत्वविषयकतया नस्य निवर्त्तित्रिसमानविषयकत्वात् कृती
ष्टसाधनताज्ञानस्य क्रियाप्रवर्त्तकतामते कृतौ द्विष्टसाधनताज्ञानस्यापि निवर्त्तकत्वाच्च न च नरका
भावकामपदसमभिव्याहाराभावान्नरकाभावसाधनत्वं भक्षणाभावे कथं विधिप्रत्ययेन बोधनीयालि
ङ्गात्तद्रूपावच्छिन्नसाधनताबोधनेन तद्रूपावच्छिन्नविषयककामनाविशिष्टवाचकपदसमभिव्याहार
स्य प्रयोजकत्वादिति वाच्यं । विश्वजिता यजेतेत्यादौ स्वर्गकामपदस्येवात्रापि नरकनिवृत्तिकामपद
स्याध्याहरणीयत्वात् बलवदनिष्टानुबन्धित्वस्य निषेधविध्यर्थतामतेपि न कलञ्जं भक्षयेत् अष्टम्यां
न गच्छेत् पुष्ये नो द्रुहेत् शाकं न भुञ्जीतेत्यादौ अनिष्टविशेषसाधनत्वबोधनियमापत्तेः तदनिष्टसाधन
ताबोधेन तत्तदनिष्टविद्वेषिकर्तृवाचकपदसमभिव्याहारस्य नियामकतायाः आवश्यकतया तादृशाध्य
दाध्याहारस्यावश्यकत्वात् अनुगतद्वेषविषयतावच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नासाधनत्वं
विध्यर्थः तदभावो नञा बोध्यते अनिष्टविशेषबोधनियमश्च तात्पर्यवशादिति न द्वेषवत्कर्तृबोधकपदा

ध्याहारइतिचेन्नञर्थाभावेइष्टसाधनत्वान्वयपक्षेपिनरकादिरूपतदनिष्टाभावरूपेष्टसाधनतावो
७८ धस्यतात्पर्यवशादेवनियमोस्तु·वैदिकनिषेधस्थलेचनरकरूपानिष्टाभावरूपेष्टएवानादितात्पर्यग्रह
78 निष्टान्तराभावतात्पर्येणप्रयोगेचतादृशमपिकलंप्रतीयतेअन्यथातवाप्यनिस्तारात् वस्तुतस्तुनरक
भीरुःशाकंनभुंजीतेत्यादेरोगाद्यनिष्टतात्पर्येणप्रयोगात्·अनिष्टतावच्छेदकस्यसमभिव्याहृतपद
विशेषबोध्यतावच्छेदकत्वेनोपलक्षणेनानुगमप्यशक्यातर्भावआवश्यकइतिकर्त्तव्याच्यकपदवि
शेषाध्याहारःसकलमतएवावश्यकंइत्यलमधिकेन·कलंजभक्षणादौदुःखविशेषसाधनता
त्वेनतत्साधनतायाःशाब्दबोधेनसंभवतिविशिष्टाभावस्यातिरिक्तत्वेनजातस्यैवबोधनात् ननु
दुःखसाधनतारूपविशेषणाभावस्यविशिष्टाभावस्यविशेषणाभावादिरूपतामतेविशेषणतद
साधनत्वाभाववत्त्वेनैवतत्तदसाधनत्वबोधकलिङ्गसमभिव्याहृतनञस्तत्प्रत्यययोग्यत्वादित्याशंक्यबो
धनयदस्यानुमानार्थकत्वमाहानेनेतीतिविशेष्यवत्तिइष्टसाधनत्वरूपविशेष्यसामानाधिक
रण्यविशिष्टविशिष्टेष्टसाधनत्वाभावरूपलिंगज्ञानसंपादनद्वारेत्यर्थः मूलेकश्चिदितिविलवद

निष्ठाननुवंधित्वं विशेषितएवेष्टसाधनत्वे लिङः शक्तिः सामान्यवाचकपदस्यतस्यतादृशविशे
षणविशिष्टविशेष्यरूपे विशेषेतात्पर्यं तत्समभिव्याहृतस्य च नञो लिङ्तात्पर्यविषयतादृशवि
शेषणान्वितभावपरत्वमिति निषेधवाक्याद्विशेषणादौ विशेषणाभावप्रतीतिरिति कश्चिदाहेत्यर्थः
पदजन्यैवोपस्थितिः शाब्दबोधांगमित्याशयेनैतन्मतं दूषयति। नत्रेति। छिद्रेतरत्वेन छिद्रेतरघट
त्वेन ननुच्छिद्रेतरत्वस्य घटपदेन लक्षणयोपस्थितिसंभवाच्छिद्रेतरघटत्वेनापि घटान्वयो घट
पदेन बोधमेधनीयइति कथमेतदित्यत आह युगपदिति। विरोधादिति। शक्त्या घटत्वेन लक्षण
याच्छिद्रेतरत्वेन बोधस्य घटपदादनुपपन्नेरिति शेषः। शक्यतावच्छेदकघटितरूपेण लक्षणया
नबोध्यत्वे अतो न छिद्रेतरघटत्वेन लक्षणयैव बोध इत्याशयः। अनुमानाद्बलवदनिष्टानुवंधित्व
रूपस्य विशेषणाभावस्य प्रतीतेर्विधिशक्तिवादिनास्वीकारात्तस्योक्तयुक्त्या शाब्दबोधासंभवान
क्षतिकर इत्यालोककृदाशंकनेयद्यपीति विशिष्टनिषेधेपि। विशिष्टाभावतस्यशाब्दबोधविषय
त्वेपि सिद्धिरिति। शाब्दधीरित्यर्थः। अत्रापि। एतन्मतेपि। तात्पर्यादिति कलंजभक्षणस्य बलवदनि

७६ ष्टानुवंधित्वयानिर्द्दोषपुरुषतात्पर्यविषयत्वरूपलिंगात्तदनुमानसंभवइत्यर्थः तात्पर्याद्धि विशिष्टाभावा
नुमानमिति · नञ्पदसमभिव्याहृतलिङ्पदे तात्पर्यविषयविशिष्टेष्टसाधनत्वरूपविशेषार्थान्वि
79 ताभावपरत्वमेवसुग्रहं नत्वपदार्थविशेषणपरत्वाभावपरत्वं तथाचतात्पर्यलिंगेननाहृत्य विशे
षणाभावानुमानं अपितु विशिष्टाभावानुमानमेव तेनैव च लिंगेन विशेषणाभावानुमानमितिसा
मग्रीद्वयकल्पने गौरवान्नेदं मतं साध्वित्यर्थः नत्वेवंस्येवकारेण विशिष्टेष्टसाधनत्वे शक्तिव्यव
च्छेदः त्र्यपेनेनाभिचरन्यजेतेत्यादौ वलवदनिष्टाननुवंधित्वादिविशिष्टेष्टसाधनतावाचकमपिलि
ङ्पदं बलवदनिष्टासाधनत्वरूपविशेषणांशमयोग्यतयापरित्यज्येतरांशं वोधयतीतिमूलोक्ते
एकदेशिनां मते व्युत्पत्तिविरोधमाशंक्य निराकरोति नचेति · पदार्थेनान्वेति नतुपदार्थैकदेशेने
तिव्युत्पत्तौ पदार्थे यद्यंपदशाक्यविशिष्टार्थेपरं एकदेशपदं च केवलविशेष्यविशेषणपरमितिशं
कितुरभिमानः इष्टसाधनतामात्रेणेति · वलवदनिष्टासाधनत्वाविशिष्टेष्टसाधनत्वांशेनेत्यर्थः विशे
षणरूपपदार्थैकदेशेनैवापरपदार्थस्यनान्वयइत्येवपदार्थः पदार्थेनान्वेतीत्यादेरर्थइति विशे

ष्यमात्रेण पदार्थान्वयस्थले प्रदर्शयन् इष्यति गौरिति। विशेष्यमात्रेणेति। गोमात्रेणेत्यर्थः विशेष
णानन्वयेपीति। अयोग्यतया गोत्वे मद्व्याभेदानन्वयेपीत्यर्थः। ननु विशेष्यानन्वये विशेषणेनापर
पदार्थान्वय इति विशेष्यांतरविशेषणभावापन्नविशेषणेन नापरपदार्थान्वय इत्यर्थः इत्येवोक्त
व्युत्पत्त्यर्थ इति शेषः। विशेषणे विशेष्यांतरविशेषणभावापन्नत्वनिवेशात् गवि प्रमेयत्वमित्यत्र प्र
मेयत्वे गोत्वविशिष्टान्वये गोत्ववतित्वस्याप्यन्वयोपपत्तिः विशेष्यमात्रेणेतरानन्वयो निर्वीजः वि
शेषणेनेतरानन्वय इति वीजमस्तीति यत इत्याहाऽन्यान्वितत्वेनेति। एकविशेष्यसंसर्गितयेत्यर्थः
उपस्थित्या पदार्थोपस्थितौ पदार्थतावच्छेदकस्य भानत्वेन निराकांक्षत्वात्। तस्य विशेष्यांतरेणान्व
ये आकांक्षाविरहात्। अत एव गौर्नास्ति पशुर्नास्तीत्यादौ गोत्वलोमादेः प्रतियोगितयाऽभावादि विशे
षणतया नान्वय इति भावः। विशेष्यांतरे विशेषणीभूतैकदेशान्वय इव विशेषणेपि विशेष्यतया तस्या
न्वये निराकांक्षत्वं द्रष्टव्यं। अत एव पशुर्न पशुरित्यादौ लोमादेः पशुभेदादि विशेष्यतया अनन्वया
द्योग्यत्वेपि न तथा प्रयोगः विशेषणं वलवदनिष्टाननुवंधित्वस्य विशेषणं सत् अस्तु शक्ति विषय

इत्यग्रिमेणान्वयः श्येनेबलवदनिष्टाननुबंधित्वबाधस्य तस्य विशेषणतयैव लिङर्थतायां विनिग
८० मकत्वेपि स्फुटत्वात्तदुपेक्ष्य विनिगमकांतरमाह बलवदिष्टेच्छायामिति । चिकीर्षानामकोपायेच्छास्थ
80 ल इत्यर्थः इष्टसाधनताप्रकारकेति इच्छाविशेष्यांशे तत्प्रकारकेत्यर्थः हेतुत्वकल्पनात् चिकीर्षा
साधारणोपायेच्छासामान्ये हेतुतायाश्च क्लृप्तत्वात् तद्विशेष्यक इति । इष्टसाधनतारूपविशेषघ
टित इत्यर्थः लिङ्शक्तेरिति । अनिष्टाननुबंधित्वविशेषणतया तस्य शक्यत्वे विधिवाक्याच्चिकीर्षानि
र्वाहार्थं इष्टसाधनत्वविशिष्टबलवदनिष्टाननुबंधित्वप्रकारकक्रियाविशेष्यकविधिजन्यबोधा
नंतरं क्रियांशे इष्टसाधनताप्रकारकज्ञानांतरस्य कल्पनीयतया गौरवादिति भावः न चेष्टसाध
नत्वस्यानिष्टाननुबंधित्वरूपक्रियाविशेषणविशेषणत्वेपि विशेषणपारतंत्र्येण तस्य क्रियायां
प्रकारत्वसंभवात्तन्मतेपि न ज्ञानांतरकल्पनमिति वाच्यं एवं सति क्रियातद्विशेषणयोरुभयोस्तत्प्र
कारतोपगमे नैव गौरवात् न च समानविशेष्यकबलवदनिष्टाननुबंधित्वप्रकारकज्ञानस्योपा
येच्छासामान्यहेतुत्वात्तुल्यानुयोग इति वाच्यं नरकजनकसुखसाधनकर्मणि नरके बलवद्दु

षववतोपिइच्छाभवत्येव· परंतुचिकीर्षैवनभवति अतोनप्रवृत्तिरितिचिकीर्षायामेवतज्ज्ञानस्यहेतु
त्वमित्याहुरायात्· नचैवमपिवलवदनिष्टाननुवंधित्वस्येष्टसाधनत्वविशेषणतयाशाक्यत्वेविधिवा
क्यजन्यज्ञानस्यक्रियायांतदप्रकारकतयाततः कथंचिकीर्षानिर्वाह इतिवाच्यं· चिकीर्षायांवलवदनि
ष्टाननुवंधित्वविशिष्टेष्टसाधनताज्ञानस्यैवहेतुतोपगमात्· विशेषणाभावज्ञानस्यापिसमानधर्मि
तावच्छेदकविशिष्टवत्ताज्ञानप्रतिवंधकतयाक्रियाविशेष्यकवलवदनिष्टानुवंधित्वज्ञानस्यजनक
ज्ञानविघटनेनचिकीर्षादिविरोधितासंभवात् अतएवहेतुतावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञा
नस्यतद्धर्मिकाव्यभिचारविशिष्टसामानाधिकरण्यरूपव्याप्तिविशिष्टज्ञानविरोधितयाव्यभिचा
रस्यहेत्वाभासत्वं·सर्वमेतदृष्टापाततः उपायधर्मिकेष्टसाधनताज्ञानस्योपायेच्छासामान्यसामग्रीत्वा
देवनिष्फलेचिकीर्षानुत्पादसंभवेनचिकीर्षायांवलवदनिष्टाननुवंधीष्टसाधनताज्ञानत्वेनकार
णतायाअप्रामाणिकत्वाच्चिकीर्षानात्मकेच्छायांवलवदनिष्टाननुवंधित्वज्ञानाहेतुत्वेपिलाघवेन
चिकीर्षायामेवक्रियाविशेष्यकतदननुवंधित्वज्ञानहेतुत्वौचित्यात्· इष्टसाधनत्वानिष्टाननुवं

धित्वयोर्लिङ्शक्यतायां विशेष्यविशेषणभावे विनिगमकासंभवात्पृथक्शक्तेरेवोचितत्वात् कृतिसा
८१ ध्यत्वेष्टसाधनत्वानिष्टाननुबंधित्वेषु पृथक्शक्तिं व्यवस्थाप्योक्तव्युत्पत्तिविरोधं परिहरतां मतं दू
षयितुमुपन्यस्यति केचित्विति। विशिष्टं। प्रवर्तकधर्मान्तरं इष्टविशिष्टमिष्टसाधनत्वं कृतिसाध्यत्वं
६। प्रकारकज्ञानहेतुतयेति यत्प्रकारिकाया इच्छायाः सा तत्प्रकारकज्ञानसाध्येति नियमानुरोधेन क्रियावि
शेष्यककृतिसाध्यताप्रकारकज्ञाने चिकीर्षाहेतुत्वस्यावश्यकतयेत्यर्थः। पृथक्शक्तौ युक्त्यंतरमा
ह। आख्यातत्वेनेति कृतिशक्ततयेति। तथा च सामान्यशक्त्यैव विधिजन्यबोधे कृतिसाध्यत्वभानं नि
र्वाहेण विशेषशक्तौ तत्र विशेषमानाभाव इति भावः। पृथगेव शक्यत्वात्। इष्टसाधनत्वमनन्तर्भाव्यै
व शक्यत्वात्। तदंशे। बलवदनिष्टासाधनत्वविनिर्मुक्ते इष्टसाधनत्वांशे विशेषणान्वये। हिंसात्वेन निषि
द्धस्य श्येनस्यान्वये। तथाभावे। पृथक्शक्यत्वे अत्र। बलवदनिष्टासाधनत्वे। विशिष्टशक्तेः स्वविशिष्टे
ष्टसाधनत्वशक्त्यैवान्तर्भावात् कृतिसाध्यत्वे प्रथमं दर्शितपृथक्शक्तियुक्तिं खंडयति वस्तुत इति कृती
ति। कृतिसाध्यत्वविशिष्टेष्टसाधनत्वज्ञानत्वेन हेतुत्वादेवोक्तनियमोपपत्तेरिति शेषः। उक्तनिय

मे विशेष्यानंतर्भावाज्जनकज्ञाने क्रियांशे कृतिसाध्यतायाः अप्रकारत्वेपीष्टसाधनत्वांशे तत्प्रका
रकतयैव तन्नियमनिर्वाहादिति भावः तत्रापि कृतिसाध्यत्वेपि विशिष्ट एव शक्तिः स्वविशिष्टेष्ट
साधनत्वशक्तावेवांतर्भावः द्वितीययुक्तिं दूषयति यत्त्विति आख्यातत्वेनेति कृतिराख्यातत्वरूपसा
मान्यधर्मेणैव विशिष्टायां लिङ्शक्येत्यर्थः विषयत्वेनैव विषयिना संबंधेनैव अन्वय इति स्या
दिति शेषः नसाध्यत्वेनेति साध्यसाधनभावसंबंधेन तथाच सामान्यशक्त्या न कृतिसाध्यत्वलाभ इ
ति भावः ननु लडादिस्थले तथाव्युत्पत्तावपि लिङ्प्रत्ययस्य साध्यसाधनभावसंबंधेन क्रियायां कृ
त्यन्वयबोधकत्वव्युत्पत्त्युपगमान्नानुपपत्तिरित्यत आह पृथगिति शक्त्यावश्यकत्वादिति व्युत्पत्तिभे
दस्य शक्तिभेदनियतत्वादिति भावः यद्वा लडादिस्थलेपि क्रियाकृत्योः साध्यसाधनभावः संबंधो
युक्तिसिद्धस्तदापि लडादिस्थले कृतिर्विशेष्या क्रिया विशेषणं साधनत्वं संबंधः लिङ्स्थले कृति
र्विशेषणं क्रिया विशेष्या साध्यत्वं संबंध इति व्युत्पत्तिभेदावश्यकताद्दृष्टव्या मतांतरमवतारयि
तुमेतन्मते दोषमाह मन्विति बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनतात्वावच्छिन्नशक्ते

लिङ्पदेन केवलविशेष्यतावच्छेदकीभूतेष्टसाधनत्वत्वावच्छिन्नेन यागान्वयस्योपगमे वक्ष्यमा
८२ णव्युत्पत्त्यंतरभंगोस्यैवेत्यर्थः तादृशीं व्युत्पत्तिमेव दर्शयति नरत्वावच्छिन्नान्वयबोधस्येति तादृशरूपावच्छि
न्नेस्वशक्तिस्तदवच्छिन्न एव पदार्थान्तरान्वयबोधजनकत्वस्येत्यर्थः निरूढत्वात् व्युत्पन्नत्वात् ननु न
87 देकदेशावच्छिन्ने इतरान्वयबोधकत्वस्येति शेषः गोर्द्रव्यमित्युक्तस्थले विशेषणे पदार्थान्तरानन्वयेपि
नेदृशव्युत्पत्तिभंग इति दर्शयति गोरिति द्रव्यत्वानन्वयेपि बाधेन द्रव्यस्याभेदेनानन्वयेपि गोत्वावच्छि
न्ने उपलक्षणगोत्वावच्छिन्ने धर्मिणि अन्वयात् इतरान्वयात् ननु गवादिपदेन गोत्वं परित्यज्य ध
र्मितावच्छिन्ने इतरान्वयबोधाजननात् शक्यतावच्छेदकानवच्छिन्ने इतरानन्वय इत्येव व्युत्पत्तिर
स्तु प्रकृते च शक्यतावच्छेदकतायाः शक्यतावच्छेदकैकदेशे इष्टसाधनतात्वसाधारणतया तन्मात्रावच्छिन्ने
न रूपेणान्वय इति न दविरोधः शक्यतावच्छेदकतापदंशे पर्याप्तानदवच्छिन्नेनैवेतरान्वय इति व्युत्पत्तिस्तु
नोपेयते दुःखासंभेदविशिष्टसुखत्वाद्यवच्छिन्नवाचकस्वर्गादिपदात्सुखत्वादिमात्रेणाप्यन्वयबोधश्च
तात्पर्ये सत्वे इष्यत एव अत एव जनकफलवाचकाख्यातेन जनकत्वमात्रेण चेतनकर्त्तृव्यापारोपि

बोध्यतेऽश्रोत्रियपदस्य विशुद्धिमात्रपुरस्कारेण प्रयोगादित्याचार्या इति चेन्न. एवं सति अस्वर्गेऽपि
सुखवति स्वर्गीति व्यवहारस्य मुख्यत्वापत्तेः यद्दि च दुःखसंभिन्नसुखस्य दुःखासंभेदरूपविशेषणे
न व्यावृत्त्या अशक्यत्वेन तत्र मुख्यस्वर्गपदप्रयोगस्यनापत्तिरित्युच्यते. तदा बलवदनिष्टाननुबंधिनिष्ट
स्यष्टसाधनत्वस्य तदननुबंधित्ववैशिष्ट्यानाक्रांतत्वेनाशक्यतया कथं लिङ्शक्त्यात द्बोधनिर्वाहः
एवं शक्यतावच्छेदकैकदेशपुरस्कारेण शाक्तबोधनेऽस्वर्गेऽणि नायं स्वर्गीति मुख्यप्रयोगस्यापि केवल
सुखत्वावच्छिन्नपरतयाऽयोग्यताप्रसंग इति शक्यतावच्छेदकैकदेशपुरस्कारेण शाक्तबोधोऽव्युत्प
न्नत्ववशाद्धीप्रकारीभूतधर्मे शक्यतावच्छेदकत्वपर्याप्त्यग्रहस्य तद्धेतुतया तादृशाकारेण बोधेन श
क्यतावच्छेदकैकदेशप्रकारकशाब्दानुत्पादनिर्वाहः अनधीतसांगवेदब्राह्मणे दोऽश्रोत्रियादिव्यवहारस्य
भाक्तत्वे एव विशेषणशून्यविशेष्यस्य विशिष्टवाचकपदाशक्यतया शाक्तात द्बोधस्य सुदूरपराहतत्वात्.
शक्तेः शक्यतावच्छेदकैकदेशप्रकारकबोधानुपयोगित्वे आचार्याणां प्रकारीभूतधर्मे तदेकदेशत्वक
थनबीजं चिंतनीयं इति पक्षे अस्मिन्निति एतद्दोषाद स्मिन्पक्षे अस्वरसमेक इत्यनेनोद्भावितमित्यर्थः नच

विशिष्टशक्तिपक्षस्यदर्शितविनिगमनाविरहेणदूषितत्वाद्बलवदनिष्टाननुबंधित्वेष्टसाधनत्वयोःपृथक्
८२ शक्त्युपगमेनोक्तदोषावकाशइतिवाच्यंबलवदनिष्टाननुबंधित्वेपृथक्शक्तौइष्टसाधनत्वंपरित्यज्यापि
कदाचिद्बलवदनिष्टाननुबंधित्वंप्रतीयितेतथाचबलवदनिष्टाननुबंधिनिष्फलेचैत्यवंदनादिक
८३ र्त्तव्यताबोधकस्यचैत्यंवंदेतेत्यादिवाक्यस्यप्रामाण्यापत्तिःनचैवमेवकारस्यान्ययोगव्यवच्छेदयोः
खंडशःशक्त्यानयोरेकंविहायापरमात्रबोधःकथंनभवतीतिवाच्यंविशेषणतयैवान्ययोगस्यतद्वि
शेषणतयैवव्यवच्छेदस्यबोधकतायाएवकारेव्युत्पन्नतयातस्यैकतरमात्राबोधकत्वात्अथवायत्र
विशकलितनानापदार्थेषुएकाशक्तिस्तत्रएकमपहायनापरबोधःयत्रचशक्तिभेदोक्षादिपदवत्त
त्रैकंपरित्यज्याप्यन्यबोधः।एवकारस्यचान्ययोगव्यवच्छेदयोःशक्तिभेदानुपगमान्नैकंविहायाप
रबोधःअतएवसूर्याचंद्रमसोभयनिष्ठपुष्पवंतपदशक्तेरेक्यान्ततोनकेवलसूर्यादिबोधःयथाच
विशकलितयोर्द्वयोःशक्यतावच्छेदकभेदेपिशक्तेरैक्यंतथोपपादितमन्यत्र।प्रकृतेचलिङ्पदस्यो
क्तधर्मयोरेकशक्तिस्वीकारेअनिष्टाननुबंधित्वमपहायेष्टसाधनत्वप्रतीतिर्नस्यात्शक्तिभेदस्वी

कास्यचानिष्टाननुबंधित्वमात्रबोधोपि दुरपवादः। यद्दिचोभयोः पृथक् शक्तावपि विधिप्रत्ययेन के
वलस्येष्टसाधनत्वस्यैव केवलं बलवदनिष्टाननुबंधित्वस्य बोधनं दुरापादं इष्टसाधनत्वविशेष्य
तापन्नक्रियायामेवानिष्टाननुबंधित्वं लिङा बोध्यत इति व्युत्पत्तेरिष्टसाधनत्वभासकसामग्र्यास
न्नानेऽपेक्षितत्वात्। अस्तु वा इष्टसाधनत्वानिष्टाननुबंधित्वयोर्विशिष्टकलितयोरेकैव शक्तिः सैवानिष्टा
ननुबंधित्वबोधिकेति नतपेष्टसाधनत्वं परित्यज्यत इत्युच्यते इष्टसाधनत्वबोधोपपयिकीचापराश
क्तिस्तन्मात्रएवेति तया केवलमपीष्टसाधनत्वं प्रत्याय्यते। अथ तयोर्विशिष्टकलितयोः शक्यत्वे नकलंजं
भक्षयेदित्यादौ विशिष्टाभावबोधानुपपत्तिः विशिष्टस्य पदार्थत्ववाक्यार्थत्वयोरभावादिति चेत् का
क्षतिः बलवदनिष्टानुबंधित्वानुमानार्थं विशिष्टाभावरूपतल्लिंगबोधस्योपगतत्वात् साक्षादेव तद्बो
धोपपत्तौ च नितरां समीहितसिद्धेः एवं पृथक् शक्तावपीष्टसाधनत्वबलवदनिष्टाननुबंधित्वयोः
सामानाधिकरण्यसंबंधेन परस्परान्वयात् विशिष्टलाभः संभवतीति शक्तिभेदपक्षः परिच्छिद्य
तेतदापि उभयोर्विशिष्टकलितयोरेकशक्तिरेव कल्पयितुं युज्यते न तु शक्तिद्वयं गौरवात् न च तथा

सतिवलवदनिष्टाननुवंधित्वांशापरित्यागासंभवेनश्येनविधेरप्रामाण्यापत्तेर्गौरवमकिंचित्करमि
८४ तिवाच्यं॰ तदपरित्यापितद्विधेःप्रामाण्यस्योपपादनीयत्वादितिभावः अतिप्रसंगादितिमधुविषसंपृ
क्तान्नंभुंजीतेत्यादिवाक्यस्यापिप्रामाण्यप्रसंगादित्यर्थः तस्यापिवलवदनिष्टमरणंप्रतिस्वसंपाद
84 नीयकारणेनरव्यवधानेनाजनकत्वादितिमद्विषव्यवधायकमरणकारणेपिवलवतामरणद्वे
षेणवलवद्द्वेषजननात्तादृशाद्वेषविषयतादृशाकारणप्रत्येवतादृशभोजनस्यजनकत्वान्नतद्विधेः
प्रामाण्यप्रसंगः द्वेषविषयेदुःखत्वस्यानिवेशनीयत्वादित्युच्यते तदाश्येनविधेरप्रामाण्यप्रसंगोदु
र्वारएवनरकसाधनस्यवलवद्द्वेषविषयतयातत्साधनस्यश्येनस्यवलवद्द्वेषविषयजनकत्वात्॰
अतोद्वेषविषयेदुःखत्वनिवेशनस्यावश्यकतयोक्तातिप्रसंगस्यदुर्वारत्वेवेति भावः ननुसिद्धांतद्वय
एवापरितोषेकः सिद्धांतोग्रंथकाराभिप्रेतइत्याकांक्षायांग्रंथकाराभिप्रेतंसिद्धांतांतरंप्रकाशयति
तथाचेति॰ वलवद्द्वेषविषयत्वविवक्षयेतिवलवदनिष्टपदेनेत्यादिः अयंदोषःश्येनविधेरप्रामा
ण्यप्रसंगरूपः तथाविवक्षायांयथावलवदनिष्टाननुवंधित्वस्यश्येनेऽवाधस्तथादर्शयति॰ अभिच

रन्नितीति अभिचरन् श्येनेन यजेतेत्यर्थः वैरिवधकामनाया इति॰ वैरिवधगोचरोत्कटकामनाया
इत्यर्थः अभिचारपदार्थस्येत्यादिः नियोज्यविशेषणत्वेनेति॰ विध्यर्थे वलवद्द्वेषविषयासाधनत्वघ
टकवलवद्द्वेषेण पुरुषस्याश्रयतयान्वये आश्रयतावच्छेदकतया भासमानत्वेनेत्यर्थः अस्यास्तथा
भानंच विशिष्टवैशिष्ट्यवोधस्थले विशेषणस्य वैशिष्ट्यप्रतियोगितावच्छेदकत्वभाननियमात्
अत्र द्वेषे पुरुषवैशिष्ट्यस्याधेयतारूपत्वात् तादृशवैशिष्ट्यप्रतियोगितायाएव चाश्रयतात्मकत्वा
दिति भावः यदंत्यस्य यः पुरुष इत्यादिः वैरिवधमिच्छेदिति वैरिवधगोचरोत्कटकामनावान्भवेदित्य
र्थः तदा श्येनेन यजेतेति स इत्यादिः श्येनयागस्तदीयतदातनवलवद्द्वेषविषयदुःखासाधनमि
त्यर्थः वाक्यार्थः पर्यवसितवाक्यार्थः समानकालीनयोरेवैकस्यापराश्रयतावच्छेदकत्वादिति भावः
तथाच पुरुषांतरस्य तस्यैव वा कालांतरे हिंसाजन्यनरके वलवद्द्वेषसंभवेपि यदा यस्य वैरिवधे
उत्कटकामना तदा तस्य वैरिवधसाधनजन्यनरके वलवद्द्वेषानुदयात् तत्कालीनतदीयद्वेषवि
षयदुःखांतरानुवंधित्वं वधसाधनश्येने अक्षतमेवेति तद्दर्शितवाक्यार्थवाच इति श्येनविधेः

प्रामाण्यमनपवादमेवेति दर्शयति न चेति तत्काम्यस्य वैरिवधगोचरोत्कट कामनाविशिष्टस्य ब
८५ लवत्त्वलवद्द्वेषविषयः। तत्र तादृशद्वेष एव कथं न भवतीत्याकांक्षायामाह प्रबलेति। तद्गोचर
९६ प्रबलरागस्य तत्सामग्र्या वा तज्जन्यदुःखगोचरबलवद्द्वेषविरोधित्वादिति भावः। इदमापा
ततः। उत्कटरागद्वेषयोस्समानविषयकयोरेव विरोधः प्रामाणिकः। ननु पापगोचरबलवद्रा
गतज्जन्यदुःखगोचरद्वेषयोरपि। अस्तु वा तद्गोचरप्रबलरागेण तज्जन्यतया ज्ञाते नरके बलवद्द्वे
षविरोधः तादृशरागदशायामपि तज्जन्यतयाऽज्ञाते नरकविशेषे नरकान्तर इव बलवद्द्वेषोऽनुभ
वसिद्ध एव। अभिचरन्नित्यस्य वैरिवधजन्यनरकगोचरद्वेषाभावविशिष्ट इत्यर्थकत्वे तु नासमं
जसमिति ध्येयं। ननु यज्ञांगपश्वालंभनवत्स्वरूपेन जन्यहिंसापि न मा हिंस्यादिति निषेधविषयः
विशेषविधिविरोधभयेन सामान्यनिषेधविधेस्तदितरपरताया व्युत्पत्तिसिद्धतया मा हिंस्या
दिति सामान्यनिषेधविधेर्विध्यविषयहिंसापरत्वादिति तदविरोधापादर्शितायासोवध्येत्यत आ
हात एवेति वक्ष्यमाणयुक्तेरेवेत्यर्थः। एकविषयविधिनिषेधयोरिति। सामान्यविशेषरूपाभ्यामेकस्य

यादृशविधिनिषेधविषयतातादृशविधिनिषेधयोरित्यर्थः तत्संभवात्सामान्यविशेषन्यायेनसामा
न्यपरवाक्यस्यविशेषेतरपरत्वसंभवात्वधस्येतिसामान्यरूपेणनिषेधकवाक्यविषयहिंसायाऽइत्य
र्थः अविधानात् कर्तव्यत्वेनरूपेणेत्यादिविधिनाऽबोधनात् अपितुवधसाधनस्यैवतथाबोधना
दितिशेषः तथाचरूपेणजन्यवधस्यविशेषविध्यविषयतयामाहिंस्यादितिनिषेधस्यवैधेतरहिंसा
परत्वेपिनिषिद्धतयानरकसाधनत्वमस्त्येवेतितद्रूपेणस्यबालादिनिष्ठनरकप्रयोजकत्वमावश्यक
मितिकश्चिन्नरीत्यैवरूपेणविधेःप्रामाण्यमितिभावः अथसामान्यविशेषरूपाभ्यामेकविषयकनिषे
धविधिवाक्यस्थलेसामान्यपरवाक्यस्यविषयसंकोचेविरोधेनविशेषवाक्येप्रामाण्यान्यथानुप
पत्तिरेवबीजं एवंचप्रकृतेउभयोरेकविषयत्वाभावेपिविशेषविधेःप्रामाण्यानुपपत्त्या निषेधविष
यहिंसायांवैधेतरत्ववद्बोधकर्माधिकारभूतकामनाविषयेतरत्वविशेषणमप्यावश्यकमितितद्रूप
नस्यवधजन्यनरकप्रयोजकत्वमितिचेन्नयथोक्तरीत्यैवोपपत्तावीदृशसंकोचस्यसामान्यविशे
षभानस्थलीयव्युत्पत्तिसिद्धस्यान्याय्यत्वात्रूपेणोन्यकर्तृकखड्गपातादिरूपहिंसाजनकएवन

८६ तुर्हि साऽतस्तस्य नरकप्रयोजकत्वेपि नरकजनकत्वं मा हिंस्यादित्यनेन हिंसाया एव नरकजनकत्वबो
धनादित्यन्येषां मतेननुश्येनद्रव्यादिशंकां योजयति· नन्विति· वैरिवधत्वमस्येवेति· साक्षात्स्वरं परा
साधारणमरणफलकत्वस्येव हंति हिनस्त्यर्थप्रवेशादन्यथा विषप्रयोगाद्यसंग्रहादिति भावः· तदोष
98 तादवस्थ्यमिति· श्येनस्य हिंसात्वेन तद्विधेरप्रामाण्यतादवस्थ्यमित्यर्थः· मूलेऽनुनिष्पादीति· स्वाव्य
वहितोत्तरकालभावीत्यर्थः· मरणफलेऽनुनिष्पादित्वविशेषणेन खड्गाभिघातादेरपि न हिंसात्वा
त् मरणपूर्वं दोषत्रयसंनिपातस्यावश्यकतया आयुर्वेदसिद्धत्वात् खड्गाभिघातादिना दोषत्रय
संनिपातं जनयितेव मरणजननात् तस्य खड्गाभिघातादिव्यवहितकालभावित्वादित्याशंक्य निरा
करोति· नचैवमिति· अव्यवहितमरणफलकत्वाभावादिति· नच खड्गाभिघातद्वितीयक्षणोत्पन्न
संनिपातोत्तरद्वितीयक्षणे मरणोत्पत्तौ नदव्यवहितपूर्वक्षणे खड्गाभिघानसत्वान्मरणं खड्गाभि
घातोत्तरवर्तिभिवस्येवेति वाच्यं संनिपातस्य प्राणक्रियामजनयित्वा प्राणशरीरसंयोगनाशरूपं
प्राणशरीरविभागरूपं वामरणं प्रतिजनकत्वासंभवेन संनिपातद्वितीयक्षणे मरणसंभवात्·

संन्निपातकालेपूर्वंवाप्राणवेगादितःप्राणक्रियोत्पत्तौतदधीनमरणेसन्निपातस्याप्रयोजकत्वाप
त्तेःक्रियपाविभागस्यविभागेनवापूर्वसंयोगनाशस्यसन्निपातादिकंविनाजननासंभवात्.समस्य
मानानुनिष्पादिपदस्यव्याख्या अव्यवहितंयस्येतिसअनुनिष्पादिमरणफलकइतिशेषःताद
शोव्यापारोयस्येतिसइत्यादिःतादृशःअनुनिष्पादीव्यापारःफले.मध्यमपदलोपिसमासेतिलुप्त
मध्यवर्तितादृशेतिपदघटितबहुव्रीहिगर्भबहुव्रीह्याश्रयणात् ननुअनुनिष्पादिमरणफलकोयो
व्यापारइतिकर्मधारयाश्रयणादित्यर्थः.अनुनिष्पाद्यर्थकतादृशपदमनंतर्भाव्यबहुव्रीहिद्व
याश्रयणेअनुनिष्पादिमरणफलकसंनिपातरूपव्यापारप्रयोजकखड्गकारादिव्यापारेऽत्र
तिप्रसंगइतितत्पुदंतर्भावः।तदंतर्भावेचमरणरूपकलाव्यवहितपूर्ववर्तिव्यापारात्मकफला
व्यवहितपूर्ववर्तीव्यापारोहिंसेत्यर्थपर्यवसानात्खड्गादिकर्तृव्यापारस्यचातिव्यवहितसंनिपा
तफलकत्वान्नातिप्रसंगःखड्गाभिघातादेस्तुस्वाव्यवहितभाविसंनिपातफलकत्वात्तत्रलक्षण
समन्वयःरूपेनव्यापारस्यापूर्वस्यखड्गाभिघाताघात्मकवधरूपफलेनस्वोत्पत्तिद्वितीयक्ष

णे विनाशान्न मरणाव्यवहितपूर्ववर्त्तित्वं मरणाव्यवहितपूर्ववर्त्तिसन्निपातस्य च तच्छ्येनाव्यवहित
८७ भाविव्यापारत्वमिति तच्छ्येनेऽतिप्रसंगः नच मरणरूपे सन्निपातरूपे च फले खड्गाद्यवहितभावित्वसंभ
87 वात् खड्गाद्यव्यवहितफलकव्यापारस्य खड्गादेश्च हिंसात्वापत्तिरिति वाच्यं मरणफलकव्यापारे तत्फ
लकव्यापारे च द्रव्यान्यत्वविशेषणस्य प्रवेश्यत्वात्। नन्वथेत्यादिनोक्तलक्षणे एवं सति गौरवादित्यनेन
मरणोद्देशेनानुष्ठीयमानत्वस्याधिकस्य प्रवेशाद्गौरवं मूलकृता दर्शितं न संगच्छते तत्प्रवेशेऽनुनिष्पा
दीति विशेषणाप्रवेशेन विशेषणाधिक्यविरहादित्यत आह त्र्येणपाकेति। मरणसंग्रहपक्षे। मरणानु
कूलखड्गाभिघातादेर्मुख्यहिंसापदार्थत्वाभावपक्षे तत्संग्रहपक्ष इति विलंवेन मरणेऽपि हस्तछेदत्व
दयभेदादिकर्त्तुः संपूर्णप्रायश्चित्तार्हतया मुख्यहिंसापदार्थत्वमिष्टमेवेति पक्षद्वयार्थः तद्विशेषणेति।
अनुनिष्पादीति विशेषणेत्यर्थः नत्रेष्टापत्ताविति अन्योद्देशाधीननाशपक्षे पादेर्मुख्यहिंसात्वाभावो
पगम इत्यर्थः तोद्देशव्यापारकर्त्तुरर्धप्रायश्चित्तभागित्वादिति भावः तत एवेति सर्वस्य फलाव्यवहि
तव्यापारार्थकधातोरव्यवहितफलकव्यापारार्थकत्वादेवेत्यर्थः अतिप्रसंगभंगे। मरणोद्देशा

नधीनकूपादिखननादावतिप्रसंगवारणे किमुद्देश्यत्वपर्यंतेनेति॰ किंमरणोद्देशेनेत्यादिविशेष
णेनेत्यर्थः मरणमनुद्दिश्यानुष्ठितस्यानुनिष्पादिमरणफलकव्यापारस्यमुख्यहिंसात्वेपितत्कर्तुः
प्रायश्चित्तह्रासो वाचनिक इतिभावः नन्वेवमित्यादिशंकाग्रंथेनानुनिष्पादित्वगर्भलक्षणंमरणो
द्देशेनानुष्ठितात् खड्गाभिघातादितोयत्रविलंबेनमरणंतत्रतद्व्यापारकर्तुः संपूर्णप्रायश्चित्तभागि
नोऽसंग्रहेण दूषितेतादृशलक्षणकत्रीसिद्धांतिनाचतद्गर्भं उद्देश्यत्वगर्भलक्षणंदूषितंतथाचशंकि
तुः कीदृशलक्षणमभिप्रेतमित्याकांक्षायांतद्गर्भोद्देश्यत्वगर्भलक्षणस्यैवनिर्दोषत्वंसंपादनीय
मित्याशयेनतल्लक्षणस्यैवतदभिप्रेतत्वंदर्शयतिलाघवादितिअव्यवहितमरणफलकव्यापा
रोहिंसेतिलक्षणेअव्यवहितत्वादेर्द्विधानिवेशात्तदपेक्षयामरणरूपफलोद्देशाधीनव्यापारोहिं
सेतिलक्षणस्यातिलघुत्वादित्यर्थः अतिप्रसंगानापादकत्वादितिविवक्षितमरणफलकखड्गाभि
घातादिकर्तुर्हितत्वाद्यभावप्रसंगवारकत्वादित्यर्थः उद्देश्यत्वगर्भमेवलक्षणमितिनत्वतिप्रसं
गादिति॰ मरणानुद्देशेनक्षिप्तनाराचाद्धतेब्राह्मणेहिंसात्वापत्तेरित्यर्थः नचाव्यवहितफलावच्छि

५८ न्नव्यापारस्य धात्वर्थेन व्यवस्थापनाद्व्यवहितफलकव्यापारसाधारणोद्देश्यत्वगर्भलक्षणसं
४४ भवइति वाच्यं· तेतुल्लंकयणादिदशायां पञ्चत्वीत्यादिप्रयोगस्य वारणाय पश्चादेरव्यवहितविक्ले
श्लेषादिफलकव्यापारार्थकत्वेपि हिंसार्थकधात्वर्थफलाव्यवधानेन निवेश्यते मरणमनुद्दिश्य कूप
खननादिकर्त्तरि हन्तव्यपदेशस्य व्यापारस्य मरणोद्देश्यतानधीनतयैव वारणं। मरणोद्देशेन तादृशव्या
पारकर्त्तरि च तादृशव्यपदेशादृष्ट एवेत्याशयात्। मूले एवमिति। अव्यवधानस्य लक्षणे प्रवेश इत्य
र्थः। तत्र हन्तव्यपदेश इति। विलम्बभाविमरणफलकखड्गाभिघातादिकर्तरि हन्तव्यवहार इत्यर्थः
गौण इति। अनुनिष्पादिमरणफलकव्यापारवाचकत्वेन धातोस्तुल्यप्रायश्चित्तप्रयोजकतया
न व्यापारस्य देशो मरणोद्देशेनानुष्ठीयमाने साक्षात्परंपरासाधारणमरणफलकव्यापारे गौण्या
वृत्त्या निष्पाद्य इत्यर्थः। उद्देश्यताघटितार्थशक्तिरव्यवधानघटितार्थे वेत्याकांक्षायां विनिगम
कं चेत्। लाघवं अव्यवधानघटितार्थे· यद्यपि अव्यवधानादेर्द्धि धातौ निवेशे न तत्र शर्मेर्थे गौरवं वि
परीतमेव लाघवं मिश्रेणैवं किन्तु भावविवर्णनावसरे मिहितं। तथापीदानीं सिद्धान्तिनोऽपमनि ५८

प्रायः अव्यवधाना गर्भस्य हंतृत्वार्थत्वे उद्देश्यतांतर्भावे यदा गोमरणमुद्दिश्यायं कूपं खनतीति प्रयुज्यते
तदायमिदानीं गां हंतीति प्रयोगापत्तिः। यदि च मरणजनकव्यापारो मरणोद्देशेनानुष्ठीयमानस्तदर्थः
कूपखननादिव्यापारश्च मरणोद्देशेनानुष्ठितोपि मरणप्रयोजकोपि च न मरणजनकः तद्दशायां हंती
तिप्रयोगाभावेन तस्यान्यथासिद्धिकल्पनादित्युच्यते तदा मरणजनकत्वमेवानुनिष्पादिमरणफल
केत्यस्यार्थः बहुव्रीहिद्वयेविनैव च खड्गाभिघातादेः संग्रहः। तस्य संनिपातादिव्यवहितत्वेपि तद्द्वा
रा मरणजनकत्वात्· तदानीं हंतीति व्यपदेशेन तत्रानन्यथासिद्धस्योपपादनीयत्वात् अतएव
व्यवहितविघ्नध्वादिफलकोपि तुषबुसादिप्रक्षेपः पच्याद्यर्थः तत्रापि तंडुलकंपणादिव्यावृत्तस्य
फलजनकत्वस्यैव निवेशनीयत्वादित्यधिकस्य फलोद्देश्यकत्वस्य प्रवेशे गौरवमिति प्रायश्चि ननु
ल्यताद्येमित्यादिसिद्धांतग्रंथमध्ये लेवतन्मते अनुपपत्तिमाशंक्य निराकुरुते आलोके न चैवमिति·
क्वचिदालोके एवमितीत्यनंतरं प्रायश्चित्ते तीति पाठः स तु समीचीन एव· एवमितीत्यनेनैव एव
मित्यादिसिद्धांतग्रंथपर्यंतधारणमिति केचित् एवं· प्रायश्चित्तनतुल्यतार्थमाहिंस्यादित्यत्र हि न

स्तेर्मरणप्रयोजकमरणोद्देशाधीनव्यापाररूपगोणार्थपरतायाआवश्यकत्वे। श्येनस्य हिंसात्वे· श्ये
८९ नस्यापि निषेधविषयगोणहिंसात्वे· श्रुत्यर्थबाधनाद्वस्थमितिनरकविशेषसाधनत्वरूपश्रुत्यर्थबा
89 धानुद्धार इत्यर्थः पूर्वपक्षास्कंदः पूर्वपक्षनिराकरणं· एतस्य श्येनस्य वधकामकर्तृव्यत्वेन शत्रुमरणा
नुकूलव्यापारकामकर्तव्यतया विधिबोधितत्वेन· मरणोद्देशेन मरणविशेष्यककामनया· अक्रिय
माणत्वादिति· तथा च श्येनस्य निषेधविषयतावच्छेदकगोणहिंसात्वमपि नेति न श्रुत्यर्थबाध इति
भावः मरणव्यापारकामनायामपि· मरणव्यापारकामनया श्येनानुष्ठानेपि· मरणकामनाऽस्यैवः
मरणकामनाधीनत्वमस्येव शान्तो मरणकामनया यत्र न कर्तृकविषभक्षणेछानदिछुयाचान्ने
विषप्रयोगगोचराप्रवृत्तिस्तत्रत्यविषप्रयोगसाधारणापायाधीनत्वस्य साक्षात्परंपरासाधारणस्यै
वविवक्षणीयत्वादिति भावः अन्यथा· मरणकामनां विना तत्र मरणानुकूलव्यापारे शत्रुमरणेस्व
तोसुंदरे शत्रुसंपाद्यदुःखनिवृत्तिरूपस्वतःसुंदरफलकामनया इच्छासंभव इति भानः इत्यस्व
रसादाह वस्तुतस्त्वितीतिपाठः श्राहे स्यस्य श्येनव्यावृत्तमदृष्टाद्वारकत्वघटितनिषेधविधिविष

यत्तावच्छेदकरूपांतरमित्यादिः क्वचित्तु द्वित्यस्वरसादाह प्रायश्चित्तेतीति पाठस्तदनंतरं ननुरूपेन
स्य हिंसापदावाच्यत्वेपीत्यादिरवतारणिका· तथासति एवमितीत्यनंतरं न प्रायश्चित्तेतीतिपाठ
धारणं किंतु न तदनंतरमेव न चैवमितिशंका एवं सति मूले एवमित्यादिशंकानाद्येत्यादिशं किंतुः क
स्यचित्पूर्वपक्षिणः अपित्वव्यवधानमनिवेश्यैवोद्देश्यतागर्भलक्षणस्य प्रकृतेन साधारण्यं वारयितुः
कस्यचित्सिद्धांतिनस्तदभिप्रेतरूपेन वारणप्रकारं स्फुटयितुमालोककृतामाशंकापूर्वकं तन्निरा
करणं न चैवमित्यादिनेत्यभिप्रायः स्वरूपेनेन· एवमित्यादिना विलंबितमरणफलकखड्गाभिघातादिकर्त
रि हेतुत्वव्यपदेशानुपपत्तिर्यश्चाव्यवधानागर्भोद्देश्यतागर्भलक्षणवादिना सिद्धांतिनाप्रदर्शितान
त्समाधानस्याव्यवधानगर्भलक्षणकर्त्रीमणिकृताप्रायश्चित्ततुल्यतार्थमित्यादिना तद्व्यपदेशस्य
गौणत्वमंगीकृतं· अव्यवधानमनिवेश्य स्वरूपेन स्य मरणोद्देशेनाक्रियमाणतया वारणसंभवेन्न
व्यपदेशस्य गौणत्वोपगमो न संगच्छते अव्यवधानघटितेलाघवाभावेन तन्मुख्यत्वानुरोधेना
द्देश्यत्वगर्भलक्षणस्यैवोचितत्वादित्यालोच्याव्यवधानागर्भलक्षणे उक्तरीत्या स्वरूपेन वारणमे

९० वदुर्धर्षमिति यद्दर्पोल्लोककर्तृतानादरात्मत्वं संगमितेन न तु मरणव्यापारेत्यादिना श्येनस्य हिंसात्वमि
तिमुख्यार्थः अव्यवधानाभिनिवेशाद्यत्यादिः इत्यस्वरसादिति अव्यवधानागर्भलक्षणपक्षेणताद्दृशा
90 स्वरसवीजसत्वादित्यर्थः आहेति अव्यवधानगर्भतायां आवश्यकत्वमभिप्रेत्योक्तस्य स्वदेहं तत्व्या
पदेशास्य गौणत्वमुपाजगामेत्यर्थः व्रणपाकपरंपरया मरणस्थले प्रायश्चित्ततुल्यतया नरकसा
धनतावच्छेदकगर्भे अव्यवधानाभिनिवेशासंभवात् अत्यर्थे वाधानुद्धारात्तदनुरोधेनेवादृष्टाद्वार
कत्वघटितनरकजनकतावच्छेदकधर्मनिरुक्तिमवतारितवान् नन्वित्यादिनेति सामंजस्यं अनुद्देशाकृ
त इति। इष्टभार्यामरणमनुद्दिश्य कृत इत्यर्थः। उद्देशाकृत इति। इत्युच्यत इति शेषः। असंभवः। वाधेनो
क्तार्थासंभवः। वाधमेव विवृणोति इष्टेति संभवमुपेत्य दोषमाह श्येनतुल्यत्वाच्चेति। येन पूर्वपक्षिणा
श्येनस्य हिंसात्वमुपेत्यादृष्टाद्वारकत्वविशेषणवैयर्थ्यमाशंक्यते तेन न ससमीहितत्वाभ्युपगमस्यापि मरणोद्दे
शेनानुष्ठितस्य हिंसात्वोपगसंभवादित्यर्थः तथापीति नोक्तदोषावकाश इत्यग्रिमेणान्वयः अदृष्टा
द्वारकत्वविशेषणेन हि नस्यार्थप्रविष्टमपि कामकृतब्रह्मणवधाद्यादृशं नरकं वधस्य तादृशनरकसा ९०

धनतायामुपयोगीति प्रकृते तादृशनरकसाधनहिंसाविशेषलक्षणे तदुपादानस्य सार्थकतेति स
माधास्यते। साक्षात्परंपरासाधारणमरणानुकूलव्यापारमात्रं न हिंसेति पूर्वग्रंथस्य हिंसापदस्य हिं
सासामान्यपरत्वे हिंसासामान्यलक्षणमेव प्रकृते स्यादिति तत्समाधानाविरुद्धत्वेनेति तादृशाहिंसापदस्य
नरकविशेषसाधनहिंसाविशेषार्थकतामाह मरणानुकूलेति। अन्यथेति तादृशाहिंसापदस्य हिंसा
पदार्थसामान्यपरत्व इत्यर्थः। उक्तातिप्रसंग इति गवादिमरणानुद्देशेन कूपखननादेो हिंसात्वापत्तिरूप
इत्यर्थः इष्टापादनस्य इष्टापत्त्युद्भावनस्य। अनुत्तरतापत्तेरिति तस्यापि हिंसापदार्थत्वस्यानिष्टानाव
हत्वात् तत्कर्तुः पापविशेषस्यैव च तथात्वादिति भावः न च तस्य हिंसात्वे हिंसासामान्यजन्यपापं तत
स्यादिति वाच्यं चुल्लीपेषण्यादिपंचसूनानुष्ठानादविशेषेण मरणानुद्देश्यककूपादिखननादपि हिं
सासामान्यदोषस्येष्टत्वात् न हि गृहस्थस्य मरणानुद्देश्यकंडनीपेषण्यादितो न पापं जायते तद्दर्थ
मेव पंचयज्ञाचरणात्। नरकविशेषजनकताप्रयोजकं रूपमिति। मरणानुकूलव्यापारकर्तुर्यो दृशा
व्यापारात्संपूर्णे नरकं तादृशव्यापारविशेष इत्यर्थः न तु यादृशरूपेण हिंसायां नरकसाधनता तादृश

रूपमिह निर्वाच्यमित्यर्थः मरणोद्देशेनानुष्ठीयमानत्वादिघटितरूपेण तज्जनकत्वे मानाभावात् मर
६१ णानुकूलव्यापारत्वमात्रेण तज्जनकत्वात् खड्गाभिघातादेः कर्त्तरीवाकर्त्तरि नरकविशेषोत्पादकता
५१ वारणाय कर्त्तृतासंबंधेनैव नरकविशेषहेतुताया उपगंतव्यामरणोद्देशेनानुष्ठीयमानत्वादिविशेष
णत्वान्यव्यापारस्य निर्वाच्यकर्त्तृतासंबंधेन व्यापारिणि पुरुषेऽसत्वेन नरकानुत्पादकत्वनिर्वाहात्:
मरणानुद्देश्यकस्यैव तदुद्देश्यकस्यापि अदृष्टद्वारा मरणजनकस्य व्यापारस्यालक्ष्यतामुपपादय
ति· नन्वेत्यादिना· नतत्· तादृशरूपं· तदनुकूलव्यापारमात्रं· मरणानुकूलव्यापारसामान्यं· तादृशव्या
पारमात्रं कुतो न तादृशं रूपमित्यत आह उक्तव्यापारो हीति· मरणानुकूलव्यापारमात्रं हीत्यर्थः· नरक
विशेषहेतुः संपूर्णं नरकोपधायकः अनिष्टानिवंधने मरणोद्देशं विनानुष्ठितेऽतिप्रसंगात् संपूर्णेन
रकोपधानप्रसंगात् अत्रेष्टापत्तिं परिहरति· तत्रार्थफलत्वश्रवणादिति· संपूर्णफलजनकत्वे व्यापा
रिणः संपूर्णप्रायश्चित्तभागितापत्तेरिति भावः ननु मरणोद्देशं विना अनुष्ठितो व्यापारोपि कथं संपूर्ण
नरकं नजयति ब्राह्मणं न हन्यादिति विधिना ब्राह्मणादिमरणानुकूलव्यापाररूपस्य कर्मकारको ६१

न्वितधात्वर्थस्यकर्तृतासंबंधेनतादृशनरकसाधनताबोधनात्· मरणानुद्देशेनानुष्ठितस्यापि
व्यापारस्यमरणरूपफलानुपरागेणव्यापारविषयककामनाधीनकृतिविषयत्वसंभवात्तादृश
कृतिमतस्तत्कर्तृत्वादित्यतआहतद्व्यापारकर्तुरेवेति· मरणविशिष्टव्यापारकर्तुरेवेत्यर्थः नरक
विशेषभागित्वादितिअयंभावः ब्राह्मणंनहन्यादित्यत्रब्राह्मणमरणविशिष्टव्यापारनिरूपितमेवक
र्तृत्वमाख्यातेनबोध्यतेनतुतादृशफलोपलक्षितकर्तृत्वंचेदस्थलेविशिष्टान्वयस्यौत्सर्गिकत्वा
त्विशिष्टकर्तृत्वंचविशेषणकृत्त्वघटितमितिनमरणकामनानधीनव्यापारविषयककामना
धीनाकृतिर्विशिष्टकर्तृत्वनिर्वाहिका एवंचयत्रविशिष्टकर्तृत्वमाख्यातार्थः तत्रतादृशकर्तृत्वसंबंधे
नैवनरकसाधनत्वंनिषेधविधिनाबोध्यतेमरणानुद्देशेनानुष्ठितव्यापारस्थलेचव्यापारकर्तरिवि
शिष्टनिरूपितकर्तृतासंबंधेनतदनुकूलव्यापारासत्त्वान्नतादृशनरकोत्पादकृतिमरणोद्देशेनकृ
तएवव्यापारः कर्तरिनरकविशेषमुत्पादयतीतिनानुमरणोपलक्षितकामनयाऽनुष्ठितव्यापार
स्यकर्तानकथंमरणकर्तानिदुपधायककृतिमत्त्वस्यैवतत्कर्तृत्वरूपत्वात्· मरणकामनानधीनना

६२ राचक्षेपादिकृतेरपिमरणोपधायकत्वसंभवादित्यतआह कर्तोचेति· नत्कर्तोचेत्यर्थः तदिछा
९८ पूर्वकतद्विपर्ययेकृतिमानितितदिछाजन्यतदुपधायककृमन्मात्रमित्यर्थः प्रत्ययार्थकृतोधात्व
र्थस्यविषयत्वोपधायकत्वोभयसंबंधेनैवान्वयात्तदिछानधीनकृतेश्चतद्विषयकत्वादुक्तोभय
संबंधेनक्रियानन्वयितयाकर्तृप्रत्ययेनाबोधनात् क्रियाकर्तृत्वरूपत्वासंभवादितिभावः एवंचम
रणकामनाधीनतदनुकूलव्यापारविषयककृतेर्मरणविशिष्टनिरूपितकर्तृत्वरूपतेतिफलितं
तत्कर्तृत्वशरीरेतद्विषयकत्वप्रवेशेयुक्तिमाह अतएवेति· तत्र·मरणकामनाविरहस्थले·मत्तोम
तमिति· अस्यमरणंवधोवेतिशेषः। नत्विति·नांतरीयकेकर्मणिमयानकृतमित्तदिति व्यवहारेकृ
तिजन्यत्वमात्रस्यकृतशब्देनबोधनेतद्बाधेनताहशव्यवहारोनस्यादितिविषयताविशिष्ट
जन्यत्वमेवक्तप्रत्ययार्थः एवंचहिंसायाः कर्तृत्यत्रापिकर्मत्वार्थकषष्ठ्याविषयिताविशिष्टंजन
कत्वमर्थः कर्मानुशिष्टधात्वर्थेतरप्रत्ययेनधात्वर्थनिरूपितपादश्चार्थः कर्मविशेषणतयाप्र
त्याय्यतेतत्तुल्यवितिवेद्यार्थस्यकर्मनिरूपितस्यधात्वर्थविशेषणतयाकर्मविहितसुपप्रत्य ६२

येनप्रतिपादननियमात्। एवंचवधंकरोतिवधस्यकर्तृत्वादौमरणविशिष्टव्यापारविषयकत
ज्ज्ञानककृतिबोधात् हंतिहन्यात् हंतेत्यादावपितादृशविशिष्टव्यापारविषयकतज्ज्ञानककृतिप्र
तीतिरविवादावधंकरोतीत्यादिशब्दे हंतीत्यादेर्विवरणादितिभावः। उक्तलक्षणेमरणोद्देशेनानु
ष्ठीयमानत्वविशेषणस्यनरकविशेषोपधायकतोपयोगित्वेनसार्थकत्वमुपपाद्यतदृष्टोनेनादृ
ष्टाद्वारकत्वविशेषणमपिसार्थकयतियथेति। तदुद्देश्यपूर्वकत्वंमरणकामनापूर्वकत्वंअवश्यंनिवे
श्यमितिविशेषः। अदृष्टाद्वारकत्वस्यावश्यकत्वेहेतुमाह अदृष्टद्वारककृतेरितिकर्तृत्वानिर्वाहकत्वादि
ति। अदृष्टाद्वारकतदनुकूलकृतिमत्त्वस्यैवतत्कर्तृत्वरूपत्वादितिभावः। तथाचवधकर्तुरेवसंपू
र्णनरकभागितयादृष्टद्वारककृतेर्नसंपूर्णनरकोपधायकोपयोगितेतितदद्वारकत्वविशेषणसा
र्थक्यमितिफलितं। यद्यप्येवंकृतावेवादृष्टाद्वारकमरणरूपफलविशिष्टव्यापारानुकूलत्वविशे
षणदानमुचितं। तादृशात्तद्विशेषणस्यैवतत्कर्तृताघटकत्वात्। तथापिश्येनरूपमरणानुकू
लव्यापारकृतेरदृष्टमद्वारीकृत्यैवतज्जनकत्वेपितादृशव्यापारस्यादृष्टद्वारैवविशेषणीभूते

त्वमितिश्येनकृते मरणविशिष्टतदनुकूलव्यापारकर्तृत्वानिर्वाहकत्वव्यापारनिष्ठमरणानुकूल१
९३ मरणानुकूलत्वयात्तद्व्यापारानुकूलकृतेर्नादृष्टाद्वारकं मरणानुकूलत्वं तयाऽदृष्टाद्वारकत्वविर
हप्रयुक्तमिति तत्रैव तत्त्ववेशितं मूलकृतातावतैव नरकविशेषजनकवधलक्षणस्यानति
93 प्रसंगात् हिंसलक्षणेनुअदृष्टाद्वारकं विशिष्टव्यापारानुकूलत्वं कृतेनोतद्विशेषणेन तया निविष्ट
मतोनादृष्टाद्वारकमरणानुकूलत्वं हं तत्खड्गाभिघातादिजनकादृष्टजनककृतिमतो वधस्यना
त्मह्नं तत्त्वमिति। अदृष्टद्वारककृतेः कथं न कर्तृतानिर्वाहकत्वमत आह तत एवेति न्याय भोक्तेति। कु
लालान्यइति शेषः। न तत्कर्त्रा व्यवह्रियते तेन घटकर्तृत्वस्य च्युततेनरकसाधनताप्रयोजकं नरकवि
शेषभागिताप्रयोजकं तद्व्यापारकर्तृत्वं मरणरूपफलाविशिष्टव्यापारकर्तृत्वं अतइति। कर्तृता
निर्वाहकमदृष्टाद्वारकत्वादिविशेषणघटितमिदं रूपं मूलकृता अत उक्तमित्यर्थः। उक्तरूपा
क्रान्तस्य व्यापारस्यैव नरकविशेषोपधायकत्वादितिभावः। हिंसापदार्थे दृष्टाद्वारकत्वादिविशेष
णस्य प्रवेशेभवदेवभट्टसंवादमाह तत एवेति तत्र इति निमितं व्यापारमात्रमिति हिंसपदप्र
तिपाद्यतावच्छेदकमरणानुकूलव्यापारमात्रं हिंसा हिनस्त्यर्थः। नरकविशेषजनकतायां न ९३

रकविशेषोपधायकत्वे प्रयोजकमितिशेषः अयं मणिकारः। तमेवार्थं संपूर्णनरकप्रयोजक
व्यापारं। अनुगतरूपेण· मरणोद्देशेनानुष्ठीयमानत्वादिघटितानुगतधर्मप्रकारेण· तदनुरो
धात्· अदृष्टद्वारककृतेः कर्तृत्वासंपादकत्वानुरोधात्॥ निरूढे· विशेषणतया ध्रुवो स प्तमी तैलाभ्यं
गे मरणोद्देशेन कृते तत्तदुद्देशेनाकृते च· चरमस्य विशेषणद्वयेनैव व्यावृत्तिरिति भावः नोक्तदोषा
वकाश इति· नादृष्टाद्वारकत्वविशेषणवैयर्थ्यावकाशः इत्यर्थः मरणोद्देशेन श्येनसप्तमीतैलाभ्यंगा
नुष्ठानेपि न तत्कर्तुः संपूर्णनरकानुत्पत्या ततद्व्यापारस्यावश्यंवारणीयत्वात् तद्वारणीयस्य तन्मात्र
विशेषणाधीनत्वादिति भावः ननु मरणोद्देशेन तदनुकूलव्यापारकर्तुर्न मरणकर्तृत्वं तादृशव्या
पार विषयककृतौ तदुद्देश्यभूतमरणस्य साध्यत्वेनाविषयत्वात्· साध्यतया तद्विषयककृति
मत एव तत्कर्तृत्वात् अन्यथा शर्कराभक्षणार्थमाचामतो नांतरीयकतया आचमनजलस्य शर्क
राभक्षणानिष्पत्तौ तस्य तद्भक्षणकर्तृताप्रसंगात् तथा च कथं मरणोद्देशेन व्यापारगोचरकृते
विशिष्टकर्तृतानिर्वाहकत्वं अथ मरणविशिष्टव्यापारकर्तृत्वेन मरणकर्तृत्वगर्भे मरणकर्तृ

९४ त्वे सति तदनुकूलव्यापारकर्तृत्वरूपं अपि तु मरणविशिष्टव्यापारविषयककृतिमत्त्वरूपं विष
९५ यता च साध्यतैव मरणस्योद्देश्यत्वेपि तदुद्देश्यककृतौ साध्यतया विषये व्यापारे विशेषणतया
भानान्नाहत्या कृतेः साध्यतया विशिष्टविषयकत्वमव्याहतमिति मरणोद्देशेन व्यापारकर्तुर्विशे
षणकर्तृत्वेपि विशिष्टकर्तृत्वमव्याहतेश्च तत एव यत्र मरणकामनया न तदनुकूलव्यापारचिकी
र्षापि तु फलांतरकामनया मरणानुकूलव्यापारत्वेन चिकीर्षा तत्रापि व्यापारकर्तुर्विशिष्टकर्तृ
तासंपत्त्या नरकभागिता च निर्वहतीति एवं च विशिष्टानुकूलतायामदृष्टाद्वारकत्वस्य विशिष्ट
कर्तृत्वनिर्वाहकतया कृतिसाध्यव्यापारस्यादृष्टाद्वारकं विशेषणं मरणानुकूलत्वविशिष्टक
र्तृतानिर्वाहकमिति तदुपादानमिति चेन्न । एवमपि तज्जनकादृष्टजनककृतेस्तज्जनकत्वेमा
नाभावान्मरणजनकादृष्टजनकत्वेपि नादि जनककृतेर्मरणजनकत्वेमानाभावेन त्वेपि नादि
कर्तुर्विशिष्टजनककृतिमत्त्वरूपविशिष्टकर्तृत्वनिराकरणसंभवेनादृष्टाद्वारकत्वविशेष
णवैयर्थ्यात् । न च प्रयोजककृतिमत्त्वमेव कर्तृत्वं न तु जनककृतिमत्त्वमित्यदृष्टाद्वारकत्वेपि ९४

क्षायां तत्र स्वविशिष्टकर्तृतानिराकरणसंभवदित्ति वाच्यं · तथा सति तंडुलकंडनादिकृतेर
पि पाकादिप्रयोजकतया नादृष्टद्वारकृतिमत्तां पाकादिकर्तृताप्रसंगात् · यदि च कृतेर्मरणजन
कत्वपर्यंतनिवेशलाभायैवादृष्टाद्वारकत्वकथनमित्युच्यते तथापि मरणोद्देशेन कूपखननश
स्त्रमार्जनादिकर्तुः संपूर्णनरकानुपपत्तिर्दुर्वारैव अतिपरं परितनकृतिकालेऽदानीं हंतीति व्यप
देशाभावेन तत्कृतेर्वधेऽन्यथासिद्धतया तज्जनकत्वाभावात् अतः संपूर्णनरकभागिताप्रयोजकं
न वधकर्तृत्वमपि तु वधत्वविशिष्टविषयकतत्प्रयोजककृतिमत्त्वं न हन्यादित्यादौ प्रयोजककृ
तिमत्त्वमेव लक्षणयाऽऽख्यातार्थो न तु जनककृतिमत्त्वं वधत्वविशिष्टस्य धात्वर्थस्य निरूपकतया
प्रयोजकत्वांशेऽविषयतया कृतावप्यन्वयः तथा च मरणोद्देशकृतकूपखननादिकमिव ता
दृशासप्तमीतैलाभ्यंगादिरपि संपूर्णनरकसाधनमेव कथंचित्स्वरूपेण विध्यर्थे वाधोद्धारः माभूद्वा द
र्शितरीत्या स्वरूपेण स्वसंपूर्णनरकसाधनत्वं न्यूननरकसाधनतयैव विध्यर्थबाधस्यावश्यक
त्वमित्यालोच्य विध्यर्थबाधभयेनैवागत्या नरकसाधनहिंसालक्षणे अदृष्टाद्वारकत्वेन व्या

पारनिषिद्धमरणानुकूलत्वंविशेषितेव्यापारस्यमरणोद्देशेमानुष्ठीयमानत्वंचसंपूर्णनरकोपधा
६५ नप्रयोजकतयोपात्तौ।अर्धनरकभागिताप्रयोजकश्चाशरीरेनतन्निवेशोऽतोऽकामकृतवधेऽर्धन
95 रकनिर्वाहः।अन्योद्देशेनकृतकूपखननादिवारणायचकृतौव्यापारेचव्यापारमरणयोःप्रयोजकत्वमु
पेक्ष्यजनकत्वंनिवेशनीयमित्याशयेनमूलंसंगमयतिवस्तुतइति श्येनेवारणीयइति।श्येनेनवारणस्या
वश्यकत्वइत्यर्थःसप्तमीतैलाभ्यंगो।मरणमनुद्दिश्यकृतः।वारितो।विशेषणांतरेणैवेयर्थ्ये।मरणानु
द्देशाकृततैलाभ्यंगवारणायविशेषणदाने।उपष्टंभकत्वासंभवः।मरणोद्देशेनानुष्ठितनद्वारणायोपा
दानेतस्यपूर्वपक्षिणोहिंसात्वोपगमसंभवात्तद्वारणेपरोधासंभवः।यद्यपिअभिचारस्यमनुनोप
पातकमध्यपठितत्वात्तत्रापिअभिचारविधयानरकसाधनत्वमक्षतमितिविध्यपर्यवाधादुरुद्धर
एवतथापिद्वितीयमतेपूर्वोक्तवदिदमथर्वरसबीजंनरमित्यूतद्दूषणोद्धारप्रयासोनकृतः।अ
परेषांमतेश्येनातिप्रसंगमुद्धरति।श्येनेत्वितिवैरिणइति।यदुद्देशेनश्येनानुष्ठानंखड्गाभिघाता
दिनातस्यहेतुरित्यर्थः।विशेषाकारेणेति।व्यापारेणमरणंभवत्वितिसामान्याकारेणखड्गाभिघातादि

व्यापाररूपवधस्वरूपेण कर्तुरभिप्रेतत्वेपि अमुकस्य खड्गाभिघातादस्य मरणं भवत्वित्याकारक
तदभिप्रायाभावाद्विशेषप्रकारकाभिप्रायाविषयएव द्वारमित्यर्थः व्यापारः खड्गाभिघातादिः तथा
च विशेषरूपेणाभिसंधानाविषयत्वमेव व्यापारविशेषणं देयं · यत्र च हन्तुर्नरस्य व्यापारो वधद्वारा
नरप्रकारेण स्वरूपेण कर्तुरभिसंहितस्तत्र स्वरूपेण तस्य हिंसात्वमिवेति भावः। एतल्लक्षणे गललग्नान्नकवला
घात्र मरणं तत्र परिवेषयितरि हन्तृत्वप्रसंगं प्रथमतोऽभिहितं व्यापाराभिसंधो मरणजनकत्वप्रकार
ताविवेशेनोद्धृत्य दोषांतरमवतारयति · नन्वित्यादिना · नरांतरव्यापाराभावेनेति · भोजनादिरूपव्या
पारांतरद्वारा मरणसाधनस्य भोक्तृव्यापारस्य द्वारस्य तद्व्यापारे हन्तृत्वाभिमतपुरुषान्यपुरुषीयत्वाभा
वेन विशिष्टाभावसत्वात् मरणसाधन भोक्तृव्यापारे नरांतरव्यापारद्वारकत्वरूपविशेषणविशेष्य
स्याभावसत्वात् अनुनिष्पादीत्यादि पूर्वोक्तलक्षणेपि अव्यवहितत्वरूपानुनिष्पादित्वनिवेशाद्व्य
वहितेत्यादि लक्षणेपि फलेतन्निवेशापौनरुक्त्यमाशंक्याह: पूर्वमिति अन्यथासिद्धीतिजनकजन
कत्वरूपेत्यादिः तत्प्रयोजकव्यवधानं च व्यापारातिरिक्तस्वजन्यकारणांतरव्यवधानं इति हिंसा

लक्षणविवेकः॥ ॥मूले नेष्टसाधनताविधिरित्यत्र इष्टसाधनताद्इच्छाविषयतावच्छेदकावच्छिन्नसा
६५ धनताविधिः प्रवर्त्तकज्ञानविषयः फलाभावात् इच्छाविषयतावच्छेदकरूपेण फलंविषयकतत्साध
नताज्ञापकाभावात्प्रवृत्त्यनुपपत्तेरिति शेषः इष्टसाधनत्वं न विधिप्रत्ययसामान्यप्रतिपाद्यं नित्ये
98 फलाभावेन तत्प्रवर्त्तकश्रुतीनाम प्रामाण्यापत्तेरिति तु नार्थः इष्टसाधनताया विध्यर्थतामते संध्या
मुपासीतेत्यादिश्रुतीनामेव नित्यस्य फलसत्त्वायां प्रमाणतया फलाभावस्यासिद्धेः। आर्थवादिकं
विशिष्यार्थवादबोध्यं विधिवाक्येष्वश्रुतं। विशिष्य विधिवाक्यप्रतिपाद्यं फलं इष्टं यत्र नास्तीत्यन्वयः।
इत्यर्थवादात्। इत्याद्यर्थवादस्य कश्चित्सत्वात् आवहन्जनयितुं कामयमानः। यत्र नित्ये फलं न श्रु
तं इच्छाविषयतावच्छेदकरूपेण साधनत्वप्रतियोगितया शाब्दबोधाविषयः। स्वर्गस्तत्र फलं। तत्फ
लत्वेन कल्पनीयः। तथा चेच्छाविषयतावच्छेदकस्वर्गत्वादिनापि फलविषयकतत्साधनताज्ञानं
सर्वे नित्ये संभवतीति कथं न तस्य प्रवृत्तिसामान्यजनकतेति भावः कामनोपाधिकर्त्तव्यत्वेन स्वकृ
तिप्रयोजकफलकामनाकत्वेन फलकामनां विनाऽनिर्वहत्कृतिकत्वप्रसंगेनेति यावत् नित्यतामं ६५

गप्रसंगात्. संध्यावंदनादेः शौचादिमदास्तिके न पुंसा तत्र तत्संध्यावंदनकाले नियमतोऽनुष्ठानस्या
नुपपत्तेरित्यर्थः तदनुपपत्तिमेव घटयति अहरहरिति श्रुत्येति करणेत्तृतीया अवगतं दृष्ट्यस्यापवा
वगमितमित्यर्थः जीविमात्रकृतिसाध्यं तत्कालावच्छिन्नशौचादिमात्रवतः कृतिसाध्यत्वविशिष्टं.
मात्रपदेन फलकामनाया अधिकारिविशेषणता अवगमव्यवच्छेदः। तस्यास्तत्वेनावगमे फलका
मनाविरहदशायां शुचेरपि स्वाधिकारप्रतिसंधानाभावेन संध्यावंदनाननुष्ठाने दृष्टापत्तिसंभवा
त् न हि तत्कर्मानधिकारित्वेनात्मानं प्रतिसंदधानः कोपि तत्र तत्र प्रवर्त्तते इति. तत्समय एवेति शौ
चादिविशिष्टस्वाधिकरणसंध्यादिसमयेपीत्यर्थः तत्कर्त्तव्यता. तेन संध्यावंदनादिकरणं तत्काले.
शौचादिविशिष्टस्वाधिकरणसंध्यादिकाले. फलकामनाया अवश्यंभावः। उत्पत्तिः। प्रमाणाभावात्.
कामनोत्पादकसामग्रीनियमस्यादिः। फलबोधकार्थवादबलात् फलविशेषकामनाया अप्यधि
कारांतर्भावसिद्धौ संध्यावंदनादिप्रवृत्तिदशायामुभयथाधिकारत्वानस्यान्यथानुपपत्त्या अधिका
रनिर्वाहकफलकामना तत्सामग्री च सेत्स्यतीति पूर्वं तु शायेन किं चेत्यादिकं मणिकारग्रंथमवता

रयतिनन्विति संवलितनाधिकारे फलकामनासंवलितस्य शौचादेरधिकारत्वे नित्यवदनुष्ठान
६७ मेवअधिकारज्ञानं विनानुपपद्यमानं तत्कालकरणमेव दूषयतीति यद्यपि लाघवात् अवच्छित्तिसामा
57 न्येष्टसाधनताज्ञानहेतुतासिद्धौ प्रवृत्त्यन्यथानुपपत्त्या फलकामनासिद्धौ संवलिताधिकारसिद्धेर्ना
पेक्षेति संवलिताधिकारबोधखंडनमकिंचित्करं तथापि शौचादिमात्रस्याधिकारत्वे तज्ज्ञानस्य
लेच्छकचित्तस्य फलकामनादिविरहस्यानुभवप्रमाणकत्वे लाघवसिद्धकारणत्वानुरोधेन फलकामना
कल्पने प्रवृत्त्युपपत्त्या प्रकृष्टानसंभवतीति अगत्या फलकामनायाः कारणत्वमेव वाध्यते तत्या
मूलकृतासंवलिताधिकारो दूषित इति भावः। अहरहः श्रुत्या शौचादिमत्त्वमात्रावच्छेदेनाधिका
रित्वे बोधिते फलकामनारहितस्यापि तादृशस्याधिकारस्तच्छ्रुतिसिद्धस्तद्वाधभयेन फलकाम
नाया नाधिकारांतर्भाव इति यथाश्रुतमूलात्प्रतीपत्ते तच्च न संभवति यथाश्रुतार्थवादानुरोधे
न शौचादिमत्त्वसामानाधिकरण्यमात्रेणाधिकारित्व एव तत्र श्रुतितात्पर्योपगमात् औत्सर्गिक
तयाक्वचिदवच्छेदकावच्छेदेनाधिकारित्वेन तात्पर्यग्रहेऽपि तदुत्तरकालं तद्विपरीतकल्पनसंभवा ६७

दित्यन्यथामूलाभिप्रायं दर्शयति प्रथमत इति जीविमात्रस्याधिकारप्रतीत्याऽनुपस्थितफलका
मनामनं तर्भाव्य जीवनमात्रस्याधिकारत्वप्रतीत्याधिकारत्वे कर्तव्यताप्रयोजकत्वं तच्च कर्तृवि
शेषणतया लभ्यते· निराकांक्षत्वेन लब्धाधिकारतयाधिकाराकांक्षाविरहेण· अधिकारत्वेन फ
लकामनाया अनन्वयात्· प्रतीत्यसंभवात्· आकांक्षा चेयं जिज्ञासारूपा शब्दाधीनबोधोपयोगिनी
ज्ञानसिद्धौ च न तद्वक्तव्याशङ्केति भावः· आकांक्षाविरहेण यथाश्रुतार्थपरतां फलश्रुतेस्सज्यत इत्ये
त्रोभयसिद्धं दृष्टान्तमाह यथेति· अंगानां पर्णमयजुह्वादीनामपहतेमाद्यंगानां स्तुतिमात्रे प्रशंसामा
त्रपरा न तु यथाश्रुतमात्रपरा तथेहापि· नित्यस्थलेपि फलश्रुतिः स्तुतिमात्रमित्यनुषज्यते दृष्टान्त
मेव विवृणोति· तत्रापीति अंगेपीत्यर्थः· फलानन्वयोऽनाकांक्षितत्वादित्यर्थ इमेणान्वयः· निरपेक्ष
तया अंगत्वेन प्रथमतः प्रतीतो फलश्रु - त्यनपेक्षतयाऽन्वये प्रथमतः प्रत्यये· फलेपापश्लोकश्र
वणाभावरूपे अधिकारघटकत्वेन नान्वयः· अनाकांक्षत्वात् तु प्रधानाधिकारेणैवाधिकारला
भादधिकाराकांक्षाविरहात्· वीजे· फलश्रुतेर्यथाश्रुतार्थत्यागे। अन्यथा निराकांक्षस्यापि फला

न्वयेनत्रैवनित्यस्थलइव॰ अत्रापिजुहूस्थलेपिप्रत्यवायपरीहारफलकल्पपक्षेऽकरणेप्रत्यवायः
४८ स्यादितिप्रतिसंधानविरहदशायांतत्परीहारफलकत्वस्यनित्यकर्मण्यग्रहात्प्रवृत्तिर्नस्यादिति
९४ नित्यानुष्ठानभंगप्रसंगरूपदूषणमुद्धृ—त्यदूषणांतरमवतारयति॰ नन्विति॰ प्रवृत्तिरितिसं
ध्यावंदनादावित्यादिः तत्करणंनास्त्येवेति॰ तदानतदकरणेपिपदाफलांतरंनाभिसंधीयतेतदा
यागादौनप्रवृत्तिः संध्योपासनादौतुतदभिसंधिमंतरेणापिप्रत्यवायपरीहारमभिसंधायापि
प्रवृत्तिरितिनित्यकाम्ययोर्विशेषोपपत्तिरितिभावः मूलेविधेरिति॰ अहरहरित्यादिश्रुतितद
त्यर्थः कर्तव्यत्वंजीविमात्रकर्तव्यत्वंकर्तव्याकरणेप्रत्यवायकल्पनमिति॰ जीविमात्रकर्तव्यतया
विधिबोधिताकरणत्वेनज्ञातएवअकरणेअकुर्वन्विहितंकर्मेत्यादिनानरकसाधनत्वज्ञानात्त
दन्यथानुपपत्याप्रत्यवायरूपव्यापारसिद्धिरित्यर्थः। फलाभावेनाप्रत्यवायानुपस्थित्यात्तत्परी
हाररूपफलोपस्थितिविरहेणमूकएव। अबोधकएवं। यद्यपिप्रत्यवायासिद्धिदशायांप्रत्यवायप
रीहाररूपफलानुपस्थितावपिदृष्टत्वेनफलविषयकत्वसाधनताबोधकत्वंविधेःसंभवत्येवतथा ४८

पिद्रष्टुविषयतावच्छेदकत्वानुगतधर्मोपलक्षितविशेषरूपावच्छिन्नफलसाधनत्वेविधिप्रत्यय
शक्त्याविशिष्यतत्तद्रूपावच्छिन्नफलसाधनत्वमेवततःप्रतीयतेनत्विष्टत्वादेरपिबोधस्तज्ज्ञान
स्यप्रवृत्त्यनुपयोगितयातात्पर्याविषयत्वादितिविशेषरूपेणफलोपस्थित्यपेक्षेतिभावः।ननुनिं
दार्थवादात्तत्प्रकरणेप्रायश्चित्तोपदेशाच्चसंध्योपासनाद्यभावस्यप्रत्यवायहेतुत्वमवगतमित्यपरे
षांमतंमूलकृताभिहितंतन्नसंगच्छतेनोपतिष्ठतियःपूर्वांनोपास्तेयश्चपश्चिमांसशूद्रवद्बहिःकार्यः
सर्वस्माद्द्विजकर्मणइत्याद्यर्थवादस्यपायजनकत्वबोधकत्वात्प्रायश्चित्तोपदेशस्यापिप्रायश्चि
त्तेसंध्यावंदनरहितपुरुषकर्तव्यतामात्रबोधकत्वादित्यतोव्याचष्टेनिंदार्थवादेनेत्यादिःप्रायश्चि
त्तं।प्रायश्चित्तपदबोध्यंकर्मकर्तव्यमितिशेषः।शास्त्रमितेः।शास्त्रश्रवणानंतरंतात्पर्यविशेषविषय
त्वरूपलिंगेनज्ञातेप्रायश्चित्तशब्दार्थविवेचनंविनाशास्त्रबोधानुपपत्त्यायथाश्रुतार्थासंगतेःप्रा
यश्चित्तपदार्थपर्यालोचनेक्रियमाणइतिकःप्रायश्चित्तपदार्थइत्याकांक्षायांसत्यामित्यर्थः।पाप
नाशककर्मप्राप्तेःसंध्योपासनविरहरूपकर्तृविशेषणस्यपापनाशककर्मकर्तव्यताप्रयोजक

त्वग्रहे। उपस्थितेति। प्रायश्चित्तकरणप्रयोजकत्वेनेत्यादि। इत्यादिः हेतुताग्रह इति पापासत्वे पापनाशा
६६ ककर्मकरणानुपपत्तेः पापजनकं कर्म तत्प्रयोजकमिति तत्करणप्रयोजकत्वे संध्योपासनाद्यभाव
एव प्रयोजक इति रीत्या प्रत्यवायहेतुताग्रह इत्यर्थः संध्योपासनाद्यभावे प्रत्यवायहेतुताग्रहश्च
99 तद्द्वारा तत्र नरकहेतुताग्रहीत्वाद्विष्टत्वेन तदवगमद्विष्टाभाववत्त्वेन विशिष्य संध्योपासनादेरि
ष्टत्वग्रहः यस्य च विधिवाक्याधीनस्य विशिष्यफलावगाहिनस्तत्साधनत्वज्ञानस्य निर्वाहकतया
विधिजन्यबोधात्प्रागपेक्षितः इष्टत्वविशेषिततत्साधनत्वबोधे तदपेक्षणात् उपलक्षणमेतत्
सामान्यरूपेण यत्र शाब्दानुगमस्तत्राप्यननुगमकधर्मग्रहप्रकारीभूतविशेषधर्मप्रकारकशा
ब्दबोधः सर्वनामस्थले व्युत्पत्तिसिद्धः। विशिष्य शाब्दशरीराप्रविष्टतया उपासनादिरूपफल
स्य विशिष्य शाब्दबोधाविषयत्वेनु सामान्यत इष्टसाधनत्वप्रत्ययानन्तरमिष्टविशेषाकांक्षायां
उत्तरकालं विशिष्य तत्साधनत्वविषयकप्रवर्तकग्रहप्रकारतयैव तत्र विशिष्येष्टत्वग्रहापेक्षयासंग
तिः उक्तयुक्त्येति। संध्योपासनादौ दुःखसाधनाभाववत्त्वं यदा न गृहीतं तदा तत्रेच्छाया असंभवेन तत्साधन

त्वेन तद्विषयककृतिज्ञानादपि प्रवृत्त्यभावापत्ताविष्टापत्त्यर्थः नित्यताक्षतिस्तत्र न तत्र तं प्रवृत्त्यनुपपत्ति
र्नेदोषायेति तथापि काम्ये यागादौ फलांतरज्ञानं विना न प्रवृत्तिर्नित्येनु फलांतरज्ञानविरहेपि द्विष्टाभाव
त्वेन इष्टत्वातः प्रवृत्तिरित्यत एव नित्यकाम्ययोरविशेषस्योद्धारादिति भावः नोपास्तेइत्यर्थवादस्य कृत्यभा
वार्थकत्वं स्पष्टीकरोति आख्यातस्येति· कृतिविषयीभूतेति तत्पुरुषीयकृतिविषयेत्यर्थः उपासनाभावः सं
ध्याकालविशिष्टः कालिकसंबंधावच्छिन्नतदुपासनाभावः हेतुः कालिकप्रत्यासत्त्या तत्पुरुषीयप्रत्यवायहेतुः
साधारणे उपासनाकर्तर्यप्यात्मनि चेष्टाविशेषादिरूपोपासनाद्यभावस्य प्रत्यवायापादकस्य सत्त्वं आस्मि
न्कल्पे मूलानुक्तमपि दूषणांतरमस्तीति न्यूनताभंगायाह विशिष्टेति विशिष्टाभावः अन्यदीयकृतिविषयो
पासनाधिकरणसंध्याकालविशिष्टस्तत्पुरुषीयकृतिविषयत्वविशिष्टसंध्योपासनाभावः विशेषणाभा
वपर्यवसन्न इति· विशेष्यवति विशिष्टाभावप्रतीतेस्तदधिकरणवृत्तिविशेष्ये विशेषणाभावविषयकतये
वोपपत्तौ विशिष्टाभावस्यानतिरिक्तत्वादिति भावः दुःखसाधनाभावत्वेन दुःखसाधनकृतिविषयत्वाभावा
भावरूपत्वेन कृतिविषयत्वं पर्यवसन्नं फलितमिष्टमित्यन्वयः। नतु नत्साधनं· कृतिविषयत्वसाधनं·

कृत्तिरिति· कृतिस्वरूपस्यनत्त्वरूपस्यवातद्विषयत्वस्यकृतिजन्यतायाअसंभावितत्वादितिभावः।कृती
१०० 100 ष्टसाधनताज्ञानकारणतावादिनाकृतिसाध्यताज्ञानस्यैवकारणत्वंनोपेयतेनवाकृतिसाध्यत्वस्यविध्य
र्थत्वमतोमूलेकृतिसाधनत्वानन्वयदोषस्याकिंचित्करतयाअपरेषांमतेस्वयंदूषणांतरमाहवस्तुत
इतिविधिप्रवृत्तिंविना·सांगोपांगविधिजन्यबोधंविनाउपासनात्मकव्यापारःपादत्रारूपावच्छिन्नाभाव
स्यप्रत्यवायसाधनतातद्रूपावच्छिन्नव्यापारविशेषःअतएवइद्दत्रादोषादेवनतुपापानुत्पादस्यनित्य
त्वादेवेतिशेषःनित्यस्यापिदुःखानुत्पादादेःफलत्वव्यवस्थापनादितिभावःननुउपासनारूपव्यापा
रविशेषस्यदुष्परिचेयत्वेकोदोषइत्याकांक्षायामाहतथाचेतिअन्योन्याश्रयइतिउपासनाविशेषा
भावस्यप्रत्यवायद्वारादुःखसाधनत्वग्रहेतदभावेइष्टत्वग्रहस्तत्रेष्टत्वग्रचोक्तरीत्याविशिष्यतत्साध
नत्वपरस्यविधेःप्रवृत्तिस्तत्प्रवृत्तौचोपासनाविशेषपरिचयेनतदभावेदुःखसाधनत्वग्रहइतिपरस्प
रापेक्षयानविधिप्रवृत्तिरित्यर्थः।इष्टसाधनताज्ञाननिरपेक्षकार्यताज्ञानस्यप्रवर्तकत्वमंडलीकर
णादोप्रवृत्तिरिष्टसाधनत्वरूपलिंगज्ञानाभावात्कार्यताज्ञानमेवतत्रनास्तीतिक्रमेणयद्वारितातद्रू

षयित्वा नित्यस्यायं ऽऽपूर्वरूपफलसाधनतामत मवतारयति॰ ननु यदीति॰ नियमनस्तत्र न कामने
तिमुमुक्षारूपबाधकवशान्मोक्षविरोधिनि स्वर्गादौ कामनाया अभावादिति भावः तथापि नित्यापूर्वाभ्यु
पगंतुरयीत्यर्थः नित्यताक्षतिस्तुल्येति संध्योपासनाद्यनुष्ठानपूर्वे अपूर्वकामनासामग्री नियमस्याप्रा
माणिकत्वादिति भावः धर्मिग्रहेति धर्मिग्राहकेत्यर्थः नियतेच्छाविषयत्वेनैवेति नियतानुष्ठानानुपप
त्तेरेव तत्साधकत्वात् नियतेच्छाविषयत्वविशिष्टस्यैक्यचतस्य तदुपपादकत्वादिति भावः। न च मुमुक्षारू
पप्रतिबंधकवशादपूर्वेच्छानैयत्यं बाधितमिति वाच्यं। तदानीमुत्पन्नपंऽऽपूर्वस्य मुक्त्यविरोधित्वात् मु
मुक्षाया स्तदिच्छाविरोधित्वाभावात् ननु नित्ये सर्वत्र फलश्रवणाज्जीविफलकामस्य संवलित्याधिकार
इति मूलसिद्धांतोऽसंगत एव जीविमात्रस्याहरहः श्रुत्याऽधिकारबोधनेनाकांक्षाविरहेणार्थवादो
पस्थितफलानन्वयरूपपूर्वपक्षोक्तबाधकस्यानुद्धारात् नच्यार्थवादाहरहः श्रुत्योः प्रथमगृहीतैक
वाक्यतावलात् संवलिताधिकारसिद्धिरिति युक्तातादृशबाधकोद्धारसंभवः अर्थवादस्यय थाश्रुतफ
लविशेषसाधनत्वपरताप्रतीतावेव तदेकवाक्यतया फलकामनाया अधिकारत्वसिद्धिः न स्यच तत

त्साधनत्वपरतायाएवासिद्धेः·अंगस्यफलबोधकार्थवादवत्स्तुतिपरतयाऽपिसंभवात्प्रथमं
१०१ तदुभयैकवाक्यताग्रहस्याप्यभावादितिस्वयंसंवलितानाधिकारयुक्तिंप्रदर्शयन्मूलंसंगमयति·प्रयो
I०I जनज्ञानस्यप्रवर्तकतयेतिजीविमात्रस्यतत्कालजीविसामान्यस्याधिकाराभावात्·कर्त्तव्यतान्वया
संभवात्·प्रयोजनवत्ताज्ञानरूपकारणविरहेणफलकामनाशून्यजीविनःसंध्योपासनानुष्ठानासंभ
वादितिभावः·विशिष्टाधिकारः·फलकामनाविशिष्टजीवनस्याधिकारत्वंमर्थवादोपस्थापितफलान्व
यप्रयोजकाकांक्षामुपपादयितुमाहदुष्टसाधनत्वस्येतिदुष्टत्वेनविशेषितेष्टसाधनत्वस्येत्यर्थः·मंड
लीकरणादिभिर्व्यभिचारस्यमंडलीकुर्यादितिवाक्यप्रतिपाद्यमंडलीकरणेकार्यत्वावाधेनत
त्प्रामाण्यातिप्रसंगस्य·विशेषसाकांक्षत्वात्·कस्येष्टस्यसाधनमित्याकांक्षोत्थापकत्वात्नचोक्तफल
विशेषाकांक्षयार्थवादतस्तादृशफलसाधनत्वावगतावपितत्कामनाविशिष्टकर्त्तव्यतावोधक
कामिवाचकपदाभावात्कामनायाअधिकारत्ववोधासंभवइतिवाच्यं·समभिव्याहृतपदोपस्था
पितत्वेनोपलक्षितकामनाविषयसाधनत्वेविधिशक्तिग्रहात्सामान्यतःकामिवाचकपदसमभि
१०१

व्याहारं कल्पयित्वा विशेषाकांक्षातोऽर्थवादोपस्थितफलविशेषकामनाबोधकपदसमभिव्या
हारकल्पनात्तत्कामनाया अधिकारत्वलाभात्· अन्यथा·फलकामासमभिव्याहृतविधिप्रत्ययेन सा
मान्यत इष्टसाधनत्वप्रतीतावपि इष्टविशेषाकांक्षाविरहे·विश्वजिन्न्यायेपीति विश्वजिता यजेतेत्या
दौ फलविशेषाकांक्षायां ग्रामपश्वादिफलस्याल्पतया बह्वायासादिसाध्यविश्वजिदादौ प्रवृत्त्यनिर्वा
हकतया स्वर्गरूपफलकल्पनमित्यत्रेत्यर्थः नित्यविधिशेषभूतार्थवादानां यथार्थश्रुतफलसाध
नतापरत्वे यस्य पर्णमयीत्यादेरपि तुल्यपुत्रपालत्वपरत्वापत्तिरिति पूर्वपक्षोक्तं विशेषव्युत्पादने
न दूषयति यत्त्विति फलवत्तया फलविशेषस्यापि लाभेन निराकांक्षत्वात्· फलविशेषाकांक्षाया अ
थानुत्थितेः। अत एवाप्रकारान्तरेण फलविशेषलाभे फलान्तराकांक्षायाः सर्वथानुदयादेव·फलान्त
रत्वेन प्रधानीभूतदर्शपौर्णमासादिफलभिन्नफलवत्त्वेन प्रागुपस्थितिः। दर्शादिविधिप्रवृत्तेः पूर्व
मुपस्थितिः। प्रधानफलस्यैव दर्शादिविधिबोधितफलस्यैव नांगत्वमारंभणीयादौ इदमेव चेति·चो
हे तो इति पतः। इदमेवेत्यन्वयः जिज्ञासारूपाकांक्षायाः शाब्दबोधाहेतुत्वे यस्य पर्णमयीत्यादिवाक्या

र्तित्वोभयंलक्षत्वे। नियतपूर्वव ४

१०२ 102

जुष्काः फलसाधनत्वबोधः संभवत्येव यथाश्रुतार्थश्रुतितात्पर्यस्यौत्सर्गिकत्वादित्याशंक्यारंभणीया
देर्दर्शादिफलनियतपूर्ववर्तिनो यथा तत्फलं प्रत्यन्यथासिद्धतया न कारणत्वमिति नांगत्वं तथाजुष्का
मपि प्रधानजन्यफलेऽन्यथासिद्धतया नाकारणत्वमित्याह वस्तुतस्त्विति· कारणत्वस्यांगतयाऽग
त्वघटकतया तत्प्रविष्टांशद्वयं· अनन्यथासिद्धत्वनियतपूर्ववर्त्तित्वं तेषामनन्यथासिद्धत्वसत्वइ
ति यावत् अतो नांगत्वं जुष्काः। आरंभणीयादेर्दर्शादिफले उक्तान्यथासिद्धिं योजयंति· तदेवेति· तदेव·
प्रतिफलांतरमेव· प्रतिपूर्ववर्त्तित्वेन प्राक्पूर्ववर्त्तितया गृहीतत्वेन प्रधानफलं दर्शादिफलं· संध्या
वंदनादेर्विधिवाक्यादिष्टपूर्ववर्त्तितायाः प्राग्ग्रहेऽपि पश्चादर्थवादोपस्थितफलं प्रतिनान्यथासि
द्धिरित्याह नन्वेति· इह· संध्यावंदनादिस्थले तथाऽर्थवादोपस्थितफलेऽन्यथासिद्धिः अर्थवादिक
फलोपस्थितावपि· तदेव प्रतिसामान्यतः पूर्ववर्त्तित्वग्रहेऽपि कार्यांतरं प्रतिपूर्ववर्त्तितायाऽग्रही
तत्वेनान्यथासिद्धानवकाशादिति शेषः संवलिताधिकारादिति· तत्फलसाधनतायाः संभवेन तत्फ
लकामनायाः संवलिताधिकारत्वसंभवादित्यर्थः ततत्समयस्यैवेति कामनासंवलनेन दर्शादिफ

पविहितकालजीवनस्यैवेत्यर्थः तत्कालेति संध्यादिकालेत्यर्थः द्वैरूप्यं नियतकर्तव्यत्वं काम्यत्वं च·
तत्र उपरागनिमित्तस्नानश्राद्धस्य लोकमैद्व्यमेव· फलकामाधिकारिकमेकं जीविमात्राधिकारिकं
चान्यत्कर्मेत्यर्थः तत्रैणोपपत्तिः तत्रन्यायेन सकृदनुष्ठानं एवं च विधिभेदमादाय कर्मभेदोक्तिसंग
तिः नित्यातिरिक्तं च संध्यावंदनादिनकस्याप्यनुमतमिति भावः संध्यावंदनाकरणेन प्रत्यवायप्र
त्तिनस्य परिहारार्थं नियमतस्तत्करणमिति नियम्यमूलकतामिहितं तत्रोपपद्यते संवलिताधिकारपक्षे
फलकामनारहितस्याशुचेरपि अनधिकारतया अकरणे प्रत्यवायासंभवादित्याशंक्य फलकाम
नारूपाधिकारशून्यस्याप्यकरणे प्रत्यवाय इति व्यवस्थापपत्तिः। यदि संवलिताधिकारमिति अ
धिकारयोः अधिकारत्वेन पृथग्बोधितयोः शौचफलकामनयोः। संवलनं· एकत्रावस्थानं अधि
कारविधिभेदेपि उपासनादिविधेरैक्यासंभवादिति भावः नन्वेवमशुचेरपि फलकामनारूपाधि
कारवतोऽकरणं प्रत्यवायमावहेदित्यत आह यद्वेति श्रोतोर्थः अकुर्वन्नित्यादेस्तात्पर्यविषयार्थः॥नि
वार्यते अकुर्वन्नित्यादिना निशेषः तथा चाधिकारसमुदायवतोऽकरणपरत्वेनादशवाक्यमनर्थ

कं आपद्येतेतिभावः। मूले प्रवृत्तिदर्शनादिति प्रवृत्त्युपगमसंभवादित्यर्थः। एवं च इदमिष्टसाधन
१०३ मितिज्ञानस्यैव प्रवृत्तिजनकत्वमित्युपगमे। एतत्साध्यमिष्टमितिज्ञानदशायामनुभूयमानाः प्रवृ
163 त्तेः फलज्ञानानंतरमिदमिष्टसाधनमितिज्ञानं कल्पयित्वोपपादनवत्। एतादृशज्ञानानंतरमपि तादृ
शज्ञानकल्पनेन प्रवृत्त्युपपादनस्य संभवात् उभयोरेव प्रत्येकं प्रवर्त्तकतायाः संभवात् प्रथमस्यैव प्र
वर्त्तकत्वेनापरस्य इष्टसाधनत्वमेव विध्यर्थो न तु साध्यतावदिष्टमित्यत्र किं विनिगमकमिति पूर्वप
क्षः फलितः। एतेन एतत्साध्यमिष्टमितिज्ञानात् प्रवृत्तिदर्शनेन विनिगमकानवकाशेन विनिगम
कप्रदर्शनविरोध इति परास्तं फलेच्छायां सुखादीच्छायां स्वविषयेति स्वविशेष्य सुखादीत्यर्थः तद्येति
स्वविशेष्योपायविशेष्यकज्ञानसाध्येत्यर्थः अन्यथा सामान्यकार्यकारणभावसंकोचस्य उपायवि
शेष्यकज्ञानानंतरकल्पनस्य वाप्रसंगादिति भावः इति ज्ञानं इति ज्ञानानंतरकल्पमिति शेषः विशे
षणज्ञानसाध्यत्वात् विशिष्टविशेषणज्ञानसाध्यत्वात् विशिष्टविशेषणकज्ञानस्य ज्ञानद्वयं ज्ञा
नद्वयकल्पनं एतच्च विशेष्ये विशेषणमित्यादिरीत्या विशिष्टविशेषणके बोधेपि विशिष्टविशेष १०३

३६=१

णज्ञानंहेतुरितिप्राचीनमताभिप्रायेणाभिहितं।मणिकृतातुस्वप्रकाशग्रंथेज्ञानत्वनिर्विकल्पका
नंतरंविशेष्येविशेषणमित्यादिरीत्याज्ञानामीत्यनुव्यवसायोपगमाद्विशिष्टप्रतियोगिकवैशिष्ट्य
बोधएवविशिष्टविशेषणज्ञानंहेतुरित्युपगतं।तथासत्येतद्दूषणानवकाशादेतदनुशायेननचे
त्यादिनाव्युत्पत्तिविरोधोवक्ष्यतेयागःकृतिसाध्यइतिनचयागेकृतिसाध्यत्वेष्टसाधनत्वयोःपरस्प
रान्वयिनानवच्छेदकरूपोभानोपगमेबोधस्यसमूहालंबनतयावाक्यभेदप्रसंगःएकस्यापरान्वयि
तावच्छेदकत्वोपगमेचविशिष्टविशेष्यकज्ञानेविशिष्टज्ञानाहेतुत्वेपिकस्यान्वयितावच्छेदकत्वमि
त्यत्रविनिगमनाविरहइतिवाच्यं।उभयोर्विशेषणयोःस्वकल्पभानेपिभूतलंघटपटवदित्यत्रेव
उभयनिरूपितैकविशेष्यताभ्युपगमेनवाक्यभेदपरिहारसंभवात्।नचेतिनापीत्यर्थःकृतिसा
ध्यत्वंयागेबोधयित्वेतिस्वार्थसाध्येष्टघटकसाध्यत्वविशेषणतापन्नयागक्रियायांकृतिसाध्य
त्वरूपापरस्वार्थविशेषणीकृत्येत्यर्थः।अतोयथाश्रुतेनैकबोधाप्रतिक्षेपेपिनासंगतिःएकस्वा
र्थान्वयमितिएकस्वार्थविशेष्यतयाभासमानापरपदार्थविशेष्यतयास्वार्थेतरान्वयबोधकत्व

स्येत्यर्थः अत्र चैकरूपावच्छिन्नस्वार्थद्वयनिवेशाज्ज्ञानातीत्यादौ वर्तमानत्वादिरूपाख्यातविशेषवाच्या
१०५ र्थान्वयिज्ञानादिक्रियायां आख्यातसामान्यार्थाश्रयत्वादेरन्वयित्वेपि प्रकृते चाख्यातार्थेष्टसाध
नत्वान्वयियागादेस्तत्सामान्यार्थकर्तृत्वाद्यन्वयित्वेपि न व्युत्पत्तिविरोधः। पूर्वोक्तबोधद्वयपक्षे
आवृत्तिकल्पनगौरवमप्याहृय जिपदेन चेति पर्यवसिते जनितान्वयबोधतया निराकांक्षे उपायवि
शेष्यकं साध्येष्टकत्वकृतिसाध्यत्वयोर्ज्ञानं प्रवर्त्तकमस्तु तथा च विशेषणतया क्रियान्वयिनस्तस्ये
व विध्यर्थतया नोक्तानां दोषाणामवकाश इत्याशंकते अथेति समाधत्ते तथा चेति तथा सतीत्यर्थः
बहुव्रीह्यर्थेति इष्टनिष्ठसाध्यतानिरूपकत्वरूपेत्यादिः षष्ठ्यर्थस्य इष्टनिरूपितसाधनत्वरूपष
ष्ठीसमासार्थस्य शाब्दमिति प्रवर्त्तकं चेति शेषः निरूपकतासंबंधेनोपायविशेष्यके इष्टनिष्ठसा
ध्यताप्रकारकज्ञानस्य हेतुत्वे उक्तगौरवानवकाशात् साध्यत्वस्य साधनतापेक्षया गुरुत्वं किं चे
त्यादिनादर्शयामास सुखत्वादिप्रकारकेच्छायां सुखादिविशेष्यकसुखादित्वप्रकारकज्ञानत्वेना
स्तु हेतुतायाः कादिचिकीर्षायां तु उपायविशेष्यकफलविशेष्यकज्ञानयोः सामान्यरूपेणैव हेतुता

सामान्यधर्मे कारणताग्राहकप्रमाणपक्षपातात् न चैवं सामान्यकारणसंकोचः स्वत्वाननुगमा
त् स्वविशेष्यत्वविशेष्यकज्ञानत्वेन सामान्यकारणत्वकल्पनासंभवादिष्टोपायविशेष्यकेष्टसाध
नताज्ञानमात्रं हेतुताव्यवस्थापकोक्तयुक्तावनुशयं प्रदर्शयन्नालोककृत् किंचेत्याद्यवतारय
ति नन्विति एवं साध्येष्टकत्वस्य गुरुत्वे उक्तानुपपत्तेरिति साध्येष्टस्य विध्यर्थत्वे तत् घटकसाध्यत्ववि
शेषणतया कृतिसाध्यत्वविशेष्यतापन्नक्रियान्वये उक्तव्युत्पत्तिविरोधापत्तेरित्यर्थः इष्टसाधनता
त्वांशे ति यद्यपि निरूपकतया यागान्वयी इष्टनिष्ठसाध्यत्वमपि लिङर्थः संभवति तथापि निरूपकतासं
बंधस्य वृत्यनियामकतया अभावप्रतियोगितानवच्छेदकत्वेन चैत्यं न वेदेत्यादावन्वयबोधानुप
पत्तिरित्याशयेन साधनताया लिङर्थत्वाभ्युपगमः तेन रूपेण उपायविशेष्यकेष्टसाधनताप्रका
रत्वेन गौरवादि निविशेषत्वमपि गुरुत्वमित्याशयः लाघवात् संग्राहकलाघवादित्यर्थः इष्टप्रति
योगिकहेतुताविषयकज्ञानत्वेनेति इष्टविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितसा
धनत्वविषयतानिरूपिताश्रयत्वविषयतानिरूपितोपायविषयताशालिज्ञानत्वेनेत्यर्थः विशे

ष्यविशेषणाभावमेदपीतिकृदमिष्टसाधनमेतत्साध्यमिष्टमिति ज्ञानयोरेकविशेष्यकत्वाद्यभावे
१०५ प्यक्षतं उभयसाधारणे साध्यत्वे साधनताप्रतियोगित्वमिति साध्यताभाने इष्टसाधनताप्रतियो
गित्वं भासत इति साध्यमिष्टमिति ज्ञानसाधारणमुक्तरूपस्येतिभावः यद्यप्येवं पूर्वपक्षिणोपि साध
105 नतायाः साध्यताघटकताऽनुमतेति किं चेत्यादिना सिद्धान्तिनः साधनत्वाघटितसाध्यत्वनिर्वचनं दूष
यित्वा तस्याः तत्साधनकत्वमेव तत्साध्यत्वमिति व्यवस्थापने संदर्भविरुद्धं स्यात् तथापि साधनता
याः साध्यत्वाघटकत्वे साध्यतायास्तदपेक्षयाऽगुरुत्वेन विशेष्यविशेषणमित्यादिरीत्या वोधे विशि
ष्टविशेषणज्ञानानपेक्षोत्पत्तिवैचित्र्यं च स्वीकृत्य कृतिसाध्ययागसाध्यमिष्टमिति वोधमेव विधिवा
क्याधीनं पूर्वपक्षी स्वीकर्तुमर्हतीति साध्यतायाः साधनताघटितत्वदूरीकरणे संगतिः इष्टसाध
नताज्ञानात् उपायविशेष्यकतत्प्रकारकज्ञानात् इदमपीति साध्यतायाः साधनताघटितत्वेन
गुरुतया तज्ज्ञानहेतुतायां गौरवरूपोक्तदूषणमपीत्यर्थः तेन रूपेण इष्टविशेष्यकसाध्यताप्रका
रकज्ञानसाधारणरूपेण जनकत्वे जनकत्वोपगमे- तथा सति साधनताप्रतियोगित्वरूपसा

ध्यतायाअपिसंबंधांतरस्यविषयतायाअतिप्रसंगभंगायप्रवर्त्तकतावच्छेदकशरीरेनिवेश्यत
याउपायविशेष्यकप्रवर्त्तकेष्टसाधनताज्ञानेपिसाधनत्वविशेषणीभवत्प्रतियोगित्वेइष्टरूप
विशेषणस्यसंबंधविशेषभानस्यस्वीकरणीयतयागौरवमन्यथातयोरनुगमासंभवादितिभावः
सामान्यरूपेणेति॰साधनताप्रतियोगित्वरूपसाध्यताप्रकारकज्ञानस्याप्रवर्त्तकतामुपगम्येष्टां
शेप्रतियोगितासंबंधेनसाधनताप्रकारकरूपपत्साध्यताज्ञानंयच्चोपायांशेआधेयतासंबंधे
नसाधनताप्रकारकंज्ञानंतदुभयानुगमकोक्तरूपेणापीत्यर्थः॰तदपिप्रवर्त्तकत्वमपि॰नदोषः।
साध्यतायाःसाधनताघटितत्वेनतदपेक्षयागुरुतयानकारणतावच्छेदकगौरवंमूलेनियमत
स्तद्धुतरसत्वमितितद्ध्वंसाधिकरणक्षणएवसत्वमित्यर्थः॰घटेव्यभिचारात्घटेऽसत्वान्नस्व
समानाधिकरणदंडविनाशदशायामपिघटसत्वादितिभावः॰आलोकेइष्टत्वज्ञानस्यप्रव
त्तिपूर्वमिष्टत्वज्ञानजननस्यआवश्यकत्वादितिअन्वयव्यतिरेकाभ्यांतत्तज्ञानहेतुतासिद्धा
वितिशेषः॰तस्मिन्इष्टत्वज्ञानेसत्यपीतिफलेसिद्धत्वग्रहदशायामितिशेषः॰मूलेस्वज्ञानेनतत्वा

ष्टादितिइष्टत्वज्ञानेइच्छादेर्विशेषणतयाइच्छोत्पत्तिद्वितीयक्षणेइच्छादिरूपविशेषणज्ञानोत्पत्त्याद्वि
१०६ 106 तीयक्षणएवेष्टत्वज्ञानसंभवेनतदानीमेवफलेच्छायानाशेतदनंतरक्षणेउपायेच्छानुत्पादप्रसं
गादित्यर्थः आलोकेस्वज्ञानंव्यापारोऽस्त्वितितथाचव्यापारैवत्याइच्छायानाशेपिनानुपपत्तिरितिभावः
मूलकृतासुखेइष्टत्वेज्ञानासंभवंतादृशकारणाभावात्पाकप्रवृत्त्यनिर्वाहप्रयोजकतयाभिहितमित्या
शयेनसुखेइष्टत्वेज्ञानंपाकसाध्यकप्रवृत्तावहेतुरित्यतस्तदभावः कारणाभावतयानप्रवृत्त्यभावप्रयो
जकइत्यनुशयेनओदनेपीष्टत्वज्ञानासंभवेनपाकप्रवृत्त्यनिर्वाहप्रदर्शनमवतारयति। नन्वितिओद
नपाकसाध्यकप्रवृत्तावोदनस्यसाध्यांतर्गततयाभानादोदनसाध्यकप्रवृत्तौवतत्फलसुखगोचरेष्ट
त्वज्ञानमपेक्षितमितितदभावेनतत्पाकेप्रवृत्त्यनिर्वाहएवेत्याशंक्याह तत्साधनस्येतिसुखसाधन
स्येत्यर्थः असिद्धत्वेनप्रवृत्त्यगोचरत्वादितिसाध्यतयायत्पाकप्रवृत्तिगोचरत्वंतदभावादित्यर्थः वि
शिष्टसाध्यांतर्गतत्वेपितस्यसाध्यतावच्छेदकतयैवप्रवृत्तिविषयत्वात्तनादृशविषयतायांचतद्विशे
ष्यकेष्टसाधनताज्ञानस्याहेतुत्वादितिभावः मूलेतत्रेतिज्ञातः कृतओदनइत्यादावित्यर्थः विशेष्यसं

निकर्षात्ओदनस्यसिद्धतयातत्सन्निकर्षसत्त्वेनविशेष्यतयाभानसंभवादित्यर्थः प्रकृतेऽदनस्य
विशेष्यतयाभानासंभवंस्पष्टयति आलोके इहत्विति ओदनेष्टयापाकप्रवृत्तिपूर्वंनास्तीत्यर्थः तदभावा
त्सन्निकर्षाभावेनविशेष्यतयाऽभानात् यद्यपिमानससंज्ञाने उपनीतस्यापिविशेष्यतयाभानंनैयायि
कानुमतंतथापितस्यतथाभानमभ्युपेत्यतद्विशेष्यकेष्टत्वज्ञानपर्यंतंतदुद्देश्यकप्रवृत्तावनपेक्षितं
अपेक्षितंतुनतत्फलेष्टत्वोभयवैशिष्ट्यावगाहिज्ञानमेवेत्यभिप्रायंवक्ष्यन्नस्त्वित्याद्यवतारयति।न
न्विति।वक्ष्यसदित्यनेनप्रवृत्त्यव्यवहितपूर्वकालसत्त्वंविवक्षितं।यदाकदाचित्सत्त्वापेक्षायांतुप्र
स्यभोजनेप्रवृत्त्यापत्तेः तादवस्थ्यात् एवंयदासुखादाविच्छाभवतीत्याद्यग्रिमग्रंथतोप्येतत्स्पष्टं
भवतीत्याशयेनप्रवृत्त्यव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानोपादानप्रत्यक्षयोः सत्त्वेफलेच्छासत्त्वा
संभवमाक्षिपति नचेत्यादिना इष्टसाधनताज्ञानफलेच्छावदितिफलेच्छाफलसाधनतयाज्ञानयो
रिवेत्यर्थः विषयप्रत्यक्षस्य उपादानप्रत्यक्षस्ययद्यपिफलेच्छाफलसाधनताज्ञानयोरूपाप
चिकीर्षाद्वारैवप्रवृत्तिहेतुता अतःप्रवृत्त्यव्यवहितप्राक्क्षणेस्वतन्त्रयोरसत्त्वेपिचिकीर्षाद्वारातत्

२०८
107

सत्वं उपादानप्रत्यक्षस्य साक्षात्सत्वं संभवत्येवेति समाधानं स्फुटं तथापि आपाततः समाधानांतर
माह इष्टोत्पत्त्यनंतरेति फले प्रासामग्र्युत्तरत्वे सति तदुत्तरतत्सिद्धत्वज्ञानसामग्र्यनुत्तरो यः समयस्त
द्विशिष्टफलसाधनताज्ञानस्य स्वरूपसदिष्टविषयसाधनताज्ञानेत्यनेन विवक्षितत्वादित्यर्थः ए
वंच इष्टानाशेपि प्रवृत्त्यव्यवहितपूर्वक्षणे उक्तसमयविशिष्टफलसाधनताज्ञानसत्वान्नानुपपत्ति
रिति भावः यद्यप्येतद्विवक्षणे यत्र इष्टोत्तरं वर्षादिकालमध्ये फले सिद्धत्वज्ञानं न जातं तत्र वर्षादि
विलंबेनापि प्रवृत्त्यापत्तिस्तथापि इष्टोत्पत्तौ यावत्क्षणव्यवहितएवक्षणे प्रवृत्तिस्तावत्क्षण
मात्रस्थायी समय एव इष्टतुल्यकालोत्पन्नतादृशसमयत्वेन हेतुरित्यत्र तात्पर्यं इष्टत्वेन सु
खादिविषयकशाब्दज्ञानानंतरं स्वर्गत्वादिना तद्विषयकतत्साधनताज्ञानं जायते न तदेव प्रव
र्तकमिति तदनंतरमित्यादिना मूलेनाभिहितं तादृशबोधे आकांक्षायाः स्वर्गकामसमभिव्या
हारस्य चोपयोगितोक्तेस्तत्स्वरसात् तादृशज्ञानमपि शाब्दबोधरूपमित्याशयेन व्याचष्टे स्व
र्गस्येति कामनाविषयत्वेनोपस्थितस्येति सुखत्वलिंगकानुमानादित्यादिः असिद्धत्वोपस्थित्या २०८

कामनाविषयत्वलिंगेनेत्यादिः साधनाकांक्षोदयादिति शेषः लिङ्वाच्येनेष्टेन सहेति लिङो यागादि
ष्टसाधनताप्रतियोगितयाभासमानेनेष्टेन सहेत्यर्थः तदभिन्नसाधनपरिचयादेव तत्साधनाकां
क्षानिवृत्तिर्वोध्या प्रवर्त्तकमुत्पद्यत इति यद्यपि तादृशशाब्दवोधस्य साधनप्रतियोगित्वेन भास
मानफलेनेष्टविषयतावच्छेदकस्वर्गत्वप्रकारिता अपितु अभेदसंवंधेन तदवच्छिन्नप्रकारितैव
तथापि फलांशे आश्रयतासंवंधेनेष्टतावच्छेदकप्रकारकमिवाभेदेन तदवच्छिन्नप्रकारकमपि
ज्ञानं हेतुः न हि तादृशज्ञानतद्वदभेदज्ञानयोस्तुल्यकार्यकारित्वात् अतएव पक्षे व्याप्यवदभेदज्ञानस्या
प्यनुमितिजनकत्वं परामर्शग्रंथे मणिकृता लिखितं अथवा स्वर्गत्वविशिष्टाभेदान्वये स्वर्गत्वस्या
पि धर्मिपारतंत्र्येणेष्टे प्रकारत्वमुपेयमिति भावः। विधीति विधिजन्यज्ञानजन्यज्ञानं प्रवर्त्तक
मिति मूलग्रंथविरोध इत्यर्थः ततो विधिवाक्यजन्यज्ञानस्याप्रवर्त्तकत्वलाभात् इष्टस्वर्गाभेदान्व
यवोधस्यापि च विधिजन्यज्ञानत्वादिति भावः धात्वाख्यातार्थान्वयज्ञानरूपेति यागादौ धात्वर्थे स्वर्ग
पदार्थविशेषितेष्टसाधनत्वरूपाख्यातार्थसंसर्गज्ञानरूपमित्यर्थः उक्तरूपेति स्वर्गपदार्थान्विते

ष्टसाधनताविशिष्टयागविषयकमित्यर्थः तस्य तादृशार्थस्य न यावत्ततो वांतरवाक्यार्थज्ञानस्यै
१०८ वाप्रवर्त्तकत्वलाभादविरोध इति भावः पदार्थैकदेशान्वितत्वा लिङ्पदार्थेष्टसाधनत्वैकदेशान्वयान्न
न न्वितत्वेन कामनाविशेषणतयोपस्थितत्वेनाकांक्षतया इष्टविशेषणतयान्वयेन निराकां
108 क्षतया एतदुपलक्षणं समासरूपवत्येकदेशा स्वर्गपदार्थेन समासाप्रविष्टपदार्थस्येष्टस्यान्वया
संभवाच्चेत्यपि बोध्यं नैवमन्वयः न इष्टे स्वर्गान्वयः आनुमानिकं मानसं वेति नादृशोपि बोधे कथं
चिदाकांक्षादेरुपयोगो बोध्य इति न विरोधः तन्निषेधप्रतिपादनविरोध इति स्वयमप्यानुमानि
कज्ञानस्य प्रवर्त्तकत्वोपगमादिति भावः स्वांशानुरोधेनेति स्वकृतिसाध्यताज्ञानस्य प्रवर्त्तकता
यामपि कारानुमतत्वेपि स्वेष्टविषयत्वेन फलज्ञानस्य प्रवर्त्तकतायास्तदननुमतत्वात् तदंशाज्ञाना
नुरोधेनाहं स्वेष्टसाधनयागकः स्वर्गकामत्वादित्यनुमानस्यावश्यकत्वे तस्यैव तन्त्रेत्यादिना
निराकृतत्वादित्यर्थः विश्वजिन्न्यायानवतार इति विश्वजिता यजेतेत्यादौ विधिप्रत्ययेनेष्टसा
धनत्वे बोधिते इष्टविशेषाकांक्षायां स्वर्गरूपेष्टकल्पनमिति न्यायाप्रवृत्तिः साधनतामात्रस्य वि

ध्यर्थत्वपक्षेतुइष्टानुपस्थितौतद्विशेषाकांक्षानुदयादित्यर्थः ननुसाधनत्वमात्रप्रतीतावपिसाध्य
विशेषाकांक्षयातद्विशेषस्वर्गकल्पनसंभवइत्याशंकांनिराकरोतिसाधनत्वमात्रइतिसाध्यांतर
स्यापिअनिष्टनरकादेरपिसंभवात्साध्यतासंभवेनसाध्यविशेषाकांक्षयाकल्पनप्रसंगात्प्रवर्त्त
कत्वतात्पर्यग्रहात्दर्शितविधिवाक्यस्यप्रवृत्तिपरतायागहीनत्वात्अन्यस्यस्वर्गान्यनरकादिफ
लसाधनतापरत्वस्यबाधात्अभावनिश्चयात्स्वर्गएवसाध्यइतिसाधनतापरत्वग्राहकप्रमाणे
नस्वर्गसाधनतापरत्वस्यविधिवाक्यग्रहेणस्वर्गएवयागसाध्यतयालभ्यइत्यर्थः इष्टसाधनत्व
मेवाक्षिप्यतामितियागपाकादिरिष्टसाधनंस्वप्रवृत्तिपरनिर्दोषवाक्यप्रतिपाद्यत्वादिनिष्ठेपरा
गेणसाधनत्वस्याक्षेपएवस्वीक्रियतांननुसाधनत्वस्यशाब्दबोधइत्यर्थः नन्साधकत्वेनेतिविधि
प्रत्ययस्यप्रवर्त्तकार्थवाचकत्वग्रहेणेत्यर्थः नरेवविधिवाक्येप्रवृत्तिपरत्वमेवदुर्ग्रहमितितादृशा
र्थवाचकपदघटितत्वेनैवविधिवाक्येप्रवृत्तिपरत्वानुमापकत्वादितिभावः इष्टसाधनत्व
मेवार्थोस्त्वितिसमभिव्याहृतकामनाविषयतावच्छेदकरूपावच्छिन्नफलविशेषितंसाधनत्व

मेव विधिप्रत्ययवाच्यमस्त्वित्यर्थः प्रवृत्तिबलेन विधिवाक्यात् प्रयोज्यवृद्धप्रवृत्तिदर्शनबलेन विशिष्टा
१०६ न्वयादृशविशिष्टार्थज्ञानस्य प्रवर्त्तकतात्तादृशविशिष्टार्थ एव प्राक् आद्यव्युत्पत्तिदशायां शक्तिग्रहा
त् किंचिदंशपरित्यागवीजान्यलभ्यत्वप्रतिसंधानस्य तदाभावेन विधिप्रत्ययस्य शक्तिग्रहात् ननूत्त
109 रकाल इष्टस्यान्यलभ्यत्वप्रतिसंधानेन तस्यांशाशक्यत्वे शक्तिग्रहस्य भ्रमत्वं कल्प्यतामित्याशंकां निराक
रोति प्राथमिकेति शक्तिग्रहानुरोधः शक्तिग्रहस्य प्रमात्वानुरोधः विशिष्टमेव इष्टांशे विशेषितसाध
नत्वमेव अग्रेऽन्यथासिद्धिरिति उत्तरकाले अन्यलभ्यत्वप्रतिसंधानेन पूर्वशक्तिग्रहस्य कस्यचिदंशेऽ
शक्यत्वे भ्रमत्वं कल्प्यत इत्यर्थः साधनत्वेपीति अन्यथासिद्धिरित्यस्यानुषंगात् लभ्यते यदि विधिप्र
त्ययस्य इष्टसाधनत्वे पृथक् शक्तिरूपेयते तदेवेष्टांशपरित्यागप्रसक्तिस्तदेव न बलवदनिष्टाज
नकत्वशंकेरावश्यकतया तत्र बलवत्त्वशरीरे स्वजन्येष्टप्रवेशात् स्वजन्येष्टस्य स्वनिष्ठसाधन
ताप्रतियोगीष्टरूपतया इष्टोपरागेणैव साधनत्वशंकेरनयवादादित्याह। किंचेति साधनत्वमा
त्रमपीति इष्टसाधनत्वमपि न शक्यं पार्थक्येन कुतः साधनत्वमात्रमिति वैपरीत्येन योजनापार्थ

केनेत्येतस्यमयोच्यतइतिशेषःकुतःसाधनत्वमात्रंइष्टांशंपरित्यज्यकेवलसाधनत्वंभवताऽपथ्यकु-
शक्यमुच्यतइतिकुतइत्यर्थःस्वजन्येष्टोत्पत्तिगर्भतयास्वजन्येष्टोत्पत्तिनांतरीयकदुःखाधिकदुः-
खपरतयाक्रियेष्टसाधनत्वस्येष्टेप्रकृत्यर्थेनिष्टसाधनतानिरूपकत्वस्यवलवदनिष्टाजनकत्वग-
विषयत्वादिनिएतच्चस्वजन्येष्टोत्पत्तिनांतरीयकातिरिक्तदुःखाजनकत्वंयथाश्रुतमेवतत्रापिस्वपदस्या-
नुयोगिपरमित्यनुसारेणयदितुस्वपदंदुःखजनकरूपभेदप्रतियोगिपरमुच्यतेवलवद्द्वेषविषय
दुःखाजनकत्वंवासमुदायेनविवक्ष्यतेतेनदाप्रकृतक्रियायाइष्टसाधनत्वेननतद्गर्भेनिवेशितमित्यव-
धेयंमूलेउपायतामात्राभिधानेपिलकारेणयागेइष्टसाधनत्वत्वेनसामान्यरूपेणकारणतावोध-
नेपितद्विशेषेतिकारणतात्वव्याप्यव्यापारवत्कारणतात्वरूपकरणत्वत्वावच्छिन्नावोधनादित्यर्थः
तथाचकरणत्वत्वावच्छिन्नस्यानभिहिततयातद्बोधकतृतीयायानानुपपत्तिरितिभावःवस्तुतस्त्वभि-
हितान्वयलभ्यंयागेष्टसाधनत्वंइष्टसाधनत्वमात्रस्यलिङर्थत्वादितिमूलस्ययथाश्रुतस्ययागेष्ट-
साधनत्वपर्यंतस्यनलकाराभिहितत्वंलकारशक्तिलभ्यत्वरूपंयागांतर्भावेणतस्याशक्यत्वात्

११० अपि तु धात्वर्थेन तद्वाच्येष्टसाधनत्वान्वयलभ्यमेव तदित्ययमर्थः प्रतीयते स चासंगतः क्रियोपरक्तक
र्तृकरणत्वादीनां सर्वत्रैव धात्वर्थे लकारकर्त्रर्थान्वयलभ्यतया कुत्रापि शक्तिमात्रलभ्यत्वरूपाभिहि
तत्वानिर्वाहात् ततो मल्लभमन्यथाव्याख्यातुमवतारयन्ति नन्विति कुतः प्राप्तमिति करणत्वमिति शेषः अ
नूद्यत इति तथा च तादृशतृतीयायाः करणत्वानुवादकत्वानुपपत्तिरिति भावः ननु माभूदनुवादक
त्वमप्राप्तमेव करणत्वं तादृशतृतीयया बोध्यत इत्युपेयतामित्यत आह पूर्वप्रापण इति अप्राप्तप्राप
कत्व इत्यर्थः वाक्यभेदापातादिति तदर्थस्य पृथग्विधानादिति भावः इष्टकरणत्वस्य प्राप्तत्वनिर्वाहार्थं
व्याचष्टे यागेष्टसाधनत्वमिति यागेष्टकरणत्वमिति यागनिष्ठमिष्टकरणत्वमित्यर्थः। एवं च अभिहि
तान्वयलभ्यमिति मूलस्य यागे लिङ्वाच्याया इष्टसाधनताया अन्वयबोधाधीनबोधोत्तरविषय इ
त्यर्थः एवं चेष्टकरणत्वस्य प्राप्तत्वमनभिहितत्वं च निर्वहति शाब्दबोधोत्तरबोधोत्तरविषयत्वेपि शा
ब्दबोधाविषयत्वेन अभिहितत्वाभावात् अविधानस्य शाब्दबोधकरूपत्वात् इष्टकरणत्वं कुतो। नाभि
हितमित्याकांक्षायां तस्य लिङ्प्रत्ययावाच्यत्वमाह मूले इष्टसाधनतामात्रस्येति अत्र साधनपदस्य

पूर्ववत् करणार्थकत्वे करणताया अनभिधानाल्लाभ इत्यत उपायमात्रार्थेन यालोककृद्व्याचष्टे इ
ष्टेति उपायतावोधे सति वोधांतरेण करणतायाः प्राप्तत्वं स्फुरयन् अनुवादकतोस्य ष्टयति सामान्य
शक्त्येति उपायत्वसामान्यशक्त्येत्यर्थः साक्षादसाधने साक्षादसाधनत्वेन ज्ञायमाने यागे व्यापारां
तर्भावेण तद्बोधयंत्येति साक्षादसाधनत्वे सति साधनत्वरूपलिंगोत्थापनद्वारा व्यापारवत्त्वविशि
ष्टसाधनत्वमनुमापयंत्येत्यर्थः करणत्वपर्यवसन्नतयानावताकरणतात्वबोधपर्यवसानेन एतत्ता
वतैव कथं करणत्वलाभ इत्याकांक्षायामाह फलेति फलायोगव्यवच्छिन्नत्वे सति सव्यापारस्य कार
णत्वस्यैव करणत्वरूपत्वादित्यर्थः न्यायमते कर्तृकरणादिधर्मिणां लकारेणानभिधानात् तेषाम
नभिहितसंख्याकत्वरूपमेव विवक्षणीयं न तु यथाश्रुते अनभिहितकर्तृत्वादिधर्मत्वं वाच्यं तेन पच्य क४
त इत्यादावपि क्रियाविशेषणतया कृतेराख्यातेनाभिधानात् न तथा च प्रकृते विधिप्रत्ययेन करण
त्वाभिधानेऽपि न तृतीयानुपपत्तिः तेन करणसंख्यानभिधानात् इत्येन तत्समाधानपरतया स्वयं वक्ष्य
तस्त्वित्यादिमूलं व्याचष्टे वयं त्विति प्रथमेति न तृतीयेत्यर्थः कर्त्रादीति पदेन प्रथमाप्रकृत्यर्थत्वेन

कर्त्रादिकं विवक्षितं न तु विशिष्य आख्यातेन करणसंख्याभिधानाप्रसिद्धेः संख्यानभिधाने अभिहिता
न्वयलभ्यं योगेष्टसाधनत्वमिति मूलतो लब्धं तत्र मात्रपदं पूरयित्वा न लभ्यत्वव्यवच्छेद्यमाह न त्विति इ
ष्टसाधनत्वस्येत्यादि फक्किकावतारबीजं रीकामाह कथमिति एतन्न्यायागतसंख्यायाश्च बोधनं । इ
दं तु बोध्यं अनभिहितकर्त्रादौ तृतीयेत्यस्य संख्यायाऽलकारानभिहितत्वमात्रं न विवक्षितं कृत्तद्धितादि
भिः कर्त्राद्यभिधानेपि तृतीयादेरभावात् अपि तु कर्त्रादेस्तत्संख्यायाश्च कर्त्रादिबोधकपदोत्तरसु
भिन्नेनानभिहितत्वं एवं च करणतृतीयायामितरेण करणानभिधानमेव नियामकं करणसंख्याया
लकारकृदादिभिरनभिधाननियमेन तत्संख्यानभिधानस्याव्यावर्त्तकत्वात् यत्र ल्युडादिकृता बहु
व्रीहिसमासेन वा करणाभिधानं न तत्संख्यानभिधाने न तृतीयाप्रसक्तिवारणाय करणानभिधाना
पेक्षायाश्चावश्यकत्वाच्चेति विधिप्रत्ययेन करणत्वाभिधानेपि करणानभिधाने न तृतीयोपपत्त्या
न तत्संख्यानभिधानमाश्रित्य तृतीयोपपादनं हेयमेवं अभिहितान्वयलभ्यं यागादिरूपधर्मिणो वि
धेयं इष्टसाधनत्वान्वयलभ्यं यागेष्टसाधनत्वं साधनत्वविशिष्टो धर्मी न तु सोऽलकारेणाभिहितः धर्म

स्यैव विध्यर्थत्वादित्येवं मूलार्थः साधीयान् दर्शपौर्णमासाभ्यामित्यादौ दर्शादिपदस्य कर्मनामधेयत
यावाच्यत्वं तृतीयार्थः न तत्पदस्य तत्तत्पदवाच्यपरतया अभेद एव वा न तु इष्टकरणत्वं क्रियान्वित
करणताया एव कारकविभक्तिरूपतृतीयया बोधनात् प्रत्ययार्थेष्टसाधनत्वैकदेशाभूतेष्टान्वितक
रणत्वस्य तृतीयया बोधनासंभवादिति नु तत्त्वं प्रकारान्तरेण तृतीयामुपपादयन्तां सांदडमतानुसा
रिणं मतमाह अन्तरंगत्वादिति एकपदोपात्तत्वादित्यर्थः तदुच्यते इष्टसाधनत्वं बुध्यते क्रियाद्वारैव कृ
तेरिष्टसाधनतया क्रियेष्टसाधनत्वं विना कृतीष्टसाधनताया अनुपपत्तेरिति भावः याकादिविशेष्य
कप्रवृत्तौ पाककृतिविशेष्यकेष्टसाधनताज्ञानं तु हिंसाविशेष्यकेच्छयोर्हि तुल्यत्वेपि ज्ञानेच्छाभ्यां सहतज्जन्य
कृतेः समानविशेष्यकत्वानुभवमुपपादयति मूले क्रियाद्वारेति क्रियाया अपीष्टसाधनत्वं विषयइ
ति व्यापारे फलसाधनत्वमविषयीकुर्वता ज्ञानेन व्यापारिणि तत्साधनता न गृह्यत इति नियमादिति
भावः कृतीच्छाभवं तीक्रियाविषयाभवतीति क्रियानुकूलकृतीच्छायां कृतेरिव क्रियाधर्मिकेष्टसाधन
ताधीघटितसामग्रीबलेन क्रियाया अपि प्राधान्येन भावमित्यर्थः इति अतः समानविषयता समा

१९२ नविशेष्यकताचिकीर्षाविषयतयाकृतीच्छाविशेष्यतयापाकः प्रतीयत इत्यतः कर्मत्वार्थकद्विती
यांतेन पाकोऽलेखि इति शेषः आलोके इति प्रत्ययात् एतच्छब्दोल्लेखिप्रत्ययात् तद्विषयत्वमिति चिकी
र्षाविशेष्यत्वरूपं तत्कर्मत्वमित्यर्थः चिकीर्षात्वं चिकीर्षापदार्थत्वं कृतिसाध्यत्वप्रकारकेच्छाविषयत्वेना
पीति पाकस्येत्यादिः तत् अन्यथोपपत्तेः पाकं चिकीर्षतीति शब्दोल्लेखिप्रत्ययोपपत्तेः धात्वर्थप्रकारिके
च्छावाच्यतायाः अपि सत्त्वेन तस्य संभवादिति भावः एतदुपलक्षणं कृतीच्छायाश्चिकीर्षापदार्थत्वे तत्र स्वा
तंत्र्येण पाकस्य विशेष्यतामादाय चेत् पाकं चिकीर्षतीति व्यवहारस्तदा पाकादि चिकीर्षायां यत्र व
स्त्रादेर्विषयता तत्र वस्त्रं चिकीर्षतीति व्यवहारापत्तिः कृतिसाध्यत्वप्रकारिकेच्छायाश्चिकीर्षाप
दार्थत्वे च वस्त्रं चिकीर्षतीत्यादितो वस्त्रादिविशेष्यकत्वावच्छेदेन कृतिसाध्यत्वप्रकारकत्वप्रती
तेर्नतादृशव्यवहारप्रसंग इत्यपि द्रष्टव्यं मूले इच्छाविषयविषयतयेति सन्प्रत्ययार्थेच्छायां वि
षयितया प्रकारीभूत तत्तत्प्रकृत्यर्थे क्रियायां द्वितीयांतेन पाकादिपदेन पाकविषयकत्वादिरू
पतत्कर्मकत्वान्वयबोधनादिच्छाविषयकृतिविषयतयैव पाकं चिकीर्षतीत्यत्र पाकः प्रतीयते १९२

न्तिच्छाविषयतयेत्यर्थः धात्वर्थप्रकारिकेच्छायां द्वितीयार्थकर्मत्वान्वयोपगमे ओदनपाकादि
विशेषितधात्वर्थपाककृत्यादिविषयेच्छाकालेऽप्योदनं पिपक्षते पाकं चिकीर्षतीति व्यवहारानुपप
त्तिरितीच्छाविषयक्रियाकर्मत्वमेव द्वितीयादिना प्रत्याप्यते अत एवेच्छायाः सकर्मकत्वेपि स्थि
त्यादेरकर्मकतया ग्रामं तिष्ठासतीत्यादयो न प्रयोगा इति मूलाशयानुसारेण कृतीच्छाया एव चि
कीर्षात्वमिति निर्व्यूढमित्याह आलोकेन यथा चेति कृतीच्छयैव पाकविषयककृतीच्छयैव चिकीर्षा
विषयत्वं चिकीर्षापदार्थकर्मत्वं नान्यतः न कृतिसाध्यत्वप्रकारकपाकेच्छायाः इदमत्रावधेयं प्रकृ
त्यर्थकर्मतायाः सन्नन्तसमभिव्याहृतद्वितीयादिना प्रत्यायने पाकविषयककृतित्वमात्रेण पाकग
मनोभयगोचरसमूहालंबनकृताविच्छा तत्र पाकं चिकीर्षतीतिवद्गमनं चिकीर्षतीति स्यात् द्वितीया
तार्थविशिष्टक्रियायां विषयितासंबंधेन वैशिष्ट्यस्य सन्प्रत्ययार्थेच्छायां भाननियममुपगम्योक्त
स्थले इच्छायां गमनोपलक्षितायाः एव कृतेर्विषयतया उक्तप्रयोगवारणेपि गमनं चिकीर्षति इ
त्यादावात्मनेपदिनगमनादाविच्छाविषयकृतिकर्मत्वप्रत्ययानुपपत्तिः कृतेरिच्छाविशेषणतयाभा

नेन गमनविशेषणकर्मत्वे विशेषणतयाभानासंभवात् कर्मास्व्यातस्थले विशेष्यविशेषणभाववैपरी
११३ त्येन सन्प्रत्ययार्थेच्छाया विशेषितायाः प्रकृत्यर्थक्रियायाभानोपगमेन तन्निर्वाहेपि गमनोपलक्षितकृ
113 तिविषयकदर्शितेच्छामादायापगमनं चिकीर्षति इति प्रयोगप्रसंगो दुर्वारः इच्छायां गमनविशिष्टकृत्य
विषयत्वेपि गमने इच्छाविषयकृतिविषयत्वाबाधात् एवं बाधितगगनादिविषयकत्वेन दर्शनादीच्छा
मादाय गगनं दिदृक्षते इत्यादिप्रयोगानिर्वाहः गगने प्रत्याय्यमानस्य दर्शनकर्मत्वस्य बाधात्। तस्मा
त् सन्नन्तधात्वर्थे तत्तत्क्रियाविषयकेच्छाकर्मत्वमेव द्वितीयादिना बोध्यते तादृशेच्छाकर्मत्वं च तत
त्क्रियाकर्मतया इच्छाविषयत्वं न तु तादृशेच्छाविषयत्वमात्रं तद्विशेष्यत्वमात्रं वा अतः पाकादि चि
कीर्षायां समूहालंबनरूपायां प्राधान्येन वह्नेर्विषयत्वेपि गृहादि तिष्ठासायां स्थित्यधिकरणत्वे
न गृहादेर्विषयत्वेपि च वह्निं चिकीर्षति गृहं तिष्ठासतीत्यादयोगाः वह्निगृहादेस्तत्क्रियाकर्मत्वे
नेच्छायामभानात् गगनादेर्दर्शनकर्मत्वाभावेपि विसंवादिन्यामिच्छायां तेन रूपेण विषयतया ताद
शविषयतारूपकर्मत्वाबाधात् गगनं दिदृक्षते इत्यादिप्रयोगनिर्वाहः इच्छाविषयविषयतयेति म्।
११३

लस्यापि इच्छाविषयक्रियाकर्मत्वेनेच्छाविषयतयेत्येवार्थः तावतापि पाककर्मत्वेन कृतीच्छाया एव चिकी
र्षात्वेन तत्वन्यायादृशपाकेच्छाया इति निर्वाह इति प्रकृत्यर्थान्वितकृताविष्टसाधनत्वान्वयेपि कृतिद्वाराप्र
कृत्यर्थेति तदन्वयोऽक्षत इति न प्रकृत्यर्थे इति मूलासंगतिमाशंक्य पूरयति साक्षादिति परं परयो वेति
प्रकृत्यर्थान्वय इति शेषः अस्त्येवेत्यग्निमेणान्वयः अन्यथा परम्परयापि प्रकृत्यर्थान्वये स्वकृतिसा
ध्यपाकत्वेनेष्टसाधनताज्ञानादेव स्वकृतिसाध्यत्वेन पाकादाविच्छा न तु केवलपाकत्वेनेष्टसाधनताज्ञा
नसहकृतात्पाकत्वेन स्वकृतिसाध्यताज्ञानात् सामग्र्यंतरकल्पनापत्तेरिति यदुक्तं तदेव दूषयति मू
ले वन्हिसाध्यत्वेनेति एतद्दृष्टांतविषयोक्तं ओदनसाधनतेति गौरवादिति शेषः तथा च तादृशरूपा
वच्छेदेनेष्टसाधनताज्ञानमभ्रांतमसंभवीति कथं तादृशज्ञानघटितसामग्रीतोऽभ्रांतस्य पाकं कृत्या
साधयामीत्येतादृशेच्छानिर्वाह इति भावः न चेष्टविशेषस्य तद्रूपावच्छिन्नव्यतिरेकाद्व्यतिरेके एतद्रू
पावच्छिन्नस्येष्टविशेषसाधनतया न तदवच्छेदेन तद्धत्वधियः प्रमात्वासंभव इति वाच्यं एवमपि यद्रूपा
वच्छिन्नस्येष्टस्य पाकत्वावच्छिन्नव्यतिरेकादेव व्यतिरेकप्रतिसंधानं न तु कररूपावच्छिन्नव्यतिरेकात्

रूपावच्छिन्नेष्टयादर्शितपाके च्छायाश्चानुभविकत्वेन सामग्र्यंतरकल्पनायाश्चावश्यकत्वात्तर्हि इतिव
न्हि साध्यपाकत्वस्यौदनसाधनतानवच्छेदकत्वे इत्यर्थः कथमिति चेत् इति शुद्धपाकत्वेनेष्टसाधनता
ज्ञानघटितायां विशिष्टपाकत्वप्रकारकेच्छासामग्र्यां पाकत्वेन कृतिसाध्यताज्ञानमेव निविष्टं न तु या
यां तरसाध्यत्वज्ञानमित्यभिमानः अभिमानं निराकृत्य समाधत्ते इष्टसाधनत्वेनेति। न त्विष्टसाधन
ताज्ञानमात्रादिति विशिष्टपाकत्वावच्छेदेनेत्यादिः एवं च पाकइष्टसाधनमित्यादिज्ञानमेव पाकविशे
ष्यकचिकीर्षाद्वारा पाके प्रवर्त्तकमिति शेषः नित्यत्वफलसाधनत्वयोर्विरोधेन नित्यक्रियाप्रवृत्तिः
क्रियेष्टसाधनताज्ञानान्न संभवति अतः कृतीष्टसाधनताज्ञानमेव प्रवर्त्तकं वाच्यं तथा सति संध्योपा
सनाद्यभावे निंदार्थवादादिना प्रत्यवायहेतुत्वावगमेन दुःखसाधनाभावत्वेन ज्ञायमाने संध्योपा
सनादाविष्टसंभवेन तत्कृताविष्टसाधनताज्ञानसंभवेन तत्र प्रवृत्तिसंभवादित्याशंकां निराकरो
ति आलोकेनचेति ननु पाकत्वरूपेण कृतिसाध्यताज्ञानात्तद्रूपेणेष्टसाधनताज्ञानसहकृतात् कृतिसा
ध्यत्वेन क्रियाविषयिणीच्छा संभवतु तावतापि न द्वारा क्रियाधर्मिके इष्टसाधनत्वकृतिसाध्यत्वज्ञानयोः

प्रवृत्तिहेतुत्वं न सिध्यति पाककृतिरिष्टसाधनमिति ज्ञानात्पाककृतौ इष्टोत्पन्नेरप्युभयसिद्धत
पातद्वाराकृतौ इष्टसाधनताज्ञानस्यापि प्रवर्त्तकत्वसंभवादित्यतः स्वयं सोऽदृष्ट मतभंगयुक्तिमाह
वस्तुतस्त्विति पाकादेरिति स्वगोचरकृत्या इष्टजनने व्यापारीभूतस्येत्यादिः तत्कृतेः पाकादिद्वार
ककृतेः तद्द्विधासंभवेन इष्टसाधनताबोधासंभवेन तद्द्वारकफलसाधनत्वस्य फलसाधनतत्सा
धनतागर्भत्वादिति भावः तत्र प्राथमिकत्वे पाकानुकूलकृतिरिष्टजनिकेति ज्ञानापेक्षया इष्टजनक
पाकजनिका कृतिरिति ज्ञानस्य प्राक्स्वीकारणीयत्वे जन्यत्वेलक्षणे कृतिजन्यत्वस्वरूपे ऽगृहीते इति
कृतौ पाकजनकत्वग्राहिणोऽनुपदं कथनीयज्ञानेन विषयीकृते इति ज्ञानवत्त्व एव प्रथमं तज्ज्ञान
सत्त्वेनैव प्रत्यये प्रत्ययसत्त्वे तेनैव प्रवृत्तौ संभवत्यां तादृशज्ञानादेव प्रवृत्तिसंभवो न कृतौ इति नु उत्त
रभावि पाककृतौ इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वे त्वर्थः कल्प्यत इति शेषः गौरवादिति अन्यैव हे
तुस्तद्धेतोरिति न्यायेनेति नियतपूर्ववर्त्तित्वकल्पनाधिक्येनेत्यर्थः कृतौ पाकजनकत्वभाने पाके
कृतिसाध्यत्वभानानियमादुक्तक्रियेष्टसाधनताधियो न क्रियायां कृतिसाध्यताज्ञानरूपतेति कथं भ

णकारणमतेतस्यप्रवर्त्तकत्वेत्याशंकतेनन्वेतिज्ञानाभावःज्ञानानिर्वाहःसमाधत्तेसमानेतितद्विशेष्य
१२५ केतिपाकविशेष्यकेत्यर्थः। उक्तक्रमेणसमानवित्तिवेद्यतयाप्रवृत्त्यलाभःप्रवृत्त्यनिर्वाहःलाघवेनसा
115 मान्यत्वरूपलाघवेन। इदमापाततः। साध्यत्वसाधनत्वादेस्तुल्यवित्तिवेद्यत्वेमानाभावात्साधनत्व
स्यस्वरूपसंबंधादिरूपत्वेव्यापारिनिष्ठफलसाधनतायाव्यापारनिष्ठफलसाधनत्वावच्छिन्नत
याक्रियानिष्ठसाधनत्वमगृहीत्वापिकृतौतदूहसंभवात्वस्तुतःप्रवृत्तौक्रियानुकूलकृतिधर्मिके
ष्टसाधनताज्ञानत्वापेक्षयालघुनाक्रियाधर्मिकेष्टसाधनताज्ञानत्वेनैवहेतुताकल्पनमुचितंन
चतथासतिकृतिसाध्यताज्ञानत्वेनापिहेतुत्वांतरस्यकल्पनीयतयाभवतोगौरवमितिवाच्यंचि
कीर्षाकारणतयैवातिप्रसंगभंगेकृतिसाध्यताज्ञानत्वेनप्रवृत्तौहेतुत्वांतराकल्पनात्इष्टसाध
नताज्ञानत्वेनहेतुत्वाकल्पनेचिकीर्षाहेतुतयाप्रवृत्तौफलविषयतानियमासंभवेनतदनियमप्र
संगात्तादृशकारणतायाआवश्यकत्वात्तस्मादवच्छेदकगौरवेणनव्यमतमनुपादेयमिति।
इतिविधिविचारः कार्यत्वेनापूर्वंचेदिकलिङाद्यर्थःस्वर्गकामोयजेतेत्यादितोलिङायद्यैकदेश।

कार्यत्वघटककृतौस्वर्गकामाद्यन्वयात्क्रियायाश्चजनकत्वरूपविषयत्वेनकार्येऽपूर्वेऽन्वया
११८ त्स्यापित्वस्वर्गादिरूपफलजनकत्वयोरपितत्रभानेनयागविषयकंस्वर्गका

118

रसद्रामेश्रमाधुरी

पत्रे ७९

४८०